# 5 Shrimaddevibhagavatamahapurane Panchamah Skandhah

# ૫ શ્રીમદ્દેવીભાગવતમહાપુરાણે પઞ્ચમઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 05

File name : devIbhAgavatam05.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૫ શ્રીમદ્દેવીભાગવતમહાપુરાણે પઞ્ચમઃ સ્કન્ધઃ

## ૫.૧ પ્રથમોऽધ્યાયઃ । યોગમાયાપ્રભાવવર્ણનમ્ ।

ઋષય ઊચુઃ ।
ભવતા કથિતં સૂત મહદાખ્યાનમુત્તમમ્ ।
કૃષ્ણસ્ય ચરિતં દિવ્યં સર્વપાતકનાશનમ્ ॥ ૧॥

સન્દેહોऽત્ર મહાભાગ વાસુદેવકથાનકે ।
જાયતે નઃ પ્રોચ્યમાને વિસ્તરેણ મહામતે ॥ ૨॥

વને ગત્વા તપસ્તપ્તં વાસુદેવેન દુષ્કરમ્ ।
વિષ્ણોરંશાવતારેણ શિવસ્યારાધનં કૃતમ્ ॥ ૩॥

વરપ્રદાનં દેવ્યા ચ પાર્વત્યા યત્કૃતં પુનઃ ।
જગન્માતુશ્ચ પૂર્ણાયાઃ શ્રીદેવ્યા અંશભૂતયા ॥ ૪॥

ઈશ્વરેણાપિ કૃષ્ણેન કુતસ્તૌ સમ્પ્રપૂજિતૌ ।
ન્યૂનતા વા કિમસ્ત્વસ્ય તદેવં સંશયો મમ ॥ ૫॥

સૂત ઉવાચ ।
શ‍ૃણુધ્વં કારણં તત્ર મયા વ્યાસશ્રુતઞ્ચ યત્ ।
પ્રબ્રવીમિ મહાભાગાઃ કથાં કૃષ્ણગુણાન્વિતામ્ ॥ ૬॥

વૃત્તાન્તં વ્યાસતઃ શ્રુત્વા વૈરાટીસુતજસ્તદા ।
પુનઃ પપ્રચ્છ મેધાવી સન્દેહં પરમં ગતઃ ॥ ૭॥

જનમેજય ઉવાચ ।
સમ્યક્સત્યવતીસૂનો શ્રુતં પરમકારણમ્ ।
તથાપિ મનસો વૃત્તિઃ સંશયં ન વિમુઞ્ચતિ ॥ ૮॥

કૃષ્ણેનારાધિતઃ શમ્ભુસ્તપસ્તપ્ત્વાતિદારુણમ્ ।
વિસ્મયોऽયં મહાભાગ દેવદેવેન વિષ્ણુના ॥ ૯॥

યઃ સર્વાત્માપિ સર્વેશઃ સર્વસિદ્ધિપ્રદઃ પ્રભુઃ ।
સ કથં કૃતવાન્ઘોરં તપઃ પ્રાકૃતવદ્ધરિઃ ॥ ૧૦॥

જગત્કર્તું ક્ષમઃ કૃષ્ણસ્તથા પાલયિતું ક્ષમઃ ।
સંહર્તુમપિ કસ્માત્સ દારુણં તપ આચરત્ ॥ ૧૧॥

વ્યાસ ઉવાચ ।
સત્યમુક્તં ત્વયા રાજન્ વાસુદેવો જનાર્દનઃ ।
ક્ષમઃ સર્વેષુ કાર્યેષુ દેવાનાં દૈત્યસૂદનઃ ॥ ૧૨॥

તથાપિ માનુષં દેહમાશ્રિતઃ પરમેશ્વરઃ ।
કૃતવાન્માનુષાન્ભાવાન્વર્ણાશ્રમસમાશ્રિતાન્ ॥ ૧૩॥

વૃદ્ધાનાં પૂજનં ચૈવ ગુરુપાદાભિવન્દનમ્ ।
બ્રાહ્મણાનાં તથા સેવા દેવતારાધનં તથા ॥ ૧૪॥

શોકે શોકાભિયોગશ્ચ હર્ષે હર્ષસમુન્નતિઃ ।
દૈન્યં નાનાપવાદાશ્ચ સ્ત્રીષુ કામોપસેવનમ્ ॥ ૧૫॥

કામઃ ક્રોધસ્તથા લોભઃ કાલે કાલે ભવન્તિ હિ ।
તથા ગુણમયે દેહે નિર્ગુણત્વં કથં ભવેત્ ॥ ૧૬॥

સૌબલીશાપજાદ્દોષાત્તથા બ્રાહ્મણશાપજાત્ ।
નિધનં યાદવાનાં તુ કૃષ્ણદેહસ્ય મોચનમ્ ॥ ૧૭॥

હરણં લુણ્ઠનં તદ્વત્તત્પત્નીનાં નરાધિપ ।
અર્જુનસ્યાસ્ત્રમોક્ષે ચ ક્લીબત્વં તસ્કરેષુ ચ ॥ ૧૮॥

અજ્ઞાત્વં હરણે ગેહાત્તત્પ્રદ્યુમ્નાનિરુદ્ધયોઃ ।
એવં માનુષદેહેઽસ્મિન્માનુષં ખલુ ચેષ્ટિતમ્ ॥ ૧૯॥

વિષ્ણોરંશાવતારેઽસ્મિન્નારાયણમુનેસ્તથા ।
અંશજે વાસુદેવેઽત્ર કિં ચિત્રં શિવસેવને ॥ ૨૦॥

સ હિ સર્વેશ્વરો દેવો વિષ્ણોરપિ ચ કારણમ્ ।
સુષુપ્તસ્થાનનાથઃ સ વિષ્ણુના ચ પ્રપૂજિતઃ ॥ ૨૧॥

તદંશભૂતાઃ કૃષ્ણાદ્યાસ્તૈઃ કથં ન સ પૂજ્યતે ।
અકારો ભગવાન્બ્રહ્માપ્યુકારઃ સ્યાદ્ધરિઃ સ્વયમ્ ॥ ૨૨॥

મકારો ભગવાન્ રુદ્રોઽપ્યર્ધમાત્રા મહેશ્વરી ।

ઉત્તરોત્તરભાવેનાપ્યુત્તમત્વં સ્મૃતં બુધૈઃ ॥ ૨૩॥

અતઃ સર્વેષુ શાસ્ત્રેષુ દેવી સર્વોત્તમા સ્મૃતા ।
અર્ધમાત્રાસ્થિતા નિત્યા યાનુચ્ચાર્યા વિશેષતઃ ॥ ૨૪॥

વિષ્ણોરપ્યધિકો રુદ્રો વિષ્ણુસ્તુ બ્રહ્મણોઽધિકઃ ।
તસ્માન્ન સંશયઃ કાર્યઃ કૃષ્ણેન શિવપૂજને ॥ ૨૫॥

ઇચ્છયા બ્રહ્મણો વક્ત્રાદ્વરદાનાર્થમુદ્ભભૌ ।
મૂલરુદ્રસ્યાંશભૂતો રુદ્રનામા દ્વિતીયકઃ ॥ ૨૬॥

સોઽપિ પૂજ્યોઽસ્તિ સર્વેષાં મૂલરુદ્રસ્ય કા કથા ।
દેવીતત્ત્વસ્ય સાન્નિધ્યાદુત્તમત્વં સ્મૃતં શિવે ॥ ૨૭॥

અવતારા હરેરેવં પ્રભવન્તિ યુગે યુગે ।
યોગમાયાપ્રભાવેણ નાત્ર કાર્યા વિચારણા ॥ ૨૮॥

યા નેત્રપક્ષ્મપરિસઞ્ચલનેન સમ્ય-
ગ્વિશ્વં સૃજત્યવતિ હન્તિ નિગૂઢભાવા ।
સૈષા કરોતિ સતતં દ્રુહિણાચ્યુતેશાન્
નાનાવતારકલને પરિભૂયમાનાન્ ॥ ૨૯॥

સૂતીગૃહાદ્વ્રજનમપ્યનયા નિયુક્તં
સઙ્ગોપિતશ્ચ ભવને પશુપાલરાજ્ઞઃ ।
સમ્પ્રાપિતશ્ચ મધુરાં વિનિયોજિતશ્ચ
શ્રીદ્વારકાપ્રણયને નનુ ભીતચિત્તઃ ॥ ૩૦॥

નિર્માય ષોડશસહસ્રશતાર્ધકાસ્તા
નાર્યોઽષ્ટસમ્મતતરાઃ સ્વકલાસમુત્થાઃ ।
તાસાં વિલાસવશગં તુ વિધાય કામં
દાસીકૃતો હિ ભગવાનનયાપ્યનન્તઃ ॥ ૩૧॥

એકાપિ બન્ધનવિધૌ યુવતી સમર્થા
પુંસો યથા સુદૃઢલોહમયં તુ દામ ।
કિં નામ ષોડશસહસ્રશતાર્ધકાશ્ચ
તં સ્વીકૃતં શુકમિવાતિનિબન્ધયન્તિ ॥ ૩૨॥

સાત્રાજિતીવશગતેન મુદાન્વિતેન
પ્રાપ્તં સુરેન્દ્રભવનં હરિણા તદાનીમ્ ।

કૃત્વા મૃધં મઘવતા વિહૃતસ્તરૂણા-
મીશઃ પ્રિયાસદનભૂષણતાં ય આપ ॥ ૩૩॥

યો ભીમજાં હિ હૃતવાઞ્છિશુપાલકાદી-
ઞ્જિત્વા વિધિં નિખિલધર્મકૃતો વિધિત્સુઃ ।
જગ્રાહ તાં નિજબલેન ચ ધર્મપત્નીં
કોઽસૌ વિધિઃ પરકલત્રહૃતૌ વિજાતઃ ॥ ૩૪॥

અહઙ્કારવશઃ પ્રાણી કરોતિ ચ શુભાશુભમ્ ।
વિમૂઢો મોહજાલેન તત્કૃતેનાતિપાતિના ॥ ૩૫॥

અહઙ્કારાદ્ધિ સઞ્જાતમિદં સ્થાવરજઙ્ગમમ્ ।
મૂલાદ્ધરિહરાદીનામુગ્રાત્પ્રકૃતિસમ્ભવાત્ ॥ ૩૬॥

અહઙ્કારપરિત્યક્તો યદા ભવતિ પદ્મજઃ ।
તદા વિમુક્તો ભવતિ નોચેત્સંસારકર્મકૃત્ ॥ ૩૭॥

તન્મુક્તસ્તુ વિમુક્તો હિ બદ્ધસ્તદ્વશતાં ગતઃ ।
ન નારી ન ધનં ગેહં ન પુત્રા ન સહોદરાઃ ॥ ૩૮॥

બન્ધનં પ્રાણિનાં રાજન્નહઙ્કારસ્તુ બન્ધકઃ ।
અહં કર્તા મયા ચેદં કૃતં કાર્યં બલીયસા ॥ ૩૯॥

કરિષ્યામિ કરોમ્યેવં સ્વયં બધ્નાતિ પ્રાણભૃત્ ।
કારણેન વિના કાર્યં ન સમ્ભવતિ કર્હિચિત્ ॥ ૪૦॥

યથા ન દૃશ્યતે જાતો મૃત્પિણ્ડેન વિના ઘટઃ ।
વિષ્ણુઃ પાલયિતા વિશ્વસ્યાહઙ્કારસમન્વિતઃ ॥ ૪૧॥

અન્યથા સર્વદા ચિન્તામ્બુધૌ મગ્નઃ કથં ભવેત્ ।
અહઙ્કારવિમુક્તસ્તુ યદા ભવતિ માનવઃ ॥ ૪૨॥

અવતારપ્રવાહેષુ કથં મજ્જેચ્છુભાશયઃ ।
મોહમૂલમહઙ્કારઃ સંસારસ્તત્સમુદ્ભવઃ ॥ ૪૩॥

અહઙ્કારવિહીનાનાં ન મોહો ન ચ સંસૃતિઃ ।
ત્રિવિધઃ પુરુષઃ પ્રોક્તઃ સાત્ત્વિકો રાજસસ્તથા ॥ ૪૪॥

તામસસ્તુ મહારાજ બ્રહ્મવિષ્ણુશિવાદિષુ ।
ત્રિવિધસ્ત્રિષુ રાજેન્દ્ર કાજેશાદિષુ સર્વદા ॥ ૪૫॥

અહઙ્કારઃ સદા પ્રોક્તો મુનિભિસ્તત્ત્વદર્શિભિઃ ।
અહઙ્કારેણ તેનૈવ બદ્ધા એતે ન સંશયઃ ॥ ૪૬॥

માયાવિમોહિતા મન્દાઃ પ્રવદન્તિ મનીષિણઃ ।
કરોતિ સ્વેચ્છયા વિષ્ણુરવતારાનનેકશઃ ॥ ૪૭॥

મન્દોઽપિ દુઃખગહને ગર્ભવાસેઽતિસઙ્કટે ।
ન કરોતિ મતિં વિદ્વાન્કથં કુર્યાત્સ ચક્રભૃત્ ॥ ૪૮॥

કૌસલ્યાદેવકીગર્ભે વિષ્ઠામલસમાકુલે ।
સ્વેચ્છયા પ્રવદન્ત્યદ્ધા ગતો હિ મધુસૂદનઃ ॥ ૪૯॥

વૈકુણ્ઠસદનં ત્યક્ત્વા ગર્ભવાસે સુખં નુ કિમ્ ।
ચિન્તાકોટિસમુત્થાને દુઃખદે વિષસમ્મિતે ॥ ૫૦॥

તપસ્તપ્ત્વા ક્રતૂન્કૃત્વા દત્ત્વા દાનાન્યનેકશઃ ।
ન વાઞ્છન્તિ યતો લોકા ગર્ભવાસં સુદુઃખદમ્ ॥ ૫૧॥

સ કથં ભગવાન્વિષ્ણુઃ સ્વવશશ્ચેજ્જનાર્દનઃ ।
ગર્ભવાસરુચિર્ભૂયાદ્ભવેત્સ્વવશતા યદિ ॥ ૫૨॥

જાનીહિ ત્વં મહારાજ યોગમાયાવશે જગત્ ।
બ્રહ્માદિસ્તમ્બપર્યન્તં દેવમાનુષતિર્યગમ્ ॥ ૫૩॥

માયાતન્ત્રીનિબદ્ધા યે બ્રહ્મવિષ્ણુહરાદયઃ ।
ભ્રમન્તિ બન્ધમાયાન્તિ લીલયા ચોર્ણનાભવત્ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે યોગમાયાપ્રભાવવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૫.૧॥

## ૫.૨ દ્વિતીયોઽધ્યાયઃ । મહિષાસુરોત્પત્તિઃ ।

રાજોવાચ ।
યોગેશ્વર્યાઃ પ્રભાવોઽયં કથિતશ્ચાતિવિસ્તરાત્ ।
બ્રૂહિ તચ્ચરિતં સ્વામિઞ્છ્રોતું કૌતૂહલં મમ ॥ ૧॥

મહાદેવીપ્રભાવં વૈ શ્રોતું કો નાભિવાઞ્છતિ ।
યો જાનાતિ જગત્સર્વં તદુત્પન્નં ચરાચરમ્ ॥ ૨॥

વ્યાસ ઉવાચ ।

શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ વિસ્તરેણ મહામતે ।
શ્રદ્ધાનાય શાન્તાય ન બ્રૂયાત્સ તુ મન્દધીઃ ॥ ૩॥

પુરા યુદ્ધમભૂદ્ ઘોરં દેવદાનવસેનયોઃ ।
પૃથિવ્યાં પૃથિવીપાલ મહિષાખ્યે મહીપતૌ ॥ ૪॥

મહિષો નામ રાજેન્દ્ર ચકાર તપ ઉત્તમમ્ ।
ગત્વા હેમગિરૌ ચોગ્રં દેવવિસ્મયકારકમ્ ॥ ૫॥

વર્ષાણામયુતં પૂર્ણં ચિન્તયન્હૃદિ દેવતામ્ ।
તસ્ય તુષ્ટો મહારાજ બ્રહ્મા લોકપિતામહઃ ॥ ૬॥

તત્રાગત્યાબ્રવીદ્વાક્યં હંસારૂઢશ્ચતુર્મુખઃ ।
વરં વરય ધર્માત્મન્દદામિ તવ વાઞ્છિતમ્ ॥ ૭॥

મહિષ ઉવાચ ।
અમરત્વં દેવદેવ વાઞ્છામિ દ્રુહિણ પ્રભો ।
યથા મૃત્યુ ભયં ન સ્યાત્તથા કુરુ પિતામહ ॥ ૮॥

બ્રહ્મોવાચ ।
ઉત્પન્નસ્ય ધ્રુવં મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
સર્વથા મરણોત્પત્તી સર્વેષાં પ્રાણિનાં કિલ ॥ ૯॥

નાશઃ કાલેન સર્વેષાં પ્રાણિનાં દૈત્યપુઙ્ગવ ।
મહામહીધરાણાં ચ સમુદ્રાણાં ચ સર્વથા ॥ ૧૦॥

એકં સ્થાનં પરિત્યજ્ય મરણસ્ય મહીપતે ।
પ્રબ્રૂહિ તં વરં સાધો યસ્તે મનસિ વર્તતે ॥ ૧૧॥

મહિષ ઉવાચ ।
ન દેવાન્માનુષાદ્દૈત્યાન્મરણં મે પિતામહ ।
પુરુષાન્ન ચ મે મૃત્યુર્યોષા માં કા હનિષ્યતિ ॥ ૧૨॥

તસ્માન્મે મરણં નૂનં કામિન્યાઃ કુરુ પદ્મજ ।
અબલા હન્ત માં હન્તું કથં શક્તા ભવિષ્યતિ ॥ ૧૩॥

બ્રહ્મોવાચ ।
યદા કદાપિ દૈત્યેન્દ્ર નાર્યાસ્તે મરણં ધ્રુવમ્ ।
ન નરેભ્યો મહાભાગ મૃતિસ્તે મહિષાસુર ॥ ૧૪॥

વ્યાસ ઉવાચ ।
એવં દત્ત્વા વરં તસ્મૈ યયૌ બ્રહ્મા નિજાલયમ્ ।
સોઽપિ દૈત્યવરઃ પ્રાપ નિજં સ્થાનં મુદાન્વિતઃ ॥ ૧૫॥

રાજોવાચ ।
મહિષઃ કસ્ય પુત્રોઽસૌ કથં જાતો મહાબલી ।
કથં ચ માહિષં રૂપં પ્રાપ્તં તેન મહાત્મના ॥ ૧૬॥

વ્યાસ ઉવાચ ।
દનોઃ પુત્રૌ મહારાજ વિખ્યાતૌ ક્ષિતિમણ્ડલે ।
રમ્ભશ્ચૈવ કરમ્ભશ્ચ દ્વાવાસ્તાં દાનવોત્તમૌ ॥ ૧૭॥

તાવપુત્રૌ મહારાજ પુત્રાર્થં તેપતુસ્તપઃ ।
બહૂન્વર્ષગણાન્કામં પુણ્યે પઞ્ચનદે જલે ॥ ૧૮॥

કરમ્ભસ્તુ જલે મગ્નશ્ચકાર પરમં તપઃ ।
વૃક્ષં રસાલવટં પ્રાપ્ય રમ્ભોઽગ્નિમસેવત ॥ ૧૯॥

પઞ્ચાગ્નિસાધનાસક્તઃ સ રમ્ભસ્તુ યદાભવત્ ।
જ્ઞાત્વા શચીપતિર્દુઃખમુદ્યયૌ દાનવૌ પ્રતિ ॥ ૨૦॥

ગત્વા પઞ્ચનદે તત્ર ગ્રાહરૂપં ચકાર હ ।
વાસવસ્તુ કરમ્ભં તં તદા જગ્રાહ પાદયોઃ ॥ ૨૧॥

નિજઘાન ચ તં દુષ્ટં કરમ્ભં વૃત્રસૂદનઃ ।
ભ્રાતરં નિહતં શ્રુત્વા રમ્ભઃ કોપં પરં ગતઃ ॥ ૨૨॥

સ્વશીર્ષં પાવકે હોતુમૈચ્છચ્છિત્ત્વા કરેણ હ ।
કેશપાશે ગહીત્વાશુ વામેન ક્રોધસંયુતઃ ॥ ૨૩॥

દક્ષિણેન કરેણોગ્રં ગૃહીત્વા ખડ્ગમુત્તમમ્ ।
છિનત્તિ શીર્ષં તત્તાવદ્વહ્નિના પ્રતિબોધિતઃ ॥ ૨૪॥

ઉક્તશ્ચ દૈત્ય મૂર્ખોઽસિ સ્વશીર્ષં છેત્તુમિચ્છસિ ।
આત્મહત્યાતિદુઃસાધ્યા કથં ત્વં કર્તુમુદ્યતઃ ॥ ૨૫॥

વરં વરય ભદ્રં તે યસ્તે મનસિ વર્તતે ।
મા મ્રિયસ્વ મૃતેનાદ્ય કિં તે કાર્યં ભવિષ્યતિ ॥ ૨૬॥

વ્યાસ ઉવાચ ।

તચ્છ્રુત્વા વચનં રમ્ભઃ પાવકસ્ય સુભાષિતમ્ ।
તતોઽબ્રવીદ્ધયો રમ્ભસ્ત્યક્ત્વા કેશકલાપકમ્ ॥ ૨૭॥

યદિ તુષ્ટોઽસિ દેવેશ દેહિ મે વાઞ્છિતં વરમ્ ।
ત્રૈલોક્યવિજયી પુત્રઃ સ્યાન્નઃ પરબલાર્દનઃ ॥ ૨૮॥

અજેયઃ સર્વથા સ સ્યાદ્દેવદાનવમાનવૈઃ ।
કામરૂપી મહાવીર્યઃ સર્વલોકાભિવન્દિતઃ ॥ ૨૯॥

પાવકસ્તં તથેત્યાહ ભવિષ્યતિ તવેપ્સિતમ્ ।
પુત્રસ્તવ મહાભાગ મરણાદ્વિરમાધુના ॥ ૩૦॥

યસ્યાં ચિત્તં તુ રમ્ભ ત્વં પ્રમદાયાં કરિષ્યસિ ।
તસ્યાં પુત્રો મહાભાગ ભવિષ્યતિ બલાધિકઃ ॥ ૩૧॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તો વહ્નિના રમ્ભો વચનં ચિત્તરઞ્જનમ્ ।
શ્રુત્વા પ્રણમ્ય પ્રયયૌ વહ્નિં તં દાનવોત્તમઃ ॥ ૩૨॥

યક્ષૈઃ પરિવૃતં સ્થાનં રમણીયં શ્રિયાન્વિતમ્ ।
દૃષ્ટ્વા ચક્રે તદા ભાવં મહિષ્યાં દાનવોત્તમઃ ॥ ૩૩॥

મત્તાયાં રૂપપૂર્ણાયાં વિહાયાન્યાઞ્ચ યોષિતમ્ ।
સા સમાગાચ્ચ તરસા કામયન્તી મુદાન્વિતા ॥ ૩૪॥

રમ્ભોઽપિ ગમનં ચક્રે ભવિતવ્યપ્રણોદિતઃ ।
સા તુ ગર્ભવતી જાતા મહિષી તસ્ય વીર્યતઃ ॥ ૩૫॥

તાં ગૃહીત્વાથ પાતાલં પ્રવિવેશ મનોહરમ્ ।
મહિષેભ્યશ્ચ તાં રક્ષન્પ્રિયામનુમતાં કિલ ॥ ૩૬॥

કદાચિન્મહિષશ્ચાન્યઃ કામાર્તસ્તામુપાદ્રવત્ ।
સ્વયમાગત્ય તં હન્તું દાનવઃ સમુપાદ્રવત્ ॥ ૩૭॥

સ્વરક્ષાર્થં સમાગત્ય મહિષં સમતાડયત્ ।
સોઽપિ તં નિજઘાનાશુ શૃઙ્ગાભ્યાં કામમોહિતઃ ॥ ૩૮॥

તાડિતસ્તેન તીક્ષ્ણાભ્યાં શૃઙ્ગાભ્યાં હૃદયે ભૃશમ્ ।
ભૂમૌ પપાત તરસા મમાર ચ વિમૂર્ચ્છિતઃ ॥ ૩૯॥

મૃતે ભર્તરિ સા દીના ભયાર્તા વિદ્રુતા ભૃશમ્ ।

સા વેગાત્તં વટં પ્રાપ્ય યક્ષાણાં શરણં ગતા ॥ ૪૦॥

પૃષ્ઠતસ્તુ ગતસ્તત્ર મહિષઃ કામપીડિતઃ ।
કામયાનસ્તુ તાં કામી બલવીર્યમદોદ્ધતઃ ॥ ૪૧॥

રુદતી સા ભૃશં દીના દૃષ્ટ્વા યક્ષૈર્ભયાતુરા ।
ધાવમાનં ચ તં વીક્ષ્ય યક્ષાસ્ત્રાતું સમાયયુઃ ॥ ૪૨॥

યુદ્ધં સમભવદ્ ઘોરં યક્ષાણાં ચ હયારિણા ।
શરેણ તાડિતસ્તૂર્ણં પપાત ધરણીતલે ॥ ૪૩॥

મૃતં રમ્ભં સમાનીય યક્ષાસ્તે પરમં પ્રિયમ્ ।
ચિતાયાં રોપયામાસુસ્તસ્ય દેહસ્ય શુદ્ધયે ॥ ૪૪॥

મહિષી સા પતિં દૃષ્ટ્વા ચિતાયાં રોપિતં તદા ।
પ્રવેષ્ટું સા મતિં ચક્રે પતિના સહ પાવકમ્ ॥ ૪૫॥

વાર્યમાણાપિ યક્ષૈઃ સા પ્રવિવેશ હુતાશનમ્ ।
જ્વાલામાલાકુલં સાધ્વી પતિમાદાય વલ્લભમ્ ॥ ૪૬॥

મહિષસ્તુ ચિતામધ્યાત્સમુત્તસ્થૌ મહાબલઃ ।
રમ્ભોઽપ્યન્યદ્વપુઃ કૃત્વા નિઃસૃતઃ પુત્રવત્સલઃ ॥ ૪૭॥

રક્તબીજોઽપ્યસૌ જાતો મહિષોઽપિ મહાબલઃ ।
અભિષિક્તસ્તુ રાજ્યેઽસૌ હયારિરસુરોત્તમૈઃ ॥ ૪૮॥

એવં સ મહિષો જાતો રક્તબીજશ્ચ વીર્યવાન્ ।
અવધ્યસ્તુ સુરૈર્દૈત્યૈર્માનવૈશ્ચ નૃપોત્તમ ॥ ૪૯॥

ઇત્યેતત્કથિતં રાજન્ જન્મ તસ્ય મહાત્મનઃ ।
વરપ્રદાનઞ્ચ તથા પ્રોક્તં સર્વં સવિસ્તરમ્ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે મહિષાસુરોત્પત્તિર્નામ દ્વિતીયોઽધ્યાયઃ ॥ ૫.૨॥

## ૫.૩ તૃતીયોઽધ્યાયઃ । ભગવતીમાહાત્મ્યે દૈત્યસૈન્યાદ્યોગઃ ।

વ્યાસ ઉવાચ ।
એવં સ મહિષો નામ દાનવો વરદર્પિતઃ ।
પ્રાપ્ય રાજ્યં જગત્સર્વં વશે ચક્રે મહાબલઃ ॥ ૧॥

પૃથિવીં પાલયામાસ સાગરાન્તાં ભુજાર્જિતામ્ ।
એકચ્છત્રાં નિરાતઙ્કાં વૈરિવર્ગવિવર્જિતામ્ ॥ ૨॥

સેનાનીશ્ચિક્ષુરસ્તસ્ય મહાવીર્યો મદોત્કટઃ ।
ધનાધ્યક્ષસ્તથા તામ્રઃ સેનાયુતસમાવૃતઃ ॥ ૩॥

અસિલોમા તથોદર્કો બિડાલાખ્યશ્ચ બાષ્કલઃ ।
ત્રિનેત્રોઽથ તથા કાલબન્ધકો બલદર્પિતઃ ॥ ૪॥

એતે સૈન્યયુતાઃ સર્વે દાનવા મેદિનીં તદા ।
આવૃત્ય સંસ્થિતાઃ કામમૃદ્ધાં સાગરમેખલામ્ ॥ ૫॥

કરદાશ્ચ કૃતાઃ સર્વે ભૂમિપાલાઃ પુરાતનાઃ ।
નિહતા યે બલોદગ્રાઃ ક્ષાત્રધર્મવ્યવસ્થિતાઃ ॥ ૬॥

બ્રાહ્મણા વશગા જાતા યજ્ઞભાગસમર્પકાઃ ।
મહિષસ્ય મહારાજ નિખિલે ક્ષિતિમણ્ડલે ॥ ૭॥

એકાતપત્રં તદ્રાજ્યં કૃત્વા સ મહિષાસુરઃ ।
સ્વર્ગં જેતું મનશ્ચક્રે વરદાનેન ગર્વિતઃ ॥ ૮॥

પ્રણિધિં પ્રેષયામાસ હયારિસ્તુ શચીપતિમ્ ।
સ સન્દેશહરં શીઘ્રમાહૂયોવાચ દૈત્યરાટ્ ॥ ૯॥

ગચ્છ વીર મહાબાહો દૂતત્વં કુરુ મેઽનઘ ।
બ્રૂહિ શક્રં દિવં ગત્વા નિઃશઙ્કઃ સુરસન્નિધૌ ॥ ૧૦॥

મુઞ્ચ સ્વર્ગં સહસ્રાક્ષ યથેષ્ટં ગચ્છ મા ચિરમ્ ।
સેવાં વા કુરુ દેવેશ મહિષસ્ય મહાત્મનઃ ॥ ૧૧॥

સ ત્વાં સંરક્ષયેન્નૂનં રાજા શરણમાગતમ્ ।
તસ્માત્ત્વં શરણં યાહિ મહિષસ્ય શચીપતે ॥ ૧૨॥

નોચેદ્વજ્રં ગહાણાશુ યુદ્ધાય બલસૂદન ।
પૂર્વૈર્જિતોઽસિ ચાસ્માકં જાનામિ તવ પૌરુષમ્ ॥ ૧૩॥

અહલ્યાજાર વિજ્ઞાતં બલં તે સુરસઙ્ઘપ ।
યુધ્યસ્વ વ્રજ વા કામં યત્ર તે રમતે મનઃ ॥ ૧૪॥

વ્યાસ ઉવાચ ।

તચ્છ્રુત્વા વચનં તસ્ય શક્રઃ ક્રોધસમન્વિતઃ ।
ઉવાચ તં નૃપશ્રેષ્ઠ સ્મિતપૂર્વં વચસ્તદા ॥ ૧૫॥

ન જાનેઽહં સુમન્દાત્મન્ યતસ્ત્વં મદદર્પિતઃ ।
ચિકિત્સાં સઙ્કુરિષ્યામિ રોગસ્યાસ્ય પ્રભોસ્તવ ॥ ૧૬॥

અતઃ પરં કરિષ્યામિ મૂલસ્યાસ્ય નિમૂલનમ્ ।
ગચ્છ દૂત તથા બ્રૂહિ તસ્યાગ્રે મમ ભાષિતમ્ ॥ ૧૭॥

શિષ્ટૈર્દૂતા ન હન્તવ્યાસ્તસ્માત્ત્વાં વિસૃજામ્યહમ્ ।
યુદ્ધેચ્છા ચેત્સમાગચ્છ ત્વરિતો મહિષીસુત ॥ ૧૮॥

હયારે ત્વદ્બલં જ્ઞાતં તૃણાદસ્ત્વં જડાકૃતિઃ ।
શ‍ૃઙ્ગયોસ્તે કરિષ્યામિ સુદૃઢં ચ શરાસનમ્ ॥ ૧૯॥

દર્પઃ શ‍ૃઙ્ગબલાત્તેઽસ્તિ વિદિતં કારણં મયા ।
વિષાણે તે પરિચ્છિદ્ય સંહરિષ્યામિ તદ્ બલમ્ ॥ ૨૦॥

યદ્ બલેનાતિપૂર્ણસ્ત્વં જાતોઽસિ બલદર્પિતઃ ।
કુશલસ્ત્વં તદાઘાતે ન યુદ્ધે મહિષાધમ ॥ ૨૧॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તોઽસૌ સુરેન્દ્રેણ સ દૂતસ્ત્વરિતો ગતઃ ।
જગામ મહિષં મત્તં પ્રણમ્ય પ્રત્યુવાચ હ ॥ ૨૨॥

દૂત ઉવાચ ।
રાજન્દેવાધિપઃ કામં ન ત્વાં વિગણયત્યસૌ ।
મન્યતે સ્વબલં પૂર્ણં દેવસૈન્યસમાવૃતઃ ॥ ૨૩॥

યદુક્તં તેન મૂર્ખેણ કથમન્યદ્ બ્રવીમ્યહમ્ ।
પ્રિયં સત્યં ચ વક્તવ્યં ભૃત્યેન પુરતઃ પ્રભોઃ ॥ ૨૪॥

પ્રિયં સત્યં ચ વક્તવ્યં પ્રભોરગ્રે શુભેચ્છુના ।
ઇતિ નીતિર્મહારાજ જાગર્તિ શુભકારિણી ॥ ૨૫॥

કેવલં ચેત્પ્રિયં બ્રૂયાન્ન તે કાર્યં ભવિષ્યતિ ।
પરુષં ચ ન વક્તવ્યં કદાચિચ્છુભમિચ્છતા ॥ ૨૬
યથા રિપુમુખાદ્વાચઃ પ્રસરન્તિ વિષોપમાઃ ।
તથા ભૃત્યમુખાન્નાથ નિઃસરન્તિ કથં ગિરઃ ॥ ૨૭॥

યાદૃશાનીહ વાક્યાનિ તેનોક્તાનિ મહીપતે ।
તાદૃશાનિ ન મે જિહ્વા વક્તુમર્હતિ કર્હિચિત્ ॥ ૨૮॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય હેતુગર્ભં તૃણાશનઃ ।
ભૃશં કોપપરીતાત્મા બભૂવ મહિષાસુરઃ ॥ ૨૯॥

સમાહૂયાબ્રવીદ્દૈત્યાન્ક્રોધસંરક્તલોચનઃ ।
લાઙ્ગૂલં પૃષ્ઠદેશે ચ કૃત્વા મૂત્રં પરિત્યજન્ ॥ ૩૦॥

ભો ભો દૈત્યાઃ સુરેન્દ્રોઽસૌ યુદ્ધકામોઽસ્તિ સર્વથા ।
બલોદ્યોગં કુરુધ્વં વૈ જેતવ્યોઽસૌ સુરાધમઃ ॥ ૩૧॥

મદગ્રે કો ભવેચ્છૂરઃ કોટિશશ્ચેત્તથાવિધાઃ ।
ન બિભેમ્યેકતઃ કામં હનિષ્યામ્યદ્ય સર્વથા ॥ ૩૨॥

શરઃ શાન્તેષ્વસૌ નૂનં તપસ્વિષુ બલાધિકઃ ।
બલકર્તા હિ કુહકો લમ્પટઃ પરદારહૃત્ ॥ ૩૩॥

અપ્સરોબલસમ્મત્તસ્તપોવિઘ્નકરઃ ખલઃ ।
છિદ્રપ્રહરણઃ પાપો નિત્યં વિશ્વાસઘાતકઃ ॥ ૩૪॥

નમુચિર્નિહતો યેન કૃત્વા સન્ધિં દુરાત્મના ।
શપથાન્વિવિધાનાદૌ કૃત્વા ભીતેન છદ્મના ॥ ૩૫॥

વિષ્ણુસ્તુ કપટાચાર્યઃ કુહકઃ શપથાકરઃ ।
નાનારૂપધરઃ કામં બલકૃદ્દમ્ભપણ્ડિતઃ ॥ ૩૬॥

કૃત્વા કોલાકૃતિં યેન હિરણ્યાક્ષો નિપાતિતઃ ।
હિરણ્યકશિપુર્યેન નૃસિંહેન ચ ઘાતિતઃ ॥ ૩૭॥

નાહં તદ્વશગો નૂનં ભવેયં દનુનન્દનાઃ ।
વિશ્વાસં નૈવ ગચ્છામિ દેવાનાં કુત્ર કર્હિચિત્ ॥ ૩૮॥

કિં કરિષ્યતિ મે વિષ્ણુરિન્દ્રો વા બલવત્તરઃ ।
રુદ્રો વાપિ ન મે શક્તઃ પ્રતિકર્તું રણાઙ્ગણે ॥ ૩૯॥

ત્રિવિષ્ટપં ગ્રહીષ્યામિ જિત્વેન્દ્રં વરુણં યમમ્ ।
ધનદં પાવકં ચૈવ ચન્દ્રસૂર્યૌ વિજિત્ય ચ ॥ ૪૦॥

યજ્ઞભાગભુજઃ સર્વે ભવિષ્યામોઽદ્ય સોમપાઃ ।

જિત્વા દેવસમૂહઞ્ચ વિહરિષ્યામિ દાનવૈઃ ॥ ૪૧॥

ન મે ભયં સુરેભ્યશ્ચ વરદાનેન દાનવાઃ ।
મરણં ન નરેભ્યશ્ચ નારી કિં મે કરિષ્યતિ ॥ ૪૨॥

પાતાલપર્વતેભ્યશ્ચ સમાહૂય વરાન્વરાન્ ।
દાનવાન્મમ સૈન્યેશાન્કુર્વન્તુ ત્વરિતાશ્ચરાઃ ॥ ૪૩॥

એકોઽહં સર્વદેવેશાન્વિજેતું દાનવાઃ ક્ષમઃ ।
શોભાર્થં વઃ સમાહૂય નયામિ સુરસઙ્ગમે ॥ ૪૪॥

શૃઙ્ગાભ્યાં ચ ખુરાભ્યાં ચ હનિષ્યેઽહં સુરાન્કિલ ।
ન મે ભયં સુરેભ્યશ્ચ વરદાનપ્રભાવતઃ ॥ ૪૫॥

અવધ્યોઽહં સુરગણૈરસુરૈર્માનવૈસ્તથા ।
તસ્માત્સજ્જા ભવન્ત્વદ્ય દેવલોકજયાય વૈ ॥ ૪૬॥

જિત્વા સુરાલયં દૈત્યા વિહરિષ્યામિ નન્દને ।
મન્દારકુસુમાપીડા દેવયોષિત્સમન્વિતાઃ ॥ ૪૭॥

કામધેનુપયોત્સિક્તાઃ સુધાપાનપ્રમોદિતાઃ ।
દેવગન્ધર્વગીતાદિનૃત્યલાસ્યસમન્વિતાઃ ॥ ૪૮॥

ઉર્વશી મેનકા રમ્ભા ઘૃતાચી ચ તિલોત્તમા ।
પ્રમદ્વરા મહાસેના મિશ્રકેશી મદોત્કટા ॥ ૪૯॥

વિપ્રચિત્તિપ્રભૃતયો નૃત્યગીતવિશારદાઃ ।
રઞ્જયિષ્યન્તિ વઃ સર્વાન્નાનાસવનિષેવણૈઃ ॥ ૫૦॥

સર્વે સજ્જા ભવન્ત્વદ્ય રોચતાં ગમનં દિવિ ।
સઙ્ગ્રામાર્થં સુરૈઃ સાર્ધં કૃત્વા મઙ્ગલમુત્તમમ્ ॥ ૫૧॥

રક્ષણાર્થં ચ સર્વેષાં ભાર્ગવં મુનિસત્તમમ્ ।
સમાહૂય ચ સમ્પૂજ્ય સ્થાપ્ય યજ્ઞે ગુરું પરમ્ ॥ ૫૨॥

વ્યાસ ઉવાચ ।
ઇતિ સન્દિશ્ય દૈત્યેન્દ્રાન્મહિષઃ પાપધીસ્તદા ।
જગામ ત્વરિતો રાજન્ભવનં સ્વં મુદાન્વિતઃ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે ભગવતીમાહાત્મ્યે દૈત્યસૈન્યોદ્યોગો નામ તૃતીયોઽધ્યાયઃ ॥ ૫.૩॥

## ૫.૪ ચતુર્થોઽધ્યાયઃ । ભયાતુરેન્દ્રાદિદેવૈઃ સુરગુરુણા સહ પરામર્શવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ગતે દૂતે સુરેન્દ્રોઽપિ સમાહૂય સુરાનથ ।
યમવાયુધનાધ્યક્ષવરુણાનિદમૂચિવાન્ ॥ ૧॥

મહિષો નામ દૈત્યેન્દ્રો રમ્ભપુત્રો મહાબલઃ ।
વરદર્પમદોન્મત્તો માયાશતવિચક્ષણઃ ॥ ૨॥

તસ્ય દૂતોઽથ સમ્પ્રાપ્તઃ પ્રેષિતસ્તેન ભોઃ સુરાઃ ।
સ્વર્ગકામેન લુબ્ધેન મામુવાચેદૃશં વચઃ ॥ ૩॥

ત્યજ દેવાલયં શક્ર યથેચ્છં વ્રજ વાસવ ।
સેવાં વા કુરુ દૈત્યસ્ય મહિષસ્ય મહાત્મનઃ ॥ ૪॥

દયાવાન્દાનવેન્દ્રોઽસૌ સ તે વૃત્તિં વિધાસ્યતિ ।
નતેષુ ભૃત્યભૂતેષુ ન કુપ્યતિ કદાચન ॥ ૫॥

નોચેદ્યુદ્ધાય દેવેશ સેનોદ્યોગં કુરુ સ્વયમ્ ।
ગતે મયિ સ દૈત્યેન્દ્રસ્ત્વરિતઃ સમુપેષ્યતિ ॥ ૬॥

ઇત્યુક્ત્વા સ ગતો દૂતો દાનવસ્ય દુરાત્મનઃ ।
કિં કર્તવ્યમતઃ કાર્યં ચિન્તયધ્વં સુરોત્તમાઃ ॥ ૭॥

દુર્બલોઽપિ ન ચોપેક્ષ્યઃ શત્રુર્બલવતા સુરાઃ ।
વિશેષેણ સદોદ્યોગી બલવાન્બલદર્પિતઃ ॥ ૮॥

ઉદ્યમઃ કિલ કર્તવ્યો યથાબુદ્ધિ યથાબલમ્ ।
દૈવાધીનો ભવેન્નૂનં જયો વાથ પરાજયઃ ॥ ૯॥

સન્ધિયોગો ન ચાત્રાસ્તિ ખલે સન્ધિર્નિરર્થકઃ ।
સર્વથા સાધુભિઃ કાર્યં વિચાર્ય ચ પુનઃ પુનઃ ॥ ૧૦॥

યાનમપ્યધુના નૈવ કર્તવ્યં સહસા પુનઃ ।
પ્રેક્ષકાઃ પ્રેષણીયાશ્ચ શીઘ્રગાઃ સુપ્રવેશકાઃ ॥ ૧૧॥

ઇઙ્ગિતજ્ઞાશ્ચ નિઃસઙ્ગા નિઃસ્પૃહાઃ સત્યવાદિનઃ ।
સેનાભિયોગં પ્રસ્થાનં બલસઙ્ખ્યાં યથાર્થતઃ ॥ ૧૨॥

વીરાણાં ચ પરિજ્ઞાનં કૃત્વાયાન્તુ ત્વરાન્વિતાઃ ।
જ્ઞાત્વા દૈત્યપતેસ્તસ્ય સૈન્યસ્ય ચ બલાબલમ્ ॥ ૧૩॥

કરિષ્યામિ તતસ્તૂર્ણં યાનં વા દુર્ગસઙ્ગ્રહમ્ ।
વિચાર્ય ખલુ કર્તવ્યં કાર્યં બુદ્ધિમતા સદા ।
સહસા વિહિતં કાર્યં દુઃખદં સર્વથા ભવેત્ ॥ ૧૪॥

તસ્માદ્વિમૃશ્ય કર્તવ્યં સુખદં સર્વથા બુધૈઃ ।
નાત્ર ભેદવિધિર્ન્યાય્યો દાનવેષુ ચ સર્વથા ॥ ૧૫॥

એકચિત્તેષુ કાર્યેઽસ્મિંસ્તસ્માચ્ચારા વ્રજન્તુ વૈ ।
જ્ઞાત્વા બલાબલં તેષાં પશ્ચાન્નીતિર્વિચાર્ય ચ ॥ ૧૬॥

વિધેયા વિધિવત્તજ્જ્ઞૈસ્તેષુ કાર્યપરેષુ ચ ।
અન્યથા વિહિતં કાર્યં વિપરીતફલપ્રદમ્ ॥ ૧૭॥

સર્વથા તદ્ભવેન્નૂનમજ્ઞાતમૌષધં યથા ।
વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય તૈઃ સર્વૈઃ પ્રણિધિં કાર્યવેદિનમ્ ॥ ૧૮॥

પ્રેષયામાસ દેવેન્દ્રઃ પરિજ્ઞાનાય પાર્થિવ ।
દૂતસ્તુ ત્વરિતો ગત્વા સમાગમ્ય સુરાધિપમ્ ॥ ૧૯॥

નિવેદયામાસ તદા સર્વસૈન્યબલાબલમ્ ।
જ્ઞાત્વા તદ્બલમુદ્યોગં તુરાષાડતિવિસ્મિતઃ ॥ ૨૦॥

દેવાનચોદયત્તૂર્ણં સમાહૂય પુરોહિતમ્ ।
મન્ત્રં મન્ત્રવિદાં શ્રેષ્ઠં ચકાર ત્રિદશેશ્વરઃ ॥ ૨૧॥

ઉવાચાઙ્ગિરસશ્રેષ્ઠં સમાસીનં વરાસને ।
ઇન્દ્ર ઉવાચ ।
ભો ભો દેવગુરો વિદ્વન્કિં કર્તવ્યં વદસ્વ નઃ ॥ ૨૨॥

સર્વજ્ઞોઽસિ સમુત્પન્ને કાર્યે ત્વં ગતિરદ્ય નઃ ।
દાનવો મહિષો નામ મહાવીર્યો મદાન્વિતઃ ॥ ૨૩॥

યોદ્ધુકામઃ સમાયાતિ બહુભિર્દાનવૈર્વૃતઃ ।
તત્ર પ્રતિક્રિયા કાર્યા ત્વયા મન્ત્રવિદાધુના ॥ ૨૪॥

તેષાં શુક્રસ્તથા ત્વં મે વિઘ્નહર્તા સુસંયતઃ ।

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં પ્રાહ તુરાસાહં બૃહસ્પતિઃ ॥ ૨૫॥

વિચિન્ત્ય મનસા કામં કાર્યસાધનતત્પરઃ ।
ગુરુરુવાચ ।
સ્વસ્થો ભવ સુરેન્દ્ર ત્વં ધૈર્યમાલમ્બ્ય મારિષ ॥ ૨૬॥

વ્યસને ચ સમુત્પન્ને ન ત્યાજ્યં ધૈર્યમાશુ વૈ ।
જયાજયૌ સુરાધ્યક્ષ દૈવાધીનૌ સદૈવ હિ ॥ ૨૭॥

સ્થાતવ્યં ધૈર્યમાલમ્બ્ય તસ્માદ્ બુદ્ધિમતા સદા ।
ભવિતવ્યં ભવત્યેવ જાનન્નેવ શતક્રતો ॥ ૨૮॥

ઉદ્યમઃ સર્વથા કાર્યો યથાપૌરુષમાત્મનઃ ।
મુનયોઽપિ હિ મુક્ત્યર્થમુદ્યમૈકરતાઃ સદા ॥ ૨૯॥

દૈવાધીનં ચ જાનન્તો યોગધ્યાનપરાયણાઃ ।
તસ્માત્સદૈવ કર્તવ્યો વ્યવહારોદિતોદ્યમઃ ॥ ૩૦॥

સુખં ભવતુ વા મા વા દૈવે કા પરિદેવના ।
વિના પુરુષકારેણ કદાચિત્સિદ્ધિમાપ્નુયાત્ ॥ ૩૧॥

અન્ધવત્પઙ્ગુવત્કામં ન તથા મુદમાવહેત્ ।
કૃતે પુરુષકારેઽપિ યદિ સિદ્ધિર્ન જાયતે ॥ ૩૨॥

ન તત્ર દૂષણં તસ્ય દૈવાધીને શરીરિણિ ।
કાર્યસિદ્ધિર્ન સૈન્યેઽસ્તિ ન મન્ત્રે ન ચ મન્ત્રણે ॥ ૩૩॥

ન રથે નાયુધે નૂનં દૈવાધીના સુરાધિપ ।
બલવાઙ્ક્લેશમાપ્નોતિ નિર્બલઃ સુખમશ્નુતે ॥ ૩૪॥

બુદ્ધિમાન્ક્ષુધિતઃ શેતે નિર્બુદ્ધિર્ભોગવાન્ભવેત્ ।
કાતરો જયમાપ્નોતિ શૂરો યાતિ પરાજયમ્ ॥ ૩૫॥

દૈવાધીને તુ સંસારે કામં કા પરિદેવના ।
ઉદ્યમે યોજયેન્નૂનં ભવિતવ્યં સુરાધિપ ॥ ૩૬॥

દુઃખદે સુખદે વાપિ તત્ર તૌ ન વિચિન્તયેત્ ।
દુઃખે દુઃખાધિકાન્પશ્યેત્સુખે પશ્યેત્સુખાધિકમ્ ॥ ૩૭॥

આત્માનં હર્ષશોકાભ્યાં શત્રુભ્યામિવ નાર્પયેત્ ।

ધૈર્યમેવાવગન્તવ્યં હર્ષશોકોદ્ભવે બુધૈઃ ॥ ૩૮॥

અધૈર્યાદ્યાદૃશં દુઃખં ન તુ ધૈર્યેઽસ્તિ તાદૃશમ્ ।
દુર્લભં સહનત્વં વૈ સમયે સુખદુઃખયોઃ ॥ ૩૯॥

હર્ષશોકોદ્ભવો યત્ર ન ભવેદ્ બુદ્ધિનિશ્ચયાત્ ।
કિં દુઃખં કસ્ય વા દુઃખં નિર્ગુણોઽહં સદાવ્યયઃ ॥ ૪૦॥

ચતુર્વિંશાતિરિક્તોઽસ્મિ કિં મે દુઃખં સુખં ચ કિમ્ ।
પ્રાણસ્ય ક્ષુત્પિપાસે દ્વે મનસઃ શોકમૂર્છને ॥ ૪૧॥

જરામૃત્યૂ શરીરસ્ય ષડૂર્મિરહિતઃ શિવઃ ।
શોકમોહૌ શરીરસ્ય ગણૌ કિં મેઽત્ર ચિન્તને ॥ ૪૨॥

શરીરં નાહમથવા તત્સમ્બન્ધી ન ચાપ્યહમ્ ।
સપ્તૈકષોડશાદિભ્યો વિભિન્નોઽહં સદા સુખી ॥ ૪૩॥

પ્રકૃતિર્વિકૃતિર્નાહં કિં મે દુઃખં સદા પુનઃ ।
ઇતિ મત્વા સુરેશ ત્વં મનસા ભવ નિર્મમઃ ॥ ૪૪॥

ઉપાયઃ પ્રથમોઽયં તે દુઃખનાશે શતક્રતો ।
મમતા પરમં દુઃખં નિર્મમત્વં પરં સુખમ્ ॥ ૪૫॥

સન્તોષાદપરં નાસ્તિ સુખસ્થાનં શચીપતે ।
અથવા યદિ ન જ્ઞાનં મમત્વનાશને કિલ ॥ ૪૬॥

તતો વિવેકઃ કર્તવ્યો ભવિતવ્યે સુરાધિપ ।
પ્રારબ્ધકર્મણાં નાશો નાભોગાલ્લક્ષ્યતે કિલ ॥ ૪૭॥

યદ્ભાવિ તદ્ભવત્યેવ કા ચિન્તા સુખદુઃખયોઃ ।
સુરૈઃ સર્વૈઃ સહાયૈર્વા બુદ્ધ્યા વા તવ સત્તમ ॥ ૪૮॥

સુખં ક્ષયાય પુણ્યસ્ય દુઃખં પાપસ્ય મારિષ ।
તસ્માત્સુખક્ષયે હર્ષઃ કર્તવ્યઃ સર્વથા બુધૈઃ ॥ ૪૯॥

અથવા મન્ત્રયિત્વાદ્ય કુરુ યત્નં યથાવિધિ ।
કૃતે યત્ને મહારાજ ભવિતવ્યં ભવિષ્યતિ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે ભયાતુરેન્દ્રાદિદેવૈઃ સુરગુરુણા સહ
પરામર્શવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૫.૪॥

## ૫.૫ પઞ્ચમોઽધ્યાયઃ । દૈત્યસૈન્યપરાજયઃ ।

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા સહસ્રાક્ષઃ પુનરાહ બૃહસ્પતિમ્ ।
યુદ્ધોદ્યોગં કરિષ્યામિ હયારેર્નાશનાય વૈ ॥ ૧॥

નોદ્યમેન વિના રાજ્યં ન સુખં ન ચ વૈ યશઃ ।
નિરુદ્યમં ન શંસન્તિ કાતરા ન ચ સોદ્યમાઃ ॥ ૨॥

યતીનાં ભૂષણં જ્ઞાનં સન્તોષો હિ દ્વિજન્મનામ્ ।
ઉદ્યમઃ શત્રુહનનં ભૂષણં ભૂતિમિચ્છતામ્ ॥ ૩॥

ઉદ્યમેન હતસ્ત્વાષ્ટ્રો નમુચિર્બલ એવ ચ ।
તથૈનં નિહનિષ્યામિ મહિષં મુનિસત્તમ ॥ ૪॥

બલં દેવગુરુસ્ત્વં મે વજ્રમાયુધમુત્તમમ્ ।
સહાયસ્તુ હરિર્નૂનં તથોમાપતિરવ્યયઃ ॥ ૫॥

રક્ષોઘ્નાન્પઠ મે સાધો કરોમ્યદ્ય સમુદ્યમમ્ ।
સ્વસૈન્યાભિનિવેશઞ્ચ મહિષં પ્રતિ માનદ ॥ ૬॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તો દેવરાજેન વાચસ્પતિરુવાચ હ ।
સુરેન્દ્રં યુદ્ધસંરક્તં સ્મિતપૂર્વં વચસ્તદા ॥ ૭॥

બૃહસ્પતિરુવાચ ।
પ્રેરયામિ ન ચાહં ત્વાં ન ચ નિર્વારયામ્યહમ્ ।
સન્દિગ્ધેઽત્ર જયે કામં યુધ્યતશ્ચ પરાજયે ॥ ૮॥

ન તેઽત્ર દૂષણં કિઞ્ચિદ્ભવિતવ્યે શચીપતે ।
સુખં વા યદિ વા દુઃખં વિહિતં ચ ભવિષ્યતિ ॥ ૯॥

ન મયા તત્પરિજ્ઞાતં ભાવિ દુઃખં સુખં તથા ।
યદ્ભાર્યાહરણે પ્રાપ્તં પુરા વાસવ વેત્સિ હિ ॥ ૧૦॥

શશિના મે હૃતા ભાર્યા મિત્રેણામિત્રકર્શન ।
સ્વાશ્રમસ્થેન સમ્પ્રાપ્તં દુઃખં સર્વસુખાપહમ્ ॥ ૧૧॥

બુદ્ધિમાન્સર્વલોકેષુ વિદિતોઽહં સુરાધિપ ।
ક્વ મે ગતા તદા વુદ્ધિર્યદા ભાર્યા હૃતા બલાત્ ॥ ૧૨॥

તસ્માદુપાયઃ કર્તવ્યો બુદ્ધિમદ્ભિઃ સદા નરૈઃ ।
કાર્યસિદ્ધિઃ સદા નૂનં દૈવાધીના સુરાધિપ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં સત્યં ગુરોઃ સાર્થં શચીપતિઃ ।
બ્રહ્માણં શરણં ગત્વા નત્વા વચનમબ્રવીત્ ॥ ૧૪॥

પિતામહ સુરાધ્યક્ષ દૈત્યો મહિષસંજ્ઞકઃ ।
ગ્રહીતુકામઃ સ્વર્ગં મે બલોદ્યોગં કરોત્યલમ્ ॥ ૧૫॥

અન્યે ચ દાનવાઃ સર્વે તત્સૈન્યં સમુપસ્થિતાઃ ।
યોદ્ધુકામા મહાવીર્યાઃ સર્વે યુદ્ધવિશારદાઃ ॥ ૧૬॥

તેનાહં ભીતભીતોઽસ્મિ ત્વત્સકાશમિહાગતઃ ।
સર્વજ્ઞોઽસિ મહાપ્રાજ્ઞ સાહાય્યં કર્તુમર્હસિ ॥ ૧૭॥

બ્રહ્મોવાચ ।
ગચ્છામઃ સર્વ એવાદ્ય કૈલાસં ત્વરિતા વયમ્ ।
શઙ્કરં પુરતઃ કૃત્વા વિષ્ણું ચ બલિનાં વરમ્ ॥ ૧૮॥

તતો યુદ્ધં પ્રકર્તવ્યં સર્વૈઃ સુરગણૈઃ સહ ।
મિલિત્વા મન્ત્રમાધાય દેશં કાલં વિચિન્ત્ય ચ ॥ ૧૯॥

બલાબલમવિજ્ઞાય વિવેકમપહાય ચ ।
સાહસં તુ પ્રકુર્વાણો નરઃ પતનમૃચ્છતિ ॥ ૨૦॥

વ્યાસ ઉવાચ ।
તન્નિશમ્ય સહસ્રાક્ષઃ કૈલાસં નિર્જગામ હ ।
બ્રહ્માણં પુરતઃ કૃત્વા લોકપાલસમન્વિતઃ ॥ ૨૧॥

તુષ્ટાવ શઙ્કરં ગત્વા વેદમન્ત્રૈર્મહેશ્વરમ્ ।
પ્રસન્નં પુરતઃ કૃત્વા યયૌ વિષ્ણુપુરં પ્રતિ ॥ ૨૨॥

સ્તુત્વા તં દેવદેવેશં કાર્યં પ્રોવાચ ચાત્મનઃ ।
મહિષાત્તદ્ભયં ચોગ્રં વરદાનમદોદ્ધતાત્ ॥ ૨૩॥

તદાકર્ણ્ય ભયં તસ્ય વિષ્ણુર્દેવાનુવાચ હ ।

કરિષ્યામો વયં યુદ્ધં હનિષ્યામસ્તુ દુર્જયમ્ ॥ ૨૪॥

વ્યાસ ઉવાચ ।
ઇતિ તે નિશ્ચયં કૃત્વા બ્રહ્મવિષ્ણુહરીશ્વરાઃ ।
સ્વાનિ સ્વાનિ સમારુહ્ય વાહનાનિ યયુઃ સુરાઃ ॥ ૨૫॥

બ્રહ્મા હંસસમારૂઢો વિષ્ણર્ગરુડવાહનઃ ।
શઙ્કરો વૃષભારૂઢો વૃત્રહા ગજસંસ્થિતઃ ॥ ૨૬॥

મયૂરવાહનઃ સ્કન્દો યમો મહિષવાહનઃ ।
કૃત્વા સૈન્યસમાયોગં યાવત્તે નિર્યયુઃ સુરાઃ ॥ ૨૭॥

તાવદ્દૈત્યબલં પ્રાપ્તં દૃપ્તં મહિષપાલિતમ્ ।
તત્રાભૂત્તુમુલં યુદ્ધં દેવદાનવસૈન્યયોઃ ॥ ૨૮॥

બાણૈઃ ખડ્ગૈસ્તથા પ્રાસૈર્મુસલૈશ્ચ પરશ્વધૈઃ ।
ગદાભિઃ પટ્ટિશૈઃ શૂલૈશ્ચક્રૈશ્ચ શક્તિતોમરૈઃ ॥ ૨૯॥

મુદ્ગરૈર્ભિન્દિપાલૈશ્ચ હલૈશ્ચૈવાતિદારુણૈઃ ।
અન્યૈશ્ચ વિવિધૈરસ્ત્રૈર્નિજઘ્નુસ્તે પરસ્પરમ્ ॥ ૩૦॥

સેનાનીશ્ચિક્ષુરસ્તસ્ય ગજારૂઢો મહાબલઃ ।
મઘવન્તં પઞ્ચભિસ્તૈઃ સાયકૈઃ સમતાડયત્ ॥ ૩૧॥

તુરાષાડપિ તાંશ્છિત્ત્વા બાણૈર્બાણાંસ્ત્વરાન્વિતઃ ।
હૃદયે ચાર્ધચન્દ્રેણ તાડયામાસ તં કૃતી ॥ ૩૨॥

બાણાહતસ્તુ સેનાનીઃ પ્રાપ મૂર્ચ્છાં ગજોપરિ ।
કરિણં વજ્રઘાતેન સ જઘાન કરે તતઃ ॥ ૩૩॥

તદ્વજ્રાભિહતો નાગો ભગ્નઃ સૈન્યં જગામ હ ।
દૃષ્ટ્વા તં દૈત્યરાટ્ ક્રુદ્ધો બિડાલાખ્યમથાબ્રવીત્ ॥ ૩૪॥

ગચ્છ વીર મહાબાહો જહીન્દ્રં મદગર્વિતમ્ ।
વરુણાદીન્પરાન્દેવાન્હત્વાઽઽગચ્છ મમાન્તિકમ્ ॥ ૩૫॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય બિડાલાખ્યો મહાબલઃ ।
આરુહ્ય વારણં મત્તં જગામ ત્રિદશાધિપમ્ ॥ ૩૬॥

વાસવસ્તં સમાયાન્તં દૃષ્ટ્વા ક્રોધસમન્વિતઃ ।

જઘાન વિશિખૈસ્તીક્ષ્ણૈરાશીવિષસમપ્રભૈઃ ॥ ૩૭॥

સ તુ છિત્ત્વા શરાંસ્તૂર્ણં સ્વશરૈશ્ચાપનિઃસૃતૈઃ ।
પઞ્ચાશદ્ભિર્જઘાનાશુ વાસવઞ્ચ શિલીમુખૈઃ ॥ ૩૮॥

તથેન્દ્રોઽપિ ચ તાન્બાણાંશ્છિત્ત્વા કોપસમન્વિતઃ ।
જઘાન વિશિખૈસ્તીક્ષ્ણૈરાશીવિષસમપ્રભૈઃ ॥ ૩૯॥

સ તુ છિત્ત્વા શરાંસ્તૂર્ણં સ્વશરૈશ્ચાપનિઃસૃતૈઃ ।
ગદયા તાડયામાસ ગજં તસ્ય કરોપરિ ॥ ૪૦॥

સ્વકરે નિહતો નાગશ્ચકારાર્તસ્વરં મુહુઃ ।
પરિવૃત્ય જઘાનાશુ દૈત્યસૈન્યં ભયાતુરમ્ ॥ ૪૧॥

દાનવસ્તુ ગજં વીક્ષ્ય પરાવૃત્ય ગતં રણાત્ ।
સમાવિશ્ય રથે રમ્યે જગામાશુ સુરાન્ રણે ॥ ૪૨॥

તુરાષાડપિ તં વીક્ષ્ય રથસ્થં પુનરાગતમ્ ।
અહનદ્વિશિખૈસ્તીક્ષ્ણૈરાશીવિષસમપ્રભૈઃ ॥ ૪૩॥

સોઽપિ ક્રુદ્ધશ્ચકારોગ્રાં બાણવૃષ્ટિં મહાબલઃ ।
બભૂવ તુમુલં યુદ્ધં તયોસ્તત્ર જયૈષિણોઃ ॥ ૪૪॥

ઇન્દ્રસ્તુ બલિનં દૃષ્ટ્વા કોપેનાકુલિતેન્દ્રિયઃ ।
જયન્તમગ્રતઃ કૃત્વા યુયુધે તેન સંયુતઃ ॥ ૪૫॥

જયન્તસ્તુ શિતૈર્બાણૈસ્તં જઘાન સ્તનાન્તરે ।
પઞ્ચભિઃ પ્રબલાકૃષ્ટૈરસુરં મદગર્વિતમ્ ॥ ૪૬॥

સ બાણાભિહતસ્તાવન્નિપપાત રથોપરિ ।
અતિવાહ્ય રથં સૂતો નિર્જગામ રણાજિરાત્ ॥ ૪૭॥

તસ્મિન્વિનિર્ગતે દૈત્યે બિડાલાખ્યેઽથ મૂર્ચ્છિતે ।
જયશબ્દો મહાનાસીદ્દુન્દુભીનાં ચ નિઃસ્વનઃ ॥ ૪૮॥

સુરાઃ પ્રમુદિતાઃ સર્વે તુષ્ટુવુસ્તં શચીપતિમ્ ।
જગુર્ગન્ધર્વપતયો નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૪૯॥

ચુકોપ મહિષઃ શ્રુત્વા જયશબ્દં સુરૈઃ કૃતમ્ ।
પ્રેષયામાસ તત્રૈવ તામ્રં પરમદાપહમ્ ॥ ૫૦॥

તામ્રસ્તુ બહુભિઃ સાર્ધં સમાગમ્ય રણાજિરે ।
શરવૃષ્ટિં ચકારાશુ તડિત્વાનિવ સાગરે ॥ ૫૧॥

વરુણઃ પાશમુદ્યમ્ય જગામ ત્વરિતસ્તદા ।
યમશ્ચ મહિષારૂઢો દણ્ડમાદાય નિર્યયૌ ॥ ૫૨॥

તત્ર યુદ્ધમભૂદ્ ઘોરં દેવદાનવયોર્મિથઃ ।
બાણૈઃ ખડ્ગૈશ્ચ મુસલૈઃ શક્તિભિશ્ચ પરશ્વધૈઃ ॥ ૫૩॥

દણ્ડેન નિહતસ્તામ્રો યમહસ્તોદ્યતેન ચ ।
ન ચચાલ મહાબાહુઃ સઙ્ગ્રામાઙ્ગણતસ્તદા ॥ ૫૪॥

ચાપમાકૃષ્ય વેગેન મુક્ત્વા તીવ્રાઞ્છિલીમુખાન્ ।
ઇન્દ્રાદીનહનત્તૂર્ણં તામ્રસ્તસ્મિન્ રણાજિરે ॥ ૫૫॥

તેઽપિ દેવાઃ શરૈર્દિવ્યૈર્નિશિતૈશ્ચ શિલાશિતૈઃ ।
નિજઘ્નુર્દાનવાન્ક્રુદ્ધાસ્તિષ્ઠ તિષ્ઠેતિ ચુકુશુઃ ॥ ૫૬॥

નિહતસ્તૈઃ સુરૈર્દૈત્યો મૂર્ચ્છામાપ રણાઙ્ગણે ।
હાહાકારો મહાનાસીદ્દૈત્યસૈન્યે ભયાતુરે ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે દૈત્યસૈન્યપરાજયો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫.૫॥

## ૫.૬ ષષ્ઠોઽધ્યાયઃ । મહિષાસુરસ્યેન્દ્રાદિદેવૈઃ સહ યુદ્ધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તામ્રેઽથ મૂર્ચ્છિતે દૈત્યે મહિષઃ ક્રોધસંયુતઃ ।
સમુદ્યમ્ય ગદાં ગુર્વીં દેવાનુપજગામ હ ॥ ૧॥

તિષ્ઠન્ત્વદ્ય સુરાઃ સર્વે હન્મ્યહં ગદયા કિલ ।
સર્વે બલિભુજઃ કામં બલહીનાઃ સદૈવ હિ ॥ ૨॥

ઇત્યુક્ત્વાસૌ ગજારૂઢં સમ્પ્રાપ્ય મદગર્વિતઃ ।
જઘાન ગદયા તૂર્ણં બાહુમૂલે મહાભુજઃ ॥ ૩॥

સોઽપિ વજ્રેણ ઘોરેણ ચિચ્છેદાશુ ગદાઞ્ચ તામ્ ।
પ્રહર્તુકામસ્ત્વરિતો જગામ મહિષં પ્રતિ ॥ ૪॥

હયારિરપિ કોપેન ખડ્ગમાદાય સુપ્રભમ્ ।

યયાવિન્દ્રં મહાવીર્યં પ્રહરિષ્યન્નિવાન્તિકમ્ ॥ ૫॥

બભૂવ ચ તયોર્યુદ્ધં સર્વલોકભયાવહમ્ ।
આયુધૈર્વિવિધૈસ્તત્ર મુનિવિસ્મયકારકમ્ ॥ ૬॥

ચકારાશુ તદા દૈત્યો માયાં મોહકરીં કિલ ।
શામ્બરીં સર્વલોકઘ્નીં મુનીનામપિ મોહિનીમ્ ॥ ૭॥

કોટિશો મહિષાસ્તત્ર તદ્રૂપાસ્તત્પરાક્રમાઃ ।
દદૃશુઃ સાયુધાઃ સર્વે નિઘ્નન્તો દેવવાહિનીમ્ ॥ ૮॥

મઘવા વિસ્મિતસ્તત્ર દૃષ્ટ્વા તાં દૈત્યનિર્મિતામ્ ।
બભૂવાતિભયોદ્વિગ્નો માયાં મોહકરીં કિલ ॥ ૯॥

વરુણોઽપિ સુસન્ત્રસ્તસ્તથૈવ ધનનાયકઃ ।
યમો હુતાશનઃ સૂર્યઃ શીતરશ્મિર્ભયાતુરઃ ॥ ૧૦॥

પલાયનપરા સર્વે બભૂવુર્મોહિતાઃ સુરાઃ ।
બ્રહ્મવિષ્ણમહેશાનાં સ્મરણં ચક્રુરુદ્યતાઃ ॥ ૧૧॥

તત્રાજગ્મુશ્ચ કાજેશાઃ સ્મૃતમાત્રાઃ સુરોત્તમાઃ ।
હંસતાર્ક્ષ્યવૃષારૂઢાસ્ત્રાતુકામા વરાયુધાઃ ॥ ૧૨॥

શૌરિસ્તાં મોહિનીં દૃષ્ટ્વા સુદર્શનમથોજ્જ્વલમ્ ।
મુમોચ તત્તેજસૈવ માયા સા વિલયં ગતા ॥ ૧૩॥

વીક્ષ્ય તાન્મહિષસ્તત્ર સૃષ્ટિસ્થિત્યન્તકારિણઃ ।
યોદ્ધુકામઃ સમાદાય પરિઘં સમુપાદ્રવત્ ॥ ૧૪॥

મહિષાખ્યો મહાવીરઃ સેનાનીશ્ચિક્ષુરસ્તથા ।
ઉગ્રાસ્યશ્ચોગ્રવીર્યશ્ચ દુદ્રુવુર્યુદ્ધકામુકાઃ ॥ ૧૫॥

અસિલોમાત્રિનેત્રશ્ચ બાષ્કલોઽન્ધક એવ ચ ।
એતે ચાન્યે ચ બહવો યુદ્ધકામા વિનિર્યયુઃ ॥ ૧૬॥

સન્નદ્ધા ધૃતચાપાસ્તે રથારૂઢા મદોદ્ધતાઃ ।
પરિવવ્રુઃ સુરાન્સર્વાન્વૃકા ઇવ સુવત્સકાન્ ॥ ૧૭॥

બાણવૃષ્ટિં તતશ્ચક્રુર્દાનવા મદગર્વિતાઃ ।
સુરાશ્ચાપિ તથા ચક્રુઃ પરસ્પરજિઘાંસવઃ ॥ ૧૮॥

અન્ધકો હરિમાસાદ્ય પઞ્ચબાણાઞ્છિલાશિતાન્ ।
મુમોચ વિષસન્દિગ્ધાન્કર્ણાકૃષ્ટાન્મહાબલાન્ ॥ ૧૯॥

વાસુદેવોઽપ્યસમ્પ્રાપ્તાન્વિશિખાનાશુગૈસ્તદા ।
ચિચ્છેદ તાન્પુનઃ પઞ્ચ મુમોચ રિપુનાશનઃ ॥ ૨૦॥

તયોઃ પરસ્પરં યુદ્ધં બભૂવ હરિદૈત્યયોઃ ।
બાણાસિચક્રમુસલૈર્ગદાશક્તિપરશ્વધૈઃ ॥ ૨૧॥

મહેશાન્ધકયોર્યુદ્ધં તુમુલં લોમહર્ષણમ્ ।
પઞ્ચાશદ્દિનપર્યન્તં બભૂવ ચ પરસ્પરમ્ ॥ ૨૨॥

ઇન્દ્રબાષ્કલયોસ્તદ્વન્મહિષાસુરરુદ્રયોઃ ।
યમત્રિનેત્રયોસ્તદ્વન્મહાહનુધનેશયોઃ ॥ ૨૩॥

અસિલોમવરુણયોર્યુદ્ધં પરમદારુણમ્ ।
ગરુડં ગદયા દૈત્યો જઘાન હરિવાહનમ્ ॥ ૨૪॥

સ ગદાપાતખિન્નાઙ્ગો નિઃશ્વસન્નવતિષ્ઠત ।
શૌરિસ્તં દક્ષિણેનાશુ હસ્તેન પરિસાન્ત્વયન્ ॥ ૨૫॥

સ્થિરં ચકાર દેવેશો વૈનતેયં મહાબલમ્ ।
સમાકૃષ્ય ધનુઃ શાર્ઙ્ગં મુમોચ વિશિખાન્બહૂન્ ॥ ૨૬॥

અન્ધકોપરિ કોપેન હન્તુકામો જનાર્દનઃ ।
દાનવોઽપિ ચ તાન્બાણાંશ્ચિચ્છેદ સ્વશરૈઃ શિતૈઃ ॥ ૨૭॥

પઞ્ચાશદ્ભિર્હરિં કોપાજ્જઘાન ચ શિલાશિતૈઃ ।
વાસુદેવોઽપિ તાંસ્તૂર્ણં વઞ્ચયિત્વા શરોત્તમાન્ ॥ ૨૮॥

ચક્રં મુમોચ વેગેન સહસ્રારં સુદર્શનમ્ ।
ત્યક્તં સુદર્શનં દૂરાત્સ્વચક્રેણ ન્યવારયત્ ॥ ૨૯॥

નનાદ ચ મહારાજ દેવાન્સમ્મોહયન્નિવ ।
દૃષ્ટ્વા તુ વિફલં જાતં ચક્રં દેવસ્ય શાર્ઙ્ગિણઃ ॥ ૩૦॥

જગ્મુઃ શોકં સુરાઃ સર્વે જહર્ષુર્દાનવાસ્તથા ।
વાસુદેવોઽપિ તરસા દૃષ્ટ્વા દેવાઞ્છુચાવૃતાન્ ॥ ૩૧॥

ગદાં કૌમોદકીં ધૃત્વા દાનવં સમુપાદ્રવત્ ।
તં જઘાનાતિવેગેન મૂર્ધ્નિ માયાવિનં હરિઃ ॥ ૩૨॥

સ ગદાભિહતો ભૂમૌ નિપપાતાતિમૂર્ચ્છિતઃ ।
તં તથા પતિતં વીક્ષ્ય હયારિરતિકોપનઃ ॥ ૩૩॥

આજગામ રમાનાથં ત્રાસયન્નતિગર્જિતૈઃ ।
વાસુદેવોઽપિ તં દૃષ્ટ્વા સમાયાન્તં ક્રુધાન્વિતમ્ ॥ ૩૪॥

ચાપજ્યાનિનદં ચોગ્રં ચકાર નન્દયન્સુરાન્ ।
શરવૃષ્ટિં ચકારાશુ ભગવાન્મહિષોપરિ ॥ ૩૫॥

સોઽપિ ચિચ્છેદ બાણૌઘૈસ્તાઞ્છરાન્ગગનેરિતાન્ ।
તયોર્યુદ્ધમભૂદ્રાજન્ પરસ્પરભયાવહમ્ ॥ ૩૬॥

ગદયા તાડયામાસ કેશવો મસ્તકોપરિ ।
સ ગદાભિહતો મૂર્ધ્નિ પપાતોર્વ્યાં સુમૂર્ચ્છિતઃ ॥ ૩૭॥

હાહાકારો મહાનાસીત્સૈન્યે તસ્ય સુદારુણઃ ।
સ વિહાય વ્યથાં દૈત્યો મુહૂર્તાદુત્થિતઃ પુનઃ ॥ ૩૮॥

ગૃહીત્વા પરિઘં શીર્ષે જઘાન મધુસૂદનમ્ ।
પરિઘેણાહતસ્તેન મૂર્ચ્છામાપ જનાર્દનઃ ॥ ૩૯॥

મૂર્ચ્છિતં તમુવાહાશુ જગામ ગરુડો રણાત્ ।
પરાવૃત્તે જગન્નાથે દેવા ઇન્દ્રપુરોગમાઃ ॥ ૪૦॥

ભયં પ્રાપુઃ સુદુઃખાર્તાશ્ચુક્રુશુશ્ચ રણાજિરે ।
ક્રન્દમાનાન્સુરાન્વીક્ષ્ય શઙ્કરઃ શૂલભૃત્તદા ॥ ૪૧॥

મહિષં તરસાભ્યેત્ય પ્રાહરદ્રોષસંયુતઃ ।
સોઽપિ શક્તિં મુમોચાથ શઙ્કરસ્યોરસિ સ્ફુટમ્ ॥ ૪૨॥

જગર્જ સ ચ દુષ્ટાત્મા વઞ્ચયિત્વા ત્રિશૂલકમ્ ।
શઙ્કરોઽપિ તદા પીડાં ન પ્રાપોરસિ તાડિતઃ ॥ ૪૩॥

તં જઘાન ત્રિશૂલેન કોપાદરુણલોચનઃ ।
સંલગ્નં શઙ્કરં દૃષ્ટ્વા મહિષેણ દુરાત્મના ॥ ૪૪॥

આજગામ હરિસ્તાવત્ત્યક્ત્વા મૂર્ચ્છાં પ્રહારજામ્ ।
મહિષસ્તુ તદા વીક્ષ્ય સમ્પ્રાપ્તૌ હરિશઙ્કરૌ ॥ ૪૫॥

યુદ્ધકામૌ મહાવીર્યૌ ચક્રશૂલધરૌ વરૌ ।

કોપયુક્તો બભૂવાસૌ દૃષ્ટ્વા તૌ સમુપાગતૌ ॥ ૪૬॥

જગામ સમ્મુખસ્તાવત્સઙ્ગ્રામાર્થં મહાભુજઃ ।
માહિષં વપુરાસ્થાય ધુન્વન્પુચ્છં સમુત્કટમ્ ॥ ૪૭॥

ચકાર ભૈરવં નાદં ત્રાસયન્નમરાનપિ ।
ધુન્વઞ્છૃઙ્ગે મહાકાયો દારુણો જલદો યથા ॥ ૪૮॥

શૃઙ્ગાભ્યાં પર્વતાઞ્છૃઙ્ગાંશ્ચિક્ષેપ ભૃશમુત્કટાન્ ।
દૃષ્ટ્વા તૌ તુ મહાવીર્યૌ દાનવં દેવસત્તમૌ ॥ ૪૯॥

ચક્રતુર્બાણવૃષ્ટિં ચ દાનવોપરિ દારુણામ્ ।
કુર્વાણૌ બાણવૃષ્ટિં તૌ દૃષ્ટ્વા હરિહરૌ હરિઃ ॥ ૫૦॥

ચિક્ષેપ ગિરિશૃઙ્ગં તુ પુચ્છેનાવૃત્ય દારુણમ્ ।
આપતન્તં ગિરિં વીક્ષ્ય ભગવાન્સાત્વતાં પતિઃ ॥ ૫૧॥

વિશિખૈઃ શતધા ચક્રે ચક્રેણાશુ જઘાન તમ્ ।
હરિચક્રાહતઃ સઙ્ખ્યે મૂર્ચ્છામાપ સ દૈત્યરાટ્ ॥ ૫૨॥

ઉત્તસ્થૌ ચ ક્ષણાન્નૂનં માનુષં વપુરાસ્થિતઃ ।
ગદાપાણિર્મહાઘોરો દાનવઃ પર્વતોપમઃ ॥ ૫૩॥

મેઘનાદં નનાદોચ્ચૈર્ભીષયન્નમરાનપિ ।
તચ્છ્રુત્વા ભગવાન્વિષ્ણુઃ પાઞ્ચજન્યં સમુજ્જ્વલમ્ ॥ ૫૪॥

પૂરયામાસ તરસા શબ્દં કર્તું ખરસ્વરમ્ ।
તેન શબ્દેન શઙ્ખસ્ય ભયત્રસ્તાશ્ચ દાનવાઃ ।
બભૂવુર્મુદિતા દેવા ઋષયશ્ચ તપોધનાઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે મહિષાસુરસ્યેન્દ્રાદિદેવૈઃ સહ યુદ્ધવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૫.૬॥

## ૫.૭ સપ્તમોઽધ્યાયઃ । શઙ્કરશરણગમનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અસુરાન્મહિષો દૃષ્ટ્વા વિષણ્ણમનસસ્તદા ।
ત્યક્ત્વા તન્માહિષં રૂપં બભૂવ મૃગરાડસૌ ॥ ૧॥

કૃત્વા નાદં મહાઘોરં વિસ્તાર્ય ચ મહાસટામ્ ।

પપાત સુરસેનાયાં ત્રાસયન્નખદર્શનૈઃ ॥ ૨॥

ગરુડઞ્ચ નખાઘાતૈઃ કૃત્વા રુધિરવિપ્લુતમ્ ।
જઘાન ચ ભુજે વિષ્ણું નખાઘાતેન કેસરી ॥ ૩॥

વાસુદેવોઽપિ તં દૃષ્ટ્વા ચક્રમુદ્યમ્ય વેગવાન્ ।
હન્તુકામો હરિઃ કામમવાપાશુ ક્રુધાન્વિતઃ ॥ ૪॥

યાવદ્ધયરિપું વેગાચ્ચક્રેણાભિજઘાન તમ્ ।
તાવત્સોઽતિબલઃ શ‍ૃઙ્ગી શ‍ૃઙ્ગાભ્યાં ન્યહનદ્ધરિમ્ ॥ ૫॥

વાસુદેવો વિષાણાભ્યાં તાડિતોરસિ વિહ્વલઃ ।
પલાયનપરો વેગાજ્જગામ ભુવનં નિજમ્ ॥ ૬॥

ગતં દૃષ્ટ્વા હરિં કામં શઙ્કરોઽપિ ભયાન્વિતઃ ।
અવધ્યં તં પરં મત્વા યયૌ કૈલાસપર્વતમ્ ॥ ૭॥

બ્રહ્માપિ ચ નિજં ધામ ત્વરિતઃ પ્રયયૌ ભયાત્ ।
મઘવા વજ્રમાલમ્બ્ય તસ્થાવાજૌ મહાબલઃ ॥ ૮॥

વરુણઃ શક્તિમાલમ્બ્ય ધૈર્યમાલમ્બ્ય સંસ્થિતઃ ।
યમોઽપિ દણ્ડમાદાય યત્તઃ સમરતત્પરઃ ॥ ૯॥

તતો યક્ષાધિપઃ કામં બભૂવ રણતત્પરઃ ।
પાવકઃ શક્તિમાદાય તત્રાભૂદ્યુદ્ધમાનસઃ ॥ ૧૦॥

નક્ષત્રાધિપતિઃ સૂર્યઃ સમવેતૌ સ્થિતાવુભૌ ।
વીક્ષ્ય તં દાનવશ્રેષ્ઠં યુદ્ધાય કૃતનિશ્ચયૌ ॥ ૧૧॥

એતસ્મિન્નન્તરે ક્રુદ્ધં દૈત્યસૈન્યં સમભ્યગાત્ ।
વિસૃજન્બાણજાલાનિ ક્રૂરાહિસદૃશાનિ ચ ॥ ૧૨॥

કૃત્વા હિ માહિષં રૂપં ભૂપતિઃ સંસ્થિતસ્તદા ।
દેવદાનવયોધાનાં નિનાદસ્તુમુલોઽભવત્ ॥ ૧૩॥

જ્યાઘાતશ્ચ તલાઘાતો મેઘનાદસમોઽભવત્ ।
સઙ્ગ્રામે સુમહાઘોરે દેવદાનવસેનયોઃ ॥ ૧૪॥

શ‍ૃઙ્ગાભ્યાં પાર્વતાઞ્છૃઙ્ગાંશ્ચિક્ષેપ ચ મહાબલઃ ।
જઘાન સુરસઙ્ઘાંશ્ચ દાનવો મદગર્વિતઃ ॥ ૧૫॥

ખુરાઘાતૈસ્તથા દેવાન્પુચ્છસ્ય ભ્રમણેન ચ ।
સ જઘાન રુષાવિષ્ટો મહિષઃ પરમાદ્ભુતઃ ॥ ૧૬॥

તતો દેવાઃ સગન્ધર્વા ભયમાજગ્મુરુદ્ધતાઃ ।
મઘવા મહિષં દૃષ્ટ્વા પલાયનપરોઽભવત્ ॥ ૧૭॥

સઙ્ગરં સમ્પરિત્યજ્ય ગતે શક્રે શચીપતૌ ।
યમો ધનાધિપઃ પાશી જગ્મુઃ સર્વે ભયાતુરાઃ ॥ ૧૮॥

મહિષોઽપિ જયં મત્વા જગામ સ્વગૃહં તતઃ ।
ઐરાવતં ગજં પ્રાપ્ય ત્યક્તમિન્દ્રેણ ગચ્છતા ॥ ૧૯॥

તથોચ્ચૈઃશ્રવસં ભાનોઃ કામધેનું પયસ્વિનીમ્ ।
સ્વસૈન્યસંવૃતસ્તૂર્ણં સ્વર્ગં ગન્તું મનો દધે ॥ ૨૦॥

તરસા દેવસદનં ગત્વા સ મહિષાસુરઃ ।
જગ્રાહ સુરરાજ્યં વૈ ત્યક્તં દેવૈર્ભયાતુરૈઃ ॥ ૨૧॥

ઇન્દ્રાસને તથા રમ્યે દાનવઃ સમુપાવિશત્ ।
દાનવાન્સ્થાપયામાસ દેવાનાં સ્થાનકેષુ સઃ ॥ ૨૨॥

એવં વર્ષશતં પૂર્ણં કૃત્વા યુદ્ધં સુદારુણમ્ ।
અવાપૈન્દ્રપદં કામં દાનવો મદગર્વિતઃ ॥ ૨૩॥

નિર્જરા નિર્ગતા નાકાત્તેન સર્વેઽતિપીડિતાઃ ।
એવં બહૂનિ વર્ષાણિ બભ્રમુર્ગિરિગહ્વરે ॥ ૨૪॥

શ્રાન્તાઃ સર્વે તદા રાજન્ બ્રહ્માણં શરણં યયુઃ ।
પ્રજાપતિં જગન્નાથં રજોરૂપં ચતુર્મુખમ્ ॥ ૨૫॥

પદ્માસનં વેદગર્ભં સેવિતં મુનિભિઃ સ્વજૈઃ ।
મરીચિપ્રમુખૈઃ શાન્તૈર્વેદવેદાઙ્ગપારગૈઃ ॥ ૨૬॥

કિન્નરૈઃ સિદ્ધગન્ધર્વૈશ્ચારણોરગપન્નગૈઃ ।
તુષ્ટુવુર્ભયભીતાસ્તે દેવદેવં જગદ્ગુરુમ્ ॥ ૨૭॥

દેવા ઊચુઃ ।
ધાતઃ કિમેતદખિલાર્તિહરામ્બુજન્મ
જન્માભિવીક્ષ્ય ન દયાં કુરુષે સુરાન્ યત્ ।
સમ્પીડિતાન્ રણજિતાનસુરાધિપેન

સ્થાનચ્યુતાન્ ગિરિગુહાકૃતસન્નિવાસાન્ ॥ ૨૮॥

પુત્રાન્પિતા કિમપરાધશતૈઃ સમેતા-
ન્સન્ત્યજ્ય લોભરહિતઃ કુરુતેઽતિદુઃસ્થાન્ ।
યસ્ત્વં સુરાંસ્તવ પદામ્બુજભક્તિયુક્તા-
ન્દૈત્યાર્દિતાંશ્ચ કૃપણાન્ યદુપેક્ષસેઽદ્ય ॥ ૨૯॥

અમરભુવનરાજ્યં તેન ભુક્તં નિતાન્તં
મખહવિરપિ યોગ્યં બ્રાહ્મણૈરાદદાતિ ।
સુરતરુવરપુષ્પં સેવતેઽસૌ દુરાત્મા
જલનિધિનિધિભૂતાં ગામસૌ સેવતે તામ્ ॥ ૩૦॥

કિં વા ગૃણીમઃ સુરકાર્યમદ્ભુતં
જાનાસિ દેવેશ સુરારિચેષ્ટિતમ્ ।
જ્ઞાનેન સર્વં ત્વમશેષકાર્યવિ-
ત્તસ્માત્પ્રભો તે પ્રણતાઃ સ્મ પાદયોઃ ॥ ૩૧॥

યત્રાપિ કુત્રાપિ ગતાન્સુરાનસૌ
નાનાચરિત્રઃ ખલુ પાપમાનસઃ ।
પીડાં કરોત્યેવ સ દુષ્ટચેષ્ટિત-
સ્ત્રાતાસિ દેવેશ વિધેહિ શં વિભો ॥ ૩૨॥

નો ચેદ્વયં દાવમહાગ્નિપીડિતાઃ
કં શાન્તિકર્તારમનન્તતેજસમ્ ।
યામઃ પ્રજેશં શરણં સુરેષ્ટં
ધાતારમાદ્યં પરિમુચ્ય કં શિવમ્ ॥ ૩૩॥

વ્યાસ ઉવાચ ।
ઇતિ સ્તુત્વા સુરાઃ સર્વે પ્રણેમુસ્તં પ્રજાપતિમ્ ।
બદ્ધાઞ્જલિપુટાઃ સર્વે વિષણ્ણવદના ભૃશમ્ ॥ ૩૪॥

તાંસ્તથા પીડિતાન્દૃષ્ટ્વા તદા લોકપિતામહઃ ।
ઉવાચ શ્લક્ષ્ણયા વાચા સુખં સઞ્જનયન્નિવ ॥ ૩૫॥

બ્રહ્મોવાચ ।
કિં કરોમિ સુરાઃ કામં દાનવો વરદર્પિતઃ ।
સ્ત્રીવધ્યોઽસૌ ન પુંવધ્યો વિધેયં તત્ર કિં પુનઃ ॥ ૩૬॥

વ્રજામોઽદ્ય સુરાઃ સર્વે કૈલાસં પર્વતોત્તમમ્ ।
શઙ્કરં પુરતઃ કૃત્વા સર્વકાર્યવિશારદમ્ ॥ ૩૭॥

તતો વ્રજામ વૈકુણ્ઠં યત્ર દેવો જનાર્દનઃ ।
મિલિત્વા દેવકાર્યઞ્ચ વિમૃશામો વિશેષતઃ ॥ ૩૮॥

ઇત્યુક્ત્વા હંસમારુહ્ય બ્રહ્મા કાર્યસમુચ્ચયે ।
દેવાંશ્ચ પૃષ્ઠતઃ કૃત્વા કૈલાસાભિમુખો યયૌ ॥ ૩૯॥

તાવચ્છિવોઽપિ તરસા જ્ઞાત્વા ધ્યાનેન પદ્મજમ્ ।
આગચ્છન્તં સુરૈઃ સાર્ધં નિર્ગતઃ સ્વગૃહાદ્બહિઃ ॥ ૪૦॥

દૃષ્ટ્વા પરસ્પરં તૌ તુ કૃતાભિવાદનૌ ભૃશમ્ ।
પ્રણતૌ ચ સુરૈઃ સર્વૈઃ સન્તુષ્ટૌ સમ્બભૂવતુઃ ॥ ૪૧॥

આસનાનિ પૃથગ્દત્ત્વા દેવેભ્યો ગિરિજાપતિઃ ।
ઉપવિષ્ટેષુ તેષ્વેવ નિષસાદાસને સ્વકે ॥ ૪૨॥

કૃત્વા તુ કુશલપ્રશ્નં બ્રહ્માણં વૃષભધ્વજઃ ।
પપ્રચ્છ કારણં દેવાન્કૈલાસાગમને વિભુઃ ॥ ૪૩॥

શિવ ઉવાચ ।
કિમત્રાગમનં બ્રહ્મન્ કૃતં દેવૈઃ સવાસવૈઃ ।
ભવતા ચ મહાભાગ બ્રૂહિ તત્કારણં કિલ ॥ ૪૪॥

બ્રહ્મોવાચ ।
મહિષેણ સુરેશાન પીડિતાઃ સ્વર્નિવાસિનઃ ।
ભ્રમન્તિ ગિરિદુર્ગેષુ ભયત્રસ્તાઃ સવાસવાઃ ॥ ૪૫॥

યજ્ઞભુગ્મહિષો જાતસ્તથાન્યે સુરશત્રવઃ ।
પીડિતા લોકપાલાશ્ચ ત્વામદ્ય શરણં ગતાઃ ॥ ૪૬॥

મયા તે ભવનં શમ્ભો પ્રાપિતાઃ કાર્યગૌરવાત્ ।
યદ્યુક્તં તદ્વિધત્સ્વાદ્ય સુરકાર્યં સુરેશ્વર ॥ ૪૭॥

ત્વયિ ભારોઽસ્તિ સર્વેષાં દેવાનાં ભૂતભાવન ।
વ્યાસ ઉવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા શઙ્કરઃ પ્રહસન્નિવ ॥ ૪૮॥

વચનં શ્લક્ષ્ણયા વાચા પ્રોવાચ પદ્મજં પ્રતિ ।

શિવ ઉવાચ ।
ભવતૈવ કૃતં કાર્યં વરદાનાત્પુરા વિભો ॥ ૪૯॥

અનર્થદઞ્ચ દેવાનાં કિં કર્તવ્યમતઃ પરમ્ ।
ઈદૃશો બલવાઞ્છૂરઃ સર્વદેવભયપ્રદઃ ॥ ૫૦॥

કા સમર્થા વરા નારી તં હન્તું મદદર્પિતમ્ ।
ન મે ભાર્યા ન તે ભાર્યા સઙ્ગ્રામં ગન્તુમર્હતિ ॥ ૫૧॥

ગત્વૈવ તે મહાભાગે યુયુધાતે કથં પુનઃ ।
ઇન્દ્રાણી ચ મહાભાગા ન યુદ્ધકુશલાસ્તિ હિ ॥ ૫૨॥

કાન્યા હન્તું સમર્થાસ્તિ તં પાપં મદદર્પિતમ્ ।
મમેદં મતમદ્યૈવ ગત્વા દેવં જનાર્દનમ્ ॥ ૫૩॥

સ્તુત્વા તં દેવકાર્યાય પ્રેરયામઃ સુસત્વરમ્ ।
સોઽતિબુદ્ધિમતાં શ્રેષ્ઠો વિષ્ણુઃ સર્વાર્થસાધને ॥ ૫૪॥

મિલિત્વા વાસુદેવં વૈ કર્તવ્યં કાર્યચિન્તનમ્ ।
પ્રપઞ્ચેન ચ બુદ્ધ્યા સ સંવિધાસ્યતિ સાધનમ્ ॥ ૫૫॥

વ્યાસ ઉવાચ ।
ઇતિ રુદ્રવચઃ શ્રુત્વા બ્રહ્માદ્યાઃ સુરસત્તમાઃ ।
ઉત્થિતાસ્તે તથેત્યુક્ત્વા શિવેન સહ સત્વરાઃ ॥ ૫૬॥

સ્વકીયૈર્વાહનૈઃ સર્વે યયુર્વિષ્ણપુરં પ્રતિ ।
મુદિતાઃ શકુનાન્દૃષ્ટ્વા કાર્યસિદ્ધિકરાઞ્છુભાન્ ॥ ૫૭॥

વવુર્વાતાઃ શુભાઃ શાન્તાઃ સુગન્ધાઃ શુભશંસિનઃ ।
પક્ષિણશ્ચ શિવા વાચસ્તત્રોચુઃ પથિ સર્વશઃ ॥ ૫૮॥

નિર્મલં ચાભવદ્વ્યોમ દિશશ્ચ વિમલાસ્તથા ।
ગમને તત્ર દેવાનાં સર્વં શુભમિવાભવત્ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પઞ્ચમસ્કન્ધે
પરાજિતદેવતાનાં શઙ્કરશરણગમનવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૫.૭॥

## ૫.૮ અષ્ટમોઽધ્યાયઃ । દેવ્યાઃ સ્વરૂપોદ્ભવવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તરસા તેઽથ સમ્પ્રાપ્ય વૈકુણ્ઠં વિષ્ણુવલ્લભમ્ ।
દદૃશુઃ સર્વશોભાઢ્યં દિવ્યસદ્મવિરાજિતમ્ ॥ ૧॥

સરોવાપીસરિદ્ભિશ્ચ સંયુતં સુખદં શુભમ્ ।
હંસસારસચક્રાહ્વૈઃ કૂજદ્ભિશ્ચ વિરાજિતમ્ ॥ ૨॥

ચમ્પકાશોકકહ્લારમન્દારબકુલાવૃતૈઃ ।
મલ્લિકાતિલકામ્રાતયુતૈઃ કુરબકાદિભિઃ ॥ ૩॥

કોકિલારાવસન્નાદૈઃ શિખણ્ડૈર્નૃત્યરઞ્જિતૈઃ ।
ભ્રમરારાવરમ્યૈશ્ચ દિવ્યૈરુપવનૈર્યુતમ્ ॥ ૪॥

સુનન્દનન્દનાદ્યૈશ્ચ પાર્ષદૈર્ભક્તિતત્પરૈઃ ।
સંસ્તુવદ્ભિર્યુતં ભક્તૈરનન્યભવવૃત્તિભિઃ ॥ ૫॥

પ્રાસાદૈ રત્નખચિતૈઃ કાઞ્ચનૈશ્ચિત્રમણ્ડિતૈઃ ।
અભ્રંલિહૈર્વિરાજદ્ભિઃ સંયુતં શુભસદ્મકૈઃ ॥ ૬॥

ગાયદ્ભિર્દેવગન્ધર્વૈર્નૃત્યદ્ભિરપ્સરોગણૈઃ ।
રઞ્જિતં કિન્નરૈઃ શશ્વદ્રક્તકણ્ઠૈર્મનોહરૈઃ ॥ ૭॥

મુનિભિશ્ચ તથા શાન્તૈર્વેદપાઠકૃતાદરૈઃ ।
સ્તુવદ્ભિઃ શ્રુતિસૂક્તૈશ્ચ મણ્ડિતં સદનં હરેઃ ॥ ૮॥

તે ચ વિષ્ણુગૃહં પ્રાપ્ય દ્વારપાલૌ શુભાકૃતી ।
વીક્ષ્યોચુર્જયવિજયૌ હેમયષ્ટિધરૌ સ્થિતૌ ॥ ૯॥

ગત્વૈકોઽપ્યુભયોર્મધ્યે નિવેદયતુ સઙ્ગતાન્ ।
દ્વારસ્થાન્ બ્રહ્મરુદ્રાદીન્વિષ્ણુદર્શનલાલસાન્ ॥ ૧૦॥

વ્યાસ ઉવાચ ।
વિજયસ્તદ્વચઃ શ્રુત્વા ગત્વાથ વિષ્ણુસન્નિધૌ ।
સર્વાન્સમાગતાન્દેવાન્પ્રણમ્યોવાચ સત્વરઃ ॥ ૧૧॥

વિજય ઉવાચ ।
દેવદેવ મહારાજ રમાકાન્ત સુરારિહન્ ।
સમાગતાઃ સુરાઃ સર્વે દ્વારિ તિષ્ઠન્તિ વૈ વિભો ॥ ૧૨॥

બ્રહ્મા રુદ્રસ્તથેન્દ્રશ્ચ વરુણઃ પાવકો યમઃ ।
સ્તુવન્તિ વેદવાક્યૈસ્ત્વામમરા દર્શનાર્થિનઃ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં વિષ્ણર્વિજયસ્ય રમાપતિઃ ।
નિર્જગામ ગૃહાત્તૂર્ણં સુરાન્સમધિકોત્સવઃ ॥ ૧૪॥

ગત્વા વીક્ષ્ય હરિર્દેવાન્દ્વારસ્થાઞ્છ્રમકર્શિતાન્ ।
પ્રીતિપ્રવણયા દૃષ્ટ્યા પ્રીણયામાસ દુઃખિતાન્ ॥ ૧૫॥

પ્રણેમુસ્તે સુરાઃ સર્વે દેવદેવં જનાર્દનમ્ ।
તુષ્ટુવુશ્ચ સુરારિઘ્નં વાગ્ભિર્વેદવિનિશ્ચિતમ્ ॥ ૧૬॥

દેવા ઊચુઃ ।
દેવદેવ જગન્નાથ સૃષ્ટિસ્થિત્યન્તકારક ।
દયાસિન્ધો મહારાજ ત્રાહિ નઃ શરણાગતાન્ ॥ ૧૭॥

વિષ્ણુરુવાચ ।
વિશન્તુ નિર્જરાઃ સર્વે કુશલં કથયન્તુ વઃ ।
આસનેષુ કિમર્થં વૈ મિલિતાઃ સમુપાગતાઃ ॥ ૧૮॥

ચિન્તાતુરાઃ કથં જાતા વિષણ્ણા દીનમાનસાઃ ।
બ્રહ્મરુદ્રેણ સહિતાઃ કાર્યં પ્રબ્રૂત સત્વરમ્ ॥ ૧૯॥

દેવા ઊચુઃ ।
મહિષેણ મહારાજ પીડિતાઃ પાપકર્મણા ।
અસાધ્યેનાતિદુષ્ટેન વરદૃપ્તેન પાપિના ॥ ૨૦॥

યજ્ઞભાગાનસૌ ભુઙ્ક્તે બ્રાહ્મણૈઃ પ્રતિપાદિતાન્ ।
અમરા ગિરિદુર્ગેષુ ભ્રમન્તિ ચ ભયાતુરાઃ ॥ ૨૧॥

વરદાનેન ધાતુઃ સ દુર્જયો મધુસૂદન ।
તસ્માત્ત્વાં શરણં પ્રાપ્તા જ્ઞાત્વા તત્કાર્યગૌરવમ્ ॥ ૨૨॥

સમર્થોઽસિ સમુદ્ધર્તું દૈત્યમાયાવિશારદ ।
કુરુ કૃષ્ણ વધોપાયં તસ્ય દાનવમર્દન ॥ ૨૩॥

ધાત્રા તસ્મૈ વરો દત્તો હ્યવધ્યોઽસિ નરૈઃ કિલ ।
કા સ્ત્રી ત્વેવંવિધા બાલા યા હન્યાત્તં શઠં રણે ॥ ૨૪॥

ઉમા મા વા શચી વિદ્યા કા સમર્થાસ્ય ઘાતને ।
મહિષસ્યાતિદુષ્ટસ્ય વરદાનબલાદપિ ॥ ૨૫॥

વિચિન્ત્ય બુદ્ધ્યા યત્સર્વં મરણસ્યાસ્ય કારણમ્ ।
કુરુ કાર્યં ચ દેવાનાં ભક્તવત્સલ ભૂધર ॥ ૨૬॥

વ્યાસ ઉવાચ ।
શ્રુત્વા તદ્વચનં વિષ્ણુસ્તાનુવાચ હસન્નિવ ।
યુદ્ધં કૃતં પુરાસ્માભિસ્તથાપિ ન મૃતો હ્યસૌ ॥ ૨૭॥

અથ સર્વસુરાણાં વૈ તેજોભી રૂપસમ્પદા ।
ઉત્પન્ના ચેદ્વરારોહા સા હન્યાત્તં રણે બલાત્ ॥ ૨૮॥

હયારિં વરદૃપ્તઞ્ચ માયાશતવિશારદમ્ ।
હન્તું યોગ્યા ભવેન્નારી શક્ત્યંશૈર્નિર્મિતા હિ નઃ ॥ ૨૯॥

પ્રાર્થયન્તુ ચ તેજોંઽશાન્સ્ત્રિયોઽસ્માકં તથા પુનઃ ।
ઉત્પન્નૈસ્તૈશ્ચ તેજોંઽશૈસ્તેજોરાશિર્ભવેદ્યથા ॥ ૩૦॥

આયુધાનિ વયં દદ્મઃ સર્વે રુદ્રપુરોગમાઃ ।
તસ્યૈ સર્વાણિ દિવ્યાનિ ત્રિશૂલાદીનિ યાનિ ચ ॥ ૩૧॥

સર્વાયુધધરા નારી સર્વતેજઃસમન્વિતા ।
હનિષ્યતિ દુરાત્માનં તં પાપં મદગર્વિતમ્ ॥ ૩૨॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તવતિ દેવેશે બ્રહ્મણો વદનાત્તતઃ ।
સ્વયમેવોદ્બભૌ તેજોરાશિશ્ચાતીવ દુઃસહઃ ॥ ૩૩॥

રક્તવર્ણં શુભાકારં પદ્મરાગમણિપ્રભમ્ ।
કિઞ્ચિચ્છીતં તથા ચોષ્ણં મરીચિજાલમણ્ડિતમ્ ॥ ૩૪॥

નિઃસૃતં હરિણા દૃષ્ટં હરેણ ચ મહાત્મના ।
વિસ્મિતૌ તૌ મહારાજ બભૂવતુરુરુક્રમૌ ॥ ૩૫॥

શઙ્કરસ્ય શરીરાત્તુ નિઃસૃતં મહદદ્ભુતમ્ ।
રૌપ્યવર્ણમભૂત્તીવ્રં દુર્દર્શં દારુણં મહત્ ॥ ૩૬॥

ભયઙ્કરઞ્ચ દૈત્યાનાં દેવાનાં વિસ્મયપ્રદમ્ ।
ઘોરરૂપં ગિરિપ્રખ્યં તમોગુણમિવાપરમ્ ॥ ૩૭॥

તતો વિષ્ણુશરીરાત્તુ તેજોરાશિમિવાપરમ્ ।
નીલં સત્ત્વગુણોપેતં પ્રાદુરાસ મહાદ્યુતિ ॥ ૩૮॥

તતશ્ચેન્દ્રશરીરાત્તુ ચિત્રરૂપં દુરાસદમ્ ।
આવિરાસીત્સુસંવૃત્તં તેજઃ સર્વગુણાત્મકમ્ ॥ ૩૯॥

કુબેરયમવહ્નીનાં શરીરેભ્યઃ સમન્તતઃ ।
નિશ્ચક્રામ મહત્તેજો વરુણસ્ય તથૈવ ચ ॥ ૪૦॥

અન્યેષાં ચૈવ દેવાનાં શરીરેભ્યોઽતિભાસ્વરમ્ ।
નિર્ગતં તન્મહાતેજોરાશિરાસીન્મહોજ્જ્વલઃ ॥ ૪૧॥

તં દૃષ્ટ્વા વિસ્મિતાઃ સર્વે દેવા વિષ્ણુપુરોગમાઃ ।
તેજોરાશિં મહાદિવ્યં હિમાચલમિવાપરમ્ ॥ ૪૨॥

પશ્યતાં તત્ર દેવાનાં તેજઃપુઞ્જસમુદ્ભવા ।
બભૂવાતિવરા નારી સુન્દરી વિસ્મયપ્રદા ॥ ૪૩॥

ત્રિગુણા સા મહાલક્ષ્મીઃ સર્વદેવશરીરજા ।
અષ્ટાદશભુજા રમ્યા ત્રિવર્ણા વિશ્વમોહિની ॥ ૪૪॥

શ્વેતાનના કૃષ્ણનેત્રા સંરક્તાધરપલ્લવા ।
તામ્રપાણિતલા કાન્તા દિવ્યભૂષણભૂષિતા ॥ ૪૫॥

અષ્ટાદશભુજા દેવી સહસ્રભુજમણ્ડિતા ।
સમ્ભૂતાસુરનાશાય તેજોરાશિસમુદ્ભવા ॥ ૪૬॥

જનમેજય ઉવાચ ।
કૃષ્ણ દેવ મહાભાગ સર્વજ્ઞ મુનિસત્તમ ।
વિસ્તરં બ્રૂહિ તસ્યાસ્ત્વં શરીરસ્ય સમુદ્ભવમ્ ॥ ૪૭॥

એકીભૂતં ચ સર્વેષાં તેજઃ કિં વા પૃથક્ સ્થિતમ્ ।
અઙ્ગાનિ ચૈવ તસ્યાસ્તુ સર્વતેજોમયાનિ વા ॥ ૪૮॥

ભિન્નભાગવિભાગેન જાતાન્યઙ્ગાનિ યાનિ તુ ।
મુખનાસાક્ષિભેદેન સર્વત્રૈકભવાનિ ચ ॥ ૪૯॥

બ્રૂહિ તદ્વિસ્તરં વ્યાસ શરીરાઙ્ગસમુદ્ભવમ્ ।
બભૂવ યસ્ય દેવસ્ય તેજસોઽઙ્ગં યદદ્ભુતમ્ ॥ ૫૦॥

આયુધાભરણાદીનિ દત્તાનિ યૈર્યથા યથા ।

તત્સર્વં શ્રોતુકામોઽસ્મિ ત્વન્મુખામ્બુજનિર્ગતમ્ ॥ ૫૧॥

ન હિ તૃપ્યામ્યહં બ્રહ્મન્ સુધામયરસં પિબન્ ।
ચરિતઞ્ચ મહાલક્ષ્યાસ્ત્વન્મુખામ્ભોજનિઃસૃતમ્ ॥ ૫૨॥

સૂત ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા રાજ્ઞઃ સત્યવતીસુતઃ ।
ઉવાચ મધુરં વાક્યં પ્રીણયન્નિવ ભૂપતિમ્ ॥ ૫૩॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્મહાભાગ વિસ્તરેણ બ્રવીમિ તે ।
યથામતિ કુરુશ્રેષ્ઠ તસ્યા દેહસમુદ્ભવમ્ ॥ ૫૪॥

ન બ્રહ્મા ન હરિઃ સાક્ષાન્ન રુદ્રો ન ચ વાસવઃ ।
યાથાતથ્યેન તદ્રૂપં વક્તુમીશઃ કદાચન ॥ ૫૫॥

કથં જાનામ્યહં દેવ્યા યદ્રૂપં યાદૃશં યતઃ ।
વાચારમ્ભણમાત્રં તદુત્પન્નેતિ બ્રવીમિ યત્ ॥ ૫૬॥

સા નિત્યા સર્વદૈવાસ્તે દેવકાર્યાર્થસિદ્ધયે ।
નાનારૂપા ત્વેકરૂપા જાયતે કાર્યગૌરવાત્ ॥ ૫૭॥

યથા નટો રઙ્ગગતો નાનારૂપો ભવત્યસૌ ।
એકરૂપસ્વભાવોઽપિ લોકરઞ્જનહેતવે ॥ ૫૮॥

તથૈષા દેવકાર્યાર્થમરૂપાપિ સ્વલીલયા ।
કરોતિ બહુરૂપાણિ નિર્ગુણા સગુણાનિ ચ ॥ ૫૯॥

કાર્યકર્માનુસારેણ નામાનિ પ્રભવન્તિ હિ ।
ધાત્વર્થગુણયુક્તાનિ ગૌણાનિ સુબહૂન્યપિ ॥ ૬૦॥

તદ્વૈ બુદ્ધ્યનુસારેણ પ્રબ્રવીમિ નરાધિપ ।
યથા તેજઃસમુદ્ભૂતં રૂપં તસ્યા મનોહરમ્ ॥ ૬૧॥

શઙ્કરસ્ય ચ યત્તેજસ્તેન તન્મુખપઙ્કજમ્ ।
શ્વેતવર્ણં શુભાકારમજાયત મહત્તરમ્ ॥ ૬૨॥

કેશાસ્તસ્યાસ્તથા સ્નિગ્ધા યામ્યેન તેજસાભવન્ ।
વક્રાગ્રાશ્ચાતિદીર્ઘા વૈ મેઘવર્ણા મનોહરાઃ ॥ ૬૩॥

નયનત્રિતયં તસ્યા જજ્ઞે પાવકતેજસા ।

કૃષ્ણં રક્તં તથા શ્વેતં વર્ણત્રયવિભૂષિતમ્ ॥ ૬૪॥

વક્રે સ્નિગ્ધે કૃષ્ણવર્ણે સન્ધ્યયોસ્તેજસા ભ્રુવૌ ।
જાતે દેવ્યાઃ સુતેજસ્કે કામસ્ય ધનુષીવ તે ॥ ૬૫॥

વાયોશ્ચ તેજસા શસ્તૌ શ્રવણૌ સમ્બભૂવતુઃ ।
નાતિદીર્ઘૌ નાતિહ્રસ્વૌ દોલાવિવ મનોભુવઃ ॥ ૬૬॥

તિલપુષ્પસમાકારા નાસિકા સુમનોહરા ।
સઞ્જાતા સ્નિગ્ધવર્ણા વૈ ધનદસ્ય ચ તેજસા ॥ ૬૭॥

દન્તાઃ શિખરિણઃ શ્લક્ષ્ણાઃ કુન્દાગ્રસદૃશાઃ સમાઃ ।
સઞ્જાતાઃ સુપ્રભા રાજન્ પ્રાજાપત્યેન તેજસા ॥ ૬૮॥

અધરશ્ચાતિરક્તોઽસ્યાઃ સઞ્જાતોઽરુણતેજસા ।
ઉત્તરોષ્ઠસ્તથા રમ્યઃ કાર્તિકેયસ્ય તેજસા ॥ ૬૯॥

અષ્ટાદશભુજાકારા બાહવો વિષ્ણુતેજસા ।
વસૂનાં તેજસાઙ્ગુલ્યો રક્તવર્ણાસ્તથાભવન્ ॥ ૭૦॥

સૌમ્યેન તેજસા જાતં સ્તનયોર્યુગ્મમુત્તમમ્ ।
ઐન્દ્રેણાસ્યાસ્તથા મધ્યં જાતં ત્રિવલિસંયુતમ્ ॥ ૭૧॥

જઙ્ઘોરૂ વરુણસ્યાથ તેજસા સમ્બભૂવતુઃ ।
નિતમ્બઃ સ તુ સઞ્જાતો વિપુલસ્તેજસા ભુવઃ ॥ ૭૨॥

એવં નારી શુભાકારા સુરૂપા સુસ્વરા ભૃશમ્ ।
સમુત્પન્ના તથા રાજંસ્તેજોરાશિસમુદ્ભવા ॥ ૭૩॥

તાં દૃષ્ટ્વા સુષ્ઠુસર્વાઙ્ગીં સુદતીં ચારુલોચનામ્ ।
મુદં પ્રાપુઃ સુરાઃ સર્વે મહિષેણ પ્રપીડિતાઃ ॥ ૭૪॥

વિષ્ણુસ્ત્વાહ સુરાન્સર્વાન્ભૂષણાન્યાયુધાનિ ચ ।
પ્રયચ્છન્તુ શુભાન્યસ્યૈ દેવાઃ સર્વાણિ સામ્પ્રતમ્ ॥ ૭૫॥

સ્વાયુધેભ્યઃ સમુત્પાદ્ય તેજોયુક્તાનિ સત્વરાઃ ।
સમર્પયન્તુ સર્વેઽદ્ય દેવ્યૈ નાનાયુધાનિ વૈ ॥ ૭૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે દેવ્યાઃ સ્વરૂપોદ્ભવવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૫.૮॥

## ૫.૯ નવમોઽધ્યાયઃ । મહિષમન્ત્રિણા દેવીવાર્તાવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
દેવા વિષ્ણુવચઃ શ્રુત્વા સર્વે પ્રમુદિતાસ્તદા ।
દદુશ્ચ ભૂષણાન્યાશુ વસ્ત્રાણિ સ્વાયુધાનિ ચ ॥ ૧॥

ક્ષીરોદશ્ચામ્બરે દિવ્યે રક્તે સૂક્ષ્મે તથાજરે ।
નિર્મલઞ્ચ તથા હારં પ્રીતસ્તસ્મૈ સુમણ્ડિતમ્ ॥ ૨॥

દદૌ ચૂડામણિં દિવ્યં સૂર્યકોટિસમપ્રભમ્ ।
કુણ્ડલે ચ તથા શુભ્રે કટકાનિ ભુજેષુ વૈ ॥ ૩॥

કેયૂરાન્કઙ્કણાન્દિવ્યાન્નાનારત્નવિરાજિતાન્ ।
દદૌ તસ્યૈ વિશ્વકર્મા પ્રસન્નેન્દ્રિયમાનસઃ ॥ ૪॥

નૂપુરૌ સુસ્વરૌ કાન્તૌ નિર્મલૌ રત્નભૂષિતૌ ।
દદૌ સૂર્યપ્રતીકાશૌ ત્વષ્ટા તસ્યૈ સુપાદયોઃ ॥ ૫॥

તથા ગ્રૈવેયકં રમ્યં દદૌ તસ્યૈ મહાર્ણવઃ ।
અઙ્ગુલીયકરત્નાનિ તેજોવન્તિ ચ સર્વશઃ ॥ ૬॥

અમ્લાનપઙ્કજાં માલાં ગન્ધાઢ્યાં ભ્રમરાનુગામ્ ।
તથૈવ વૈજયન્તીઞ્ચ વરુણઃ સમ્પ્રયચ્છત ॥ ૭॥

હિમવાનથ સન્તુષ્ટો રત્નાનિ વિવિધાનિ ચ ।
દદૌ ચ વાહનં સિંહં કનકાભં મનોહરમ્ ॥ ૮॥

ભૂષણૈર્ભૂષિતા દિવ્યૈઃ સા રરાજ વરા શુભા ।
સિંહારૂઢા વરારોહા સર્વલક્ષણસંયુતા ॥ ૯॥

વિષ્ણુશ્ચક્રાત્સમુત્પાદ્ય દદાવસ્યૈ રથાઙ્ગકમ્ ।
સહસ્રારં સુદીપ્તઞ્ચ દેવારિશિરસાં હરમ્ ॥ ૧૦॥

સ્વત્રિશૂલાત્સમુત્પાદ્ય શઙ્કરઃ શૂલમુત્તમમ્ ।
દદૌ દેવ્યૈ સુરારીણાં કૃન્તનં ભયનાશનમ્ ॥ ૧૧॥

વરુણશ્ચ પ્રસન્નાત્મા દદૌ શઙ્ખં સમુજ્વલમ્ ।
ઘોષવન્તં સ્વશઙ્ખાત્તુ સમુત્પાદ્ય સુમઙ્ગલમ્ ॥ ૧૨॥

હુતાશનસ્તથા શક્તિં શતઘ્નીં સુમનોજવામ્ ।

પ્રાયચ્છત્તુ પ્રસન્નાત્મા તસ્યૈ દૈત્યવિનાશિનીમ્ ॥ ૧૩॥

ઇષુધિં બાણપૂર્ણઞ્ચ ચાપં ચાદ્ભુતદર્શનમ્ ।
મારુતો દત્તવાંસ્તસ્યૈ દુરાકર્ષં ખરસ્વરમ્ ॥ ૧૪॥

સ્વવજ્રાદ્વજ્રમુત્પાદ્ય દદાવિન્દ્રોઽતિદારુણમ્ ।
ઘણ્ટામૈરાવતાત્તૂર્ણં સુશબ્દાં ચાતિસુન્દરામ્ ॥ ૧૫॥

દદૌ દણ્ડં યમઃ કામં કાલદણ્ડસમુદ્ભવમ્ ।
યેનાન્તં સર્વભૂતાનામકરોત્કાલ આગતે ॥ ૧૬॥

બ્રહ્મા કમણ્ડલું દિવ્યં ગઙ્ગાવારિપ્રપૂરિતમ્ ।
દદાવસ્યૈ મુદા યુક્તો વરુણઃ પાશમેવ ચ ॥ ૧૭॥

કાલઃ ખડ્ગં તથા ચર્મ પ્રાયચ્છત્તુ નરાધિપ ।
પરશું વિશ્વકર્મા ચ તીક્ષ્ણમસ્યૈ દદાવથ ॥ ૧૮॥

ધનદસ્તુ સુરાપૂર્ણં પાનપાત્રં સુવર્ણજમ્ ।
પઙ્કજં વરુણશ્ચાદાદ્દેવ્યૈ દિવ્યં મનોહરમ્ ॥ ૧૯॥

ગદાં કૌમોદકીં ત્વષ્ટા ઘણ્ટાશતનિનાદિનીમ્ ।
અદાત્તસ્યૈ પ્રસન્નાત્મા સુરશત્રુવિનાશિનીમ્ ॥ ૨૦॥

અસ્ત્રાણ્યનેકરૂપાણિ તથાભેદ્યઞ્ચ દંશનમ્ ।
દદૌ ત્વષ્ટા જગન્માત્રે નિજરશ્મીન્દિવાકરઃ ॥ ૨૧॥

સાયુધાં ભૂષણૈર્યુક્તાં દૃષ્ટ્વા તે વિસ્મયં ગતાઃ ।
તુષ્ટુવુસ્તાં સુરા દેવીં ત્રૈલોક્યમોહિનીં શિવામ્ ॥ ૨૨॥

દેવા ઊચુઃ ।
નમઃ શિવાયૈ કલ્યાણ્યૈ શાન્ત્યૈ પુષ્ટ્યૈ નમો નમઃ ।
ભગવત્યૈ નમો દેવ્યૈ રુદ્રાણ્યૈ સતતં નમઃ ॥ ૨૩॥

કાલરાત્ર્યૈ તથામ્બાયૈ ઇન્દ્રાણ્યૈ તે નમો નમઃ ।
સિદ્ધ્યૈ બુદ્ધ્યૈ તથા વૃદ્ધ્યૈ વૈષ્ણવ્યૈ તે નમો નમઃ ॥ ૨૪॥

પૃથિવ્યાં યા સ્થિતા પૃથ્વ્યા ન જ્ઞાતા પૃથિવીઞ્ચ યા ।
અન્તઃસ્થિતા યમયતિ વન્દે તામીશ્વરીં પરામ્ ॥ ૨૫॥

માયાયાં યા સ્થિતા જ્ઞાતા માયયા ન ચ તામજામ્ ।
અન્તઃસ્થિતા પ્રેરયતિ પ્રેરયિત્રીં નુમઃ શિવામ્ ॥ ૨૬॥

કલ્યાણં કુરુ ભો માતસ્ત્રાહિ નઃ શત્રુતાપિતાન્ ।
જહિ પાપં હયારિં ત્વં તેજસા સ્વેન મોહિતમ્ ॥ ૨૭॥

ખલં માયાવિનં ઘોરં સ્ત્રીવધ્યં વરદર્પિતમ્ ।
દુઃખદં સર્વદેવાનાં નાનારૂપધરં શતમ્ ॥ ૨૮॥

ત્વમેકા સર્વદેવાનાં શરણં ભક્તવત્સલે ।
પીડિતાન્દાનવેનાદ્ય ત્રાહિ દેવિ નમોઽસ્તુ તે ॥ ૨૯॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા તદા દેવી સુરૈઃ સર્વસુખપ્રદા ।
તાનુવાચ મહાદેવી સ્મિતપૂર્વં શુભં વચઃ ॥ ૩૦॥

દેવ્યુવાચ ।
ભયં ત્યજન્તુ ગીર્વાણા મહિષાન્મન્દચેતસઃ ।
હનિષ્યામિ રણેઽદ્યૈવ વરદૃપ્તં વિમોહિતમ્ ॥ ૩૧॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા સા સુરાન્દેવી જહાસાતીવ સુસ્વરમ્ ।
ચિત્રમેતચ્ચ સંસારે ભ્રમમોહયુતં જગત્ ॥ ૩૨॥

બ્રહ્મવિષ્ણુમહેશાદ્યાઃ સેન્દ્રાશ્ચાન્યે સુરાસ્તથા ।
કમ્પયુક્તા ભયત્રસ્તા વર્તન્તે મહિષાત્કિલ ॥ ૩૩॥

અહો દૈવબલં ઘોરં દુર્જયં સુરસત્તમાઃ ।
કાલઃ કર્તાસ્તિ દુઃખાનાં સુખાનાં પ્રભુરીશ્વરઃ ॥ ૩૪॥

સૃષ્ટિપાલનસંહારે સમર્થા અપિ તે યદા ।
મુહ્યન્તિ ક્લેશસન્તપ્તા મહિષેણ પ્રપીડિતાઃ ॥ ૩૫॥

ઇતિ કૃત્વા સ્મિતં દેવી સાટ્ટહાસં ચકાર હ ।
ઉચ્ચૈઃ શબ્દં મહાઘોરં દાનવાનાં ભયપ્રદમ્ ॥ ૩૬॥

ચકમ્પે વસુધા તત્ર શ્રુત્વા તચ્છબ્દમદ્ભુતમ્ ।
ચેલુશ્ચ પર્વતાઃ સર્વે ચુક્ષોભાબ્ધિશ્ચ વીર્યવાન્ ॥ ૩૭॥

મેરુશ્ચચાલ શબ્દેન દિશઃ સર્વાઃ પ્રપૂરિતાઃ ।
ભયં જગ્મુસ્તદા શ્રુત્વા દાનવાસ્તત્સ્વનં મહત્ ॥ ૩૮॥

જય પાહીતિ દેવાસ્તામૂચુઃ પરમહર્ષિતાઃ ।
મહિષોઽપિ સ્વનં શ્રુત્વા ચુકોપ મદગર્વિતઃ ॥ ૩૯॥

કિમેતદિતિ તાન્દૈત્યાન્પપ્રચ્છ સ્વનશઙ્કિતઃ ।
ગચ્છન્તુ ત્વરિતા દૂતા જ્ઞાતું શબ્દસમુદ્ભવમ્ ॥ ૪૦॥

કૃતઃ કેનાયમત્યુગ્રઃ શબ્દઃ કર્ણવ્યથાકરઃ ।
દેવો વા દાનવો વાપિ યો ભવેત્સ્વનકારકઃ ॥ ૪૧॥

ગૃહીત્વા તં દુરાત્માનં મત્સમીપં નયન્ત્વિહ ।
હનિષ્યામિ દુરાચારં ગર્જન્તં સ્મયદુર્મદમ્ ॥ ૪૨॥

ક્ષીણાયુષ્યં મન્દમતિં નયામિ યમસાદનમ્ ।
પરાજિતાઃ સુરાઃ કામં ન ગર્જન્તિ ભયાતુરાઃ ॥ ૪૩॥

નાસુરા મમ વશ્યાસ્તે કસ્યેદં મૂઢચેષ્ટિતમ્ ।
ત્વરિતા મામુપાયાન્તુ જ્ઞાત્વા શબ્દસ્ય કારણમ્ ॥ ૪૪॥

અહં ગત્વા હનિષ્યામિ તં પાપં વિતથશ્રમમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્તાસ્તેન તે દૂતા દેવીં સર્વાઙ્ગસુન્દરીમ્ ॥ ૪૫॥

અષ્ટાદશભુજાં દિવ્યાં સર્વાભરણભૂષિતામ્ ।
સર્વલક્ષણસમ્પન્નાં વરાયુધધરાં શુભામ્ ॥ ૪૬॥

દધતીં ચષકં હસ્તે પિબન્તીં ચ મુહુર્મધુ ।
સંવીક્ષ્ય ભયભીતાસ્તે જગ્મુસ્ત્રસ્તાઃ સુશઙ્કિતાઃ ॥ ૪૭॥

સકાશે મહિષસ્યાશુ તમૂચુઃ સ્વનકારણમ્ ।
દૂતા ઊચુઃ ।
દેવી દૈત્યેશ્વર પ્રૌઢા દૃશ્યતે કાચિદઙ્ગના ॥ ૪૮॥

સર્વાઙ્ગભૂષણા નારી સર્વરત્નોપશોભિતા ।
ન માનુષી નાસુરી સા દિવ્યરૂપા મનોહરા ॥ ૪૯॥

સિંહારૂઢાયુધધરા ચાષ્ટાદશકરા વરા ।
સા નાદં કુરુતે નારી લક્ષ્યતે મદગર્વિતા ॥ ૫૦॥

સુરાપાનરતા કામં જાનીમો ન સભર્તૃકા ।
અન્તરિક્ષસ્થિતા દેવાસ્તાં સ્તુવન્તિ મુદાન્વિતાઃ ॥ ૫૧॥

જયેતિ પાહિ નશ્વેતિ જહિ શત્રુમિતિ પ્રભો ।
ન જાને કા વરારોહા કસ્ય વા સા પરિગ્રહઃ ॥ ૫૨॥

કિમર્થમાગતા ચાત્ર કિં ચિકીર્ષતિ સુન્દરી ।
દ્રષ્ટું નૈવ સમર્થાઃ સ્મસ્તત્તેજઃપરિધર્ષિતાઃ ॥ ૫૩॥

શ‍ૃઙ્ગારવીરહાસાઢ્યા રૌદ્રાદ્ભુતરસાન્વિતા ।
દૃષ્ટ્વૈવૈવંવિધાં નારીમસમ્ભાષ્ય સમાગતાઃ ॥ ૫૪॥

વયં ત્વદાજ્ઞયા રાજન્ કિં કર્તવ્યમતઃપરમ્ ।
મહિષ ઉવાચ ।
ગચ્છ વીર મયાદિષ્ટો મન્ત્રિશ્રેષ્ઠ બલાન્વિતઃ ॥ ૫૫॥

સામાદિભિરુપાયૈસ્ત્વં સમાનય શુભાનનામ્ ।
નાયાતિ યદિ સા નારી ત્રિભિઃ સામાદિભિસ્ત્વિહ ॥ ૫૬॥

અહત્વા તાં વરારોહાં ત્વમાનય મમાન્તિકમ્ ।
કરોમિ પટ્ટમહિષીં તાં મરાલભ્રુવં મુદા ॥ ૫૭॥

પ્રીતિયુક્તા સમાયાતિ યદિ સા મૃગલોચના ।
રસભઙ્ગો યથા ન સ્યાત્તથા કુરુ મમેપ્સિતમ્ ॥ ૫૮॥

શ્રવણાન્મોહિતોઽસ્મ્યદ્ય તસ્યા રૂપસ્ય સમ્પદા ।
વ્યાસ ઉવાચ ।
મહિષસ્ય વચઃ શ્રુત્વા પેશલં મન્ત્રિસત્તમઃ ॥ ૫૯॥

જગામ તરસા કામં ગજાશ્વરથસંયુતઃ ।
ગત્વા દૂરતરં સ્થિત્વા તામુવાચ મનસ્વિનીમ્ ॥ ૬૦॥

વિનયાવનતઃ શ્લક્ષ્ણં મન્ત્રી મધુરયા ગિરા ।
પ્રધાન ઉવાચ ।
કાસિ ત્વં મધુરાલાપે કિમત્રાગમનં કૃતમ્ ॥ ૬૧॥

પૃચ્છતિ ત્વાં મહાભાગે મન્મુખેન મમ પ્રભુઃ ।
સ જેતા સર્વદેવાનામવધ્યસ્તુ નરૈઃ કિલ ॥ ૬૨॥

બ્રહ્મણો વરદાનેન ગર્વિતશ્ચારુલોચને ।
દૈત્યેશ્વરોઽસૌ બલવાન્કામરૂપધરઃ સદા ॥ ૬૩॥

શ્રુત્વા ત્વાં સમુપાયાતાં ચારુવેષાં મનોહરામ્ ।

દ્રષ્ટુમિચ્છતિ રાજા મે મહિષો નામ પાર્થિવઃ ॥ ૬૪॥

માનુષં રૂપમાદાય ત્વત્સમીપં સમેષ્યતિ ।
યથા રુચ્યેત ચાર્વઙ્ગિ તથા મન્યામહે વયમ્ ॥ ૬૫॥

તર્હ્યેહિ મૃગશાવાક્ષિ સમીપં તસ્ય ધીમતઃ ।
નો ચેદિહાનયામ્યેનં રાજાનં ભક્તિતત્પરમ્ ॥ ૬૬॥

તથા કરોમિ દેવેશિ યથા તે મનસેપ્સિતમ્ ।
વશગોઽસૌ તવાત્યર્થં રૂપસંશ્રવણાત્તવ ॥ ૬૭॥

કરભોરુ વદાશુ ત્વં સંવિધેયં મયા તથા ॥ ૬૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે મહિષમન્ત્રિણા
દેવીવાર્તાવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૫.૯॥

## ૫.૧૦ દશમોઽધ્યાયઃ । મન્ત્રીદ્વારા મહિષાસુરેણ દેવ્યા સહ વિવાહપ્રસ્તાવઃ ।

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રહસ્ય પ્રમદોત્તમા ।
તમુવાચ મહારાજ મેઘગમ્ભીરયા ગિરા ॥ ૧॥

દેવ્યુવાચ ।
મન્ત્રિવર્ય સુરાણાં વૈ જનનીં વિદ્ધિ માં કિલ ।
મહાલક્ષ્મીમિતિ ખ્યાતાં સર્વદૈત્યનિષૂદિનીમ્ ॥ ૨॥

પ્રાર્થિતાહં સુરૈઃ સર્વૈર્મહિષસ્ય વધાય ચ ।
પીડિતૈર્દાનવેન્દ્રેણ યજ્ઞભાગબહિષ્કૃતૈઃ ॥ ૩॥

તસ્માદિહાગતાસ્મ્યદ્ય તદ્વધાર્થં કૃતોદ્યમા ।
એકાકિની ન સૈન્યેન સંયુતા મન્ત્રિસત્તમ ॥ ૪॥

યત્ત્વયાહં સામપૂર્વં કૃત્વા સ્વાગતમાદરાત્ ।
ઉક્તા મધુરયા વાચા તેન તુષ્ટાસ્મિ તેઽનઘ ॥ ૫॥

નોચેદ્ધન્મિ દૃશા ત્વાં વૈ કાલાગ્નિસમયા કિલ ।
કસ્ય પ્રીતિકરં ન સ્યાન્માધુર્યવચનં ખલુ ॥ ૬॥

ગચ્છ તં મહિષં પાપં વદ મદ્વચનાદિદમ્ ।

ગચ્છ પાતાલમધુના જીવિતેચ્છા યદસ્તિ તે ॥ ૭॥

નોચેત્કૃતાગસં દુષ્ટં હનિષ્યામિ રણાઙ્ગણે ।
મદ્બાણક્ષુણ્ણદેહસ્ત્વં ગન્તાસિ યમસાદનમ્ ॥ ૮॥

દયાલુત્વં મમેદં ત્વં વિદિત્વા ગચ્છ સત્વરમ્ ।
હતે ત્વયિ સુરા મૂઢ સ્વર્ગં પ્રાપ્સ્યન્તિ સત્વરમ્ ॥ ૯॥

તસ્માદ્ ગચ્છસ્વ ત્યક્ત્વૈકો મેદિનીઞ્ચ સસાગરામ્ ।
પાતાલં તરસા મન્દ યાવદ્ બાણા ન મેઽપતન્ ॥ ૧૦॥

યુદ્ધેચ્છા ચેન્મનસિ તે તર્હ્યેહિ ત્વરિતોઽસુર ।
વીરૈર્મહાબલૈઃ સર્વૈર્નયામિ યમસાદનમ્ ॥ ૧૧॥

યુગે યુગે મહામૂઢ હતાસ્ત્વત્સદૃશાઃ કિલ ।
અસઙ્ખ્યાતાસ્તથા ત્વાં વૈ હનિષ્યામિ રણાઙ્ગણે ॥ ૧૨॥

સાફલ્યં કુરુ શસ્ત્રાણાં ધારણે તુ શ્રમોઽન્યથા ।
તદ્યુધ્યસ્વ મયા સાર્ધં સમરે સ્મરપીડિતઃ ॥ ૧૩॥

મા ગર્વં કુરુ દુષ્ટાત્મન્ યન્મેઽસ્તિ બ્રહ્મણો વરઃ ।
સ્ત્રીવધ્યત્વે ત્વયા મૂઢ પીડિતાઃ સુરસત્તમાઃ ॥ ૧૪॥

કર્તવ્યં વચનં ધાતુસ્તેનાહં ત્વામુપાગતા ।
સ્ત્રીરૂપમતુલં કૃત્વા સત્યં હન્તું કૃતાગસમ્ ॥ ૧૫॥

યથેચ્છં ગચ્છ વા મૂઢ પાતાલં પન્નગાવૃતમ્ ।
હિત્વા ભૂસુરસદ્માદ્ય જીવિતેચ્છા યદસ્તિ તે ॥ ૧૬॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તઃ સ તતો દેવ્યા મન્ત્રિશ્રેષ્ઠો બલાન્વિતઃ ।
પ્રત્યુવાચ નિશમ્યાસૌ વચનં હેતુગર્ભિતમ્ ॥ ૧૭॥

દેવિ સ્ત્રીસદૃશં વાક્યં બ્રૂષે ત્વં મદગર્વિતા ।
ક્વાસૌ ક્વ ત્વં કથં યુદ્ધમસમ્ભાવ્યમિદં કિલ ॥ ૧૮॥

એકાકિની પુનર્બાલા પ્રારબ્ધયૌવના મૃદુઃ ।
મહિષોઽસૌ મહાકાયો દુર્વિભાવ્યં હિ સઙ્ગતમ્ ॥ ૧૯॥

સૈન્યં બહુવિધં તસ્ય હસ્ત્યશ્વરથસઙ્કુલમ્ ।
પદાતિગણસંવિદ્ધં નાનાયુધવિરાજિતમ્ ॥ ૨૦॥

કઃ શ્રમઃ કરિરાજસ્ય માલતીપુષ્પમર્દને ।
મારણે તવ વામોરુ મહિષસ્ય તથા રણે ॥ ૨૧॥

યદિ ત્વાં પરુષં વાક્યં બ્રવીમિ સ્વલ્પમપ્યહમ્ ।
શ‍ૃઙ્ગારે તદ્વિરુદ્ધં હિ રસભઙ્ગાદ્બિભેમ્યહમ્ ॥ ૨૨॥

રાજાસ્માકં સુરરિપુર્વર્તતે ત્વયિ ભક્તિમાન્ ।
સામમેવ મયા વાચ્યં દાનયુક્તં તથા વચઃ ॥ ૨૩॥

નોચેદ્ધન્મ્યહમદ્યૈવ બાણેન ત્વાં મૃષાવદામ્ ।
મિથ્યાભિમાનચતુરાં રૂપયૌવનગર્વિતામ્ ॥ ૨૪॥

સ્વામી મે મોહિતઃ શ્રુત્વા રૂપં તે ભુવનાતિગમ્ ।
તત્પ્રિયાર્થં પ્રિયં કામં વક્તવ્યં ત્વયિ યન્મયા ॥ ૨૫॥

રાજ્યં તવ ધનં સર્વં દાસસ્તે મહિષઃ કિલ ।
કુરુ ભાવં વિશાલાક્ષિ ત્યક્ત્વા રોષં મૃતિપ્રદમ્ ॥ ૨૬॥

પતામિ પાદયોસ્તેઽહં ભક્તિભાવેન ભામિનિ ।
પટ્ટરાજ્ઞી મહારાજ્ઞો ભવ શીઘ્રં શુચિસ્મિતે ॥ ૨૭॥

ત્રૈલોક્યવિભવં સર્વં પ્રાપ્સ્યસિ ત્વમનાવિલમ્ ।
સુખં સંસારજં સર્વં મહિષસ્ય પરિગ્રહાત્ ॥ ૨૮॥

દેવ્યુવાચ ।
શ‍ૃણુ સાચિવ વક્ષ્યામિ વાક્યાનાં સારમુત્તમમ્ ।
શાસ્ત્રદૃષ્ટેન માર્ગેણ ચાતુર્યમનુચિન્ત્ય ચ ॥ ૨૯॥

મહિષસ્ય પ્રધાનસ્ત્વં મયા જ્ઞાતં ધિયા કિલ ।
પશુબુદ્ધિસ્વભાવોઽસિ વચનાત્તવ સામ્પ્રતમ્ ॥ ૩૦॥

મન્ત્રિણસ્ત્વાદૃશા યસ્ય સ કથં બુદ્ધિમાન્ભવેત્ ।
ઉભયોઃ સદૃશો યોગઃ કૃતોઽયં વિધિના કિલ ॥ ૩૧॥

યદુક્તં સ્ત્રીસ્વભાવાસિ તદ્વિચારસ્ય મૂઢ કિમ્ ।
પુમાન્નાહં તત્સ્વભાવાભવંસ્ત્રીવેષધારિણી ॥ ૩૨॥

યાચિતં મરણં પૂર્વં સ્ત્રિયા ત્વત્પ્રભુણા યથા ।
તસ્માન્મન્યેઽતિમૂર્ખોઽસૌ ન વીરરસવિત્તમઃ ॥ ૩૩॥

કામિન્યા મરણં ક્લીબરતિદં શૂરદુઃખદમ્ ।
પ્રાર્થિતં પ્રભુણા તેન મહિષેણાત્મબુદ્ધિના ॥ ૩૪॥

તસ્માત્સ્ત્રીરૂપમાધાય કાર્યં કર્તુમુપાગતા ।
કથં બિભેમિ ત્વદ્વાક્યૈર્ધર્મશાસ્ત્રવિરોધકૈઃ ॥ ૩૫॥

વિપરીતં યદા દૈવં તૃણં વજ્રસમં ભવેત્ ।
વિધિશ્ચેત્સુમુખઃ કામં કુલિશં તૂલવત્તદા ॥ ૩૬॥

કિં સૈન્યૈરાયુધૈઃ કિં વા પ્રપઞ્ચૈર્દુર્ગસેવનૈઃ ।
મરણં સામ્પ્રતં યસ્ય તસ્ય સૈન્યૈસ્તુ કિં ફલમ્ ॥ ૩૭॥

યદાયં દેહસમ્બન્ધો જીવસ્ય કાલયોગતઃ ।
તદૈવ લિખિતં સર્વં સુખં દુઃખં તથા મૃતિઃ ॥ ૩૮॥

યસ્ય યેન પ્રકારેણ મરણં દૈવનિર્મિતમ્ ।
તસ્ય તેનૈવ જાયેત નાન્યથેતિ વિનિશ્ચયઃ ॥ ૩૯॥

બ્રહ્માદીનાં યથા કાલે નાશોત્પત્તી વિનિર્મિતે ।
તથૈવ ભવતઃ કામં કિમન્યેષાં વિચાર્યતે ॥ ૪૦॥

યે મૃત્યુધર્મિણસ્તેષાં વરદાનેન દર્પિતાઃ ।
મરિષ્યામો ન મન્યન્તે તે મૂઢા મન્દચેતસઃ ॥ ૪૧॥

તસ્માદ્ ગચ્છ નૃપં બ્રૂહિ વચનં મમ સત્વરમ્ ।
યદાજ્ઞાપયતે ભૂપસ્તત્કર્તવ્યં ત્વયા કિલ ॥ ૪૨॥

મઘવા સ્વર્ગમાપ્નોતુ દેવાઃ સન્તુ હવિર્ભુજઃ ।
યૂયં પ્રયાત પાતાલં યદિ જીવિતુમિચ્છથ ॥ ૪૩॥

અન્યથા ચેન્મતિર્મન્દ મહિષસ્ય દુરાત્મનઃ ।
તદ્યુધ્યસ્વ મયા સાર્ધં મરણાય કૃતાદરઃ ॥ ૪૪॥

મન્યસે સઙ્ગરે ભગ્ના દેવા વિષ્ણુપુરોગમાઃ ।
દૈવં હિ કારણં તત્ર વરદાનં પ્રજાપતેઃ ॥ ૪૫॥

વ્યાસ ઉવાચ ।
ઇતિ દેવ્યા વચઃ શ્રુત્વા ચિન્તયામાસ દાનવઃ ।
કિં કર્તવ્યં મયા યુદ્ધં ગન્તવ્યં વા નૃપં પ્રતિ ॥ ૪૬॥

વિવાહાર્થમિહાજ્ઞપ્તો રાજ્ઞા કામાતુરેણ વૈ ।

તત્કથં વિરસં કૃત્વા ગચ્છેયં નૃપસન્નિધૌ ॥ ૪૭॥

ઇયં બુદ્ધિઃ સમીચીના યદ્ વ્રજામિ કલિં વિના ।
યથાગતં તથા શીઘ્રં રાજ્ઞે સંવેદયામ્યહમ્ ॥ ૪૮॥

સ પ્રમાણં પુનઃ કાર્યે રાજા મતિમતાં વરઃ ।
કરિષ્યતિ વિચાર્યૈવ સચિવૈર્નિપુણૈઃ સહ ॥ ૪૯॥

સહસા ન મયા યુદ્ધં કર્તવ્યમનયા સહ ।
જયે પરાજયે વાપિ ભૂપતેરપ્રિયં ભવેત્ ॥ ૫૦॥

યદિ માં સુન્દરી હન્યાદહં વા હન્મિ તાં પુનઃ ।
યેન કેનાપ્યુપાયેન સ કુપ્યેત્પાર્થિવઃ કિલ ॥ ૫૧॥

તસ્માત્તત્રૈવ ગત્વાહં બોધયિષ્યામિ તં નૃપમ્ ।
યથાદ્યાભિહિતં દેવ્યા યથારુચિ કરોતુ સઃ ॥ ૫૨॥

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય મેધાવી જગામ નૃપસન્નિધૌ ।
પ્રણમ્ય તમુવાચેદં કૃતાઞ્જલિરમાત્યકઃ ॥ ૫૩॥

મન્ત્ર્યુવાચ ।
રાજન્ દેવી વરારોહા સિંહસ્યોપરિ સંસ્થિતા ।
અષ્ટાદશભુજા રમ્યા વરાયુધધરા પરા ॥ ૫૪॥

સા મયોક્તા મહારાજ મહિષં ભજ ભામિનિ ।
મહિષી ભવ રાજ્ઞસ્ત્વં ત્રૈલોક્યાધિપતેઃ પ્રિયા ॥ ૫૫॥

પટ્ટરાજ્ઞી ત્વમેવાસ્ય ભવિતા નાત્ર સંશયઃ ।
સ તવાજ્ઞાકરો જાતો વશવર્તી ભવિષ્યતિ ॥ ૫૬॥

ત્રૈલોક્યવિભવં ભુક્ત્વા ચિરકાલં વરાનને ।
મહિષં પતિમાસાદ્ય યોષિતાં સુભગા ભવ ॥ ૫૭॥

ઇતિ મદ્વચનં શ્રુત્વા સા સ્મયાવેશમોહિતા ।
મામુવાચ વિશાલાક્ષી સ્મિતપૂર્વમિદં વચઃ ॥ ૫૮॥

મહિષીગર્ભસમ્ભૂતં પશૂનામધમં કિલ ।
બલિં દાસ્યામ્યહં દેવ્યૈ સુરાણાં હિતકામ્યયા ॥ ૫૯॥

કા મૂઢા કામિની લોકે મહિષં વૈ પતિં ભજેત્ ।

માદૃશી મન્દબુદ્ધે કિં પશુભાવં ભજેદિહ ॥ ૬૦॥

મહિષી મહિષં નાથં સશૃઙ્ગા શૃઙ્ગસંયુતમ્ ।
કુરુતે ક્રન્દમાના વૈ નાહં તત્સદૃશી શઠા ॥ ૬૧॥

કરિષ્યેઽહં મૃધે યુદ્ધં હનિષ્યે ત્વાં સુરાપ્રિયમ્ ।
ગચ્છ વા દુષ્ટ પાતાલં જીવિતેચ્છા યદસ્તિ તે ॥ ૬૨॥

પરુષં તુ તયા વાક્યમિત્યુક્તં નૃપ મત્તયા ।
તચ્છ્રુત્વાહં સમાયાતઃ પ્રવિચિન્ત્ય પુનઃ પુનઃ ॥ ૬૩॥

રસભઙ્ગં વિચિન્ત્યૈવ ન યુદ્ધં તુ મયા કૃતમ્ ।
આજ્ઞાં વિના તવાત્યન્તં કથં કુર્યાં વૃથોદ્યમમ્ ॥ ૬૪॥

સાતીવ ચ બલોન્મત્તા વર્તતે ભૂપ ભામિની ।
ભવિતવ્યં ન જાનામિ કિં વા ભાવિ ભવિષ્યતિ ॥ ૬૫॥

કાર્યેઽસ્મિંસ્ત્વં પ્રમાણં નો મન્ત્રોઽતીવ દુરાસદઃ ।
યુદ્ધં પલાયનં શ્રેયો ન જાનેઽહં વિનિશ્ચયમ્ ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે મન્ત્રીદ્વારા મહિષાસુરેણ
દેવ્યા સહ વિવાહપ્રસ્તાવો નામ દશમોઽધ્યાયઃ ॥ ૫.૧૦॥

## ૫.૧૧ એકાદશોઽધ્યાયઃ । તામ્રકૃતં દેવીં પ્રતિ વિસ્રંસનવચનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા મહિષો મદવિહ્વલઃ ।
મન્ત્રિવૃદ્ધાન્ સમાહૂય રાજા વચનમબ્રવીત્ ॥ ૧॥

રાજોવાચ ।
મન્ત્રિણઃ કિં ચ કર્તવ્યં વિશ્રબ્ધં બ્રૂત મા ચિરમ્ ।
આગતા દેવવિહિતા માયેયં શામ્બરીવ કિમ્ ॥ ૨॥

કાર્યેઽસ્મિન્નિપુણા યૂયમુપાયેષુ વિચક્ષણાઃ ।
સામાદિષુ ચ કર્તવ્યઃ કોઽત્ર મહ્યં બ્રુવન્તુ ચ ॥ ૩॥

મન્ત્રિણ ઊચુઃ ।
સત્યં સદૈવ વક્તવ્યં પ્રિયઞ્ચ નૃપસત્તમ ।

કાર્યં હિતકરં નૂનં વિચાર્ય વિબુધૈઃ કિલ ॥ ૪॥

સત્યં ચ હિતકૃદ્રાજન્પ્રિયં ચાહિતકૃદ્ભવેત્ ।
યથૌષધં નૃણાં લોકે હ્યપ્રિયં રોગનાશનમ્ ॥ ૫॥

સત્યસ્ય શ્રોતા મન્તા ચ દુર્લભઃ પૃથિવીપતે ।
વક્તાપિ દુર્લભઃ કામં બહવશ્ચાટુભાષકાઃ ॥ ૬॥

કથં બ્રૂમોઽત્ર નૃપતે વિચારે ગહને ત્વિહ ।
શુભં વાપ્યશુભં વાપિ કો વેત્તિ ભુવનત્રયે ॥ ૭॥

રાજોવાચ ।
સ્વસ્વમત્યનુસારેણ બ્રુવન્ત્વદ્ય પૃથક્પૃથક્ ।
યેષાં હિ યાદૃશો ભાવસ્તચ્છ્રુત્વા ચિન્તયામ્યહમ્ ॥ ૮॥

બહૂનાં મતમાજ્ઞાય વિચાર્ય ચ પુનઃ પુનઃ ।
યચ્છ્રેયસ્તદ્ધિ કર્તવ્યં કાર્યં કાર્યવિચક્ષણૈઃ ॥ ૯॥

વ્યાસ ઉવાચ ।
તસ્યૈવં વચનં શ્રુત્વા વિરૂપાક્ષો મહાબલઃ ।
ઉવાચ તરસા વાક્યં રઞ્જયન્પૃથિવીપતિમ્ ॥ ૧૦॥

વિરૂપાક્ષ ઉવાચ ।
રાજન્નારી વરાકીયં સા બ્રૂતે મદગર્વિતા ।
વિભીષિકામાત્રમિદં જ્ઞાતવ્યં વચનં ત્વયા ॥ ૧૧॥

કો બિભેતિ સ્ત્રિયો વાક્યૈર્દુરુક્તૈ રણદુર્મદૈઃ ।
અનૃતં સાહસં ચેતિ જાનન્નારીવિચેષ્ટિતમ્ ॥ ૧૨॥

જિત્વા ત્રિભુવનં રાજન્નદ્ય કાન્તાભયેન વૈ ।
દીનત્વેઽપ્યયશો નૂનં વીરસ્ય ભુવને ભવેત્ ॥ ૧૩॥

તસ્માદ્યામ્યહમેકાકી યુદ્ધાય ચણ્ડિકાં પ્રતિ ।
હનિષ્યે તાં મહારાજ નિર્ભયો ભવ સામ્પ્રતમ્ ॥ ૧૪॥

સેનાવૃતોઽહં ગત્વા તાં શસ્ત્રાસ્ત્રૈર્વિવિધૈઃ કિલ ।
નિષૂદયામિ દુર્મર્ષાં ચણ્ડિકાં ચણ્ડવિક્રમામ્ ॥ ૧૫॥

બદ્ધ્વા સર્પમયૈઃ પાશૈરાનયિષ્યે તવાન્તિકમ્ ।
વશગા તુ સદા તે સ્યાત્પશ્ય રાજન્ બલં મમ ॥ ૧૬॥

વ્યાસ ઉવાચ ।
વિરૂપાક્ષવચઃ શ્રુત્વા દુર્ધરો વાક્યમબ્રવીત્ ।
સત્યમુક્તં વચો રાજન્ વિરૂપાક્ષેણ ધીમતા ॥ ૧૭॥

મમાપિ વચનં શ્લક્ષ્ણં શ્રોતવ્યં ધીમતા ત્વયા ।
કામાતુરૈષા સુદતી લક્ષ્યતેઽપ્યનુમાનતઃ ॥ ૧૮॥

ભવત્યેવંવિધા કામં નાયિકા રૂપગર્વિતા ।
ભીષયિત્વા વરારોહા ત્વાં વશે કર્તુમિચ્છતિ ॥ ૧૯॥

હાવોઽયં માનિનીનાં વૈ તં વેત્તિ રસવિત્તમઃ ।
વક્રોક્તિરેષા કામિન્યાઃ પ્રિયં પ્રતિ પરાયણમ્ ॥ ૨૦॥

વેત્તિ કોઽપિ નરઃ કામં કામશાસ્ત્રવિચક્ષણઃ ।
યદુક્તં નામ બાણૈસ્ત્વા વધિષ્યે રણમૂર્ધનિ ॥ ૨૧॥

હેતુગર્ભમિદં વાક્યં જ્ઞાતવ્યં હેતુવિત્તમૈઃ ।
બાણાસ્તુ માનિનીનાં વૈ કટાક્ષા એવ વિશ્રુતાઃ ॥ ૨૨॥

પુષ્પાઞ્જલિમયાશ્ચાન્યે વ્યઙ્ગ્યાનિ વચનાનિ ચ ।
કા શક્તિરન્યબાણાનાં પ્રેરણે ત્વયિ પાર્થિવ ॥ ૨૩॥

તાદૃશીનાં ન સા શક્તિર્બ્રહ્મવિષ્ણુહરાદિષુ ।
યયોક્તં નેત્રબાણૈસ્ત્વાં હનિષ્યે મન્દ પાર્થિવમ્ ॥ ૨૪॥

વિપરીતં પરિજ્ઞાતં તેનારસવિદા કિલ ।
પાતયિષ્યામિ શય્યાયાં રણમય્યાં પતિં તવ ॥ ૨૫॥

વિપરીતરતિક્રીડાભાષણં જ્ઞેયમેવ તત્ ।
કરિષ્યે વિગતપ્રાણં યદુક્તં વચનં તયા ॥ ૨૬॥

વીર્યં પ્રાણા ઇતિ પ્રોક્તં તદ્વિહીનં ન ચાન્યથા ।
વ્યઙ્ગ્યાધિક્યેન વાક્યેન વરયત્યુત્તમા નૃપ ॥ ૨૭॥

તદ્વૈ વિચારતો જ્ઞેયં રસગ્રન્થવિચક્ષણૈઃ ।
ઇતિ જ્ઞાત્વા મહારાજ કર્તવ્યં રસસંયુતમ્ ॥ ૨૮॥

સામદાનદ્વયં તસ્યા નાન્યોપાયોઽસ્તિ ભૂપતે ।
રુષ્ટા વા ગર્વિતા વાપિ વશગા માનિની ભવેત્ ॥ ૨૯॥

તાદૃશૈર્મધુરૈર્વાક્યૈરાનયિષ્યે તવાન્તિકમ્ ।

કિં બહૂક્તેન મે રાજન્ કર્તવ્યા વશવર્તિની ॥ ૩૦॥

ગત્વા મયાધુનૈવેયં કિઙ્કરીવ સદૈવ તે ।
વ્યાસ ઉવાવ
ઇત્થં નિશમ્ય તદ્વાક્યં તામ્રસ્તત્ત્વવિચક્ષણઃ ॥ ૩૧॥

ઉવાચ વચનં રાજન્નિશામય મયોદિતમ્ ।
હેતુમદ્ધર્મસહિતં રસયુક્તં નયાન્વિતમ્ ॥ ૩૨॥

નૈષા કામાતુરા બાલા નાનુરક્તા વિચક્ષણા ।
વ્યઙ્ગ્યાનિ નૈવ વાક્યાનિ તયોક્તાનિ તુ માનદ ॥ ૩૩॥

ચિત્રમત્ર મહાબાહો યદેકા વરવર્ણિની ।
નિરાલમ્બા સમાયાતિ ચિત્રરૂપા મનોહરા ॥ ૩૪॥

અષ્ટાદશભુજા નારી ન શ્રુતા ન ચ વીક્ષિતા ।
કેનાપિ ત્રિષુ લોકેષુ પરાક્રમવતી શુભા ॥ ૩૫॥

આયુધાન્યપિ તાવન્તિ ધૃતાનિ બલવન્તિ ચ ।
વિપરીતમિદં મન્યે સર્વં કાલકૃતં નૃપ ॥ ૩૬॥

સ્વપ્નાનિ દુર્નિમિત્તાનિ મયા દૃષ્ટાનિ વૈ નિશિ ।
તેન જાનામ્યહં નૂનં વૈશસં સમુપાગતમ્ ॥ ૩૭॥

કૃષ્ણામ્બરધરા નારી રુદતી ચ ગૃહાઙ્ગણે ।
દૃષ્ટા સ્વપ્નેઽપ્યુષઃકાલે ચિન્તિતવ્યસ્તદત્યયઃ ॥ ૩૮॥

વિકૃતાઃ પક્ષિણો રાત્રૌ રોરુવન્તિ ગૃહે ગૃહે ।
ઉત્પાતા વિવિધા રાજન્ પ્રભવન્તિ ગૃહે ગૃહે ॥ ૩૯॥

તેન જાનામ્યહં નૂનં કારણં કિઞ્ચિદેવ હિ ।
યત્ત્વાં પ્રાર્થયતે બાલા યુદ્ધાય કૃતનિશ્ચયા ॥ ૪૦॥

નૈષાસ્તિ માનુષી નો વા ગાન્ધર્વી ન તથાસુરી ।
દેવૈઃ કૃતેયં જ્ઞાતવ્યા માયા મોહકરી વિભો ॥ ૪૧॥

કાતરત્વં ન કર્તવ્યં મમૈતન્મતમિત્યલમ્ ।
કર્તવ્યં સર્વથા યુદ્ધં યદ્ભાવ્યં તદ્ભવિષ્યતિ ॥ ૪૨॥

કો વેદ દૈવકર્તવ્યં શુભં વાપ્યશુભં તથા ।
અવલમ્બ્ય ધિયા ધૈર્યં સ્થાતવ્યં વૈ વિચક્ષણૈઃ ॥ ૪૩॥

જીવિતં મરણં પુંસાં દૈવાધીનં નરાધિપ ।
કોઽપિ નૈવાન્યથા કર્તું સમર્થો ભુવનત્રયે ॥ ૪૪॥

મહિષ ઉવાચ ।
ગચ્છ તામ્ર મહાભાગ યુદ્ધાય કૃતનિશ્ચયઃ ।
તામાનય વરારોહાં જિત્વા ધર્મેણ માનિનીમ્ ॥ ૪૫॥

ન ભવેદ્વશગા નારી સઙ્ગ્રામે યદિ સા તવ ।
હન્તવ્યા નાન્યથા કામં માનનીયા પ્રયત્નતઃ ॥ ૪૬॥

વીરસ્ત્વમસિ સર્વજ્ઞ કામશાસ્ત્રવિશારદઃ ।
યેન કેનાપ્યુપાયેન જેતવ્યા વરવર્ણિની ॥ ૪૭॥

ત્વરન્વીર મહાબાહો સૈન્યેન મહતા વૃતઃ ।
તત્ર ગત્વા ત્વયા જ્ઞેયા વિચાર્ય ચ પુનઃ પુનઃ ॥ ૪૮॥

કિમર્થમાગતા ચેયં જ્ઞાતવ્યં તદ્ધિ કારણમ્ ।
કામાદ્વા વૈરભાવાચ્ચ માયા કસ્યેયમિત્યુત ॥ ૪૯॥

આદૌ તન્નિશ્ચયં કૃત્વા જ્ઞાતવ્યં તચ્ચિકીર્ષિતમ્ ।
પશ્ચાદ્યુદ્ધં પ્રકર્તવ્યં યથાયોગ્યં યથાબલમ્ ॥ ૫૦॥

કાતરત્વં ન કર્તવ્યં નિર્દયત્વં તથા ન ચ ।
યાદૃશં હિ મનસ્તસ્યાઃ કર્તવ્યં તાદૃશં ત્વયા ॥ ૫૧॥

વ્યાસ ઉવાચ ।
ઇતિ તદ્ભાષિતં શ્રુત્વા તામ્રઃ કાલવશં ગતઃ ।
નિર્ગતઃ સૈન્યસંયુક્તઃ પ્રણમ્ય મહિષં નૃપમ્ ॥ ૫૨॥

ગચ્છન્માર્ગે દુરાત્માસૌ શકુનાન્વીક્ષ્ય દારુણાન્ ।
વિસ્મયઞ્ચ ભયં પ્રાપ યમમાર્ગપ્રદર્શકાન્ ॥ ૫૩॥

સગત્વા તાં સમાલોક્ય દેવીં સિંહોપરિસ્થિતામ્ ।
સ્તૂયમાનાં સુરૈઃ સર્વૈઃ સર્વાયુધવિભૂષિતામ્ ॥ ૫૪॥

તામુવાચ વિનીતઃ સન્ વાક્યં મધુરયા ગિરા ।
સામભાવં સમાશ્રિત્ય વિનયાવનતઃ સ્થિતઃ ॥ ૫૫॥

દેવિ દૈત્યેશ્વરઃ શ‍ૃઙ્ગી ત્વદ્રૂપગુણમોહિતઃ ।

સ્પૃહાં કરોતિ મહિષસ્ત્વત્પાણિગ્રહણાય ચ ॥ ૫૬॥

ભાવં કુરુ વિશાલાક્ષિ તસ્મિન્નમરદુર્જયે ।
પતિં તં પ્રાપ્ય મૃદ્વઙ્ગિ નન્દને વિહરાદ્ભુતે ॥ ૫૭॥

સર્વાઙ્ગસુન્દરં દેહં પ્રાપ્ય સર્વસુખાસ્પદમ્ ।
સુખં સર્વાત્મના ગ્રાહ્યં દુઃખં હેયમિતિ સ્થિતિઃ ॥ ૫૮॥

કરભોરુ કિમર્થં તે ગૃહીતાન્યાયુધાન્યલમ્ ।
પુષ્પકન્દુકયોગ્યાસ્તે કરાઃ કમલકોમલાઃ ॥ ૫૯॥

ભ્રૂચાપે વિદ્યમાનેઽપિ ધનુષા કિં પ્રયોજનમ્ ।
કટાક્ષા વિશિખાઃ સન્તિ કિં બાણૈર્નિષ્પ્રયોજનૈઃ ॥ ૬૦॥

સંસારે દુઃખદં યુદ્ધં ન કર્તવ્યં વિજાનતા ।
લોભાસક્તાઃ પ્રકુર્વન્તિ સઙ્ગ્રામઞ્ચ પરસ્પરમ્ ॥ ૬૧॥

પુષ્પૈરપિ ન યોદ્ધવ્યં કિં પુનર્નિશિતૈઃ શરૈઃ ।
ભેદનં નિજગાત્રાણાં કસ્ય તજ્જાયતે મુદે ॥ ૬૨॥

તસ્માત્ત્વમપિ તન્વઙ્ગિ પ્રસાદં કર્તુમર્હસિ ।
ભર્તારં ભજ મે નાથં દેવદાનવપૂજિતમ્ ॥ ૬૩॥

સ તેઽત્ર વાઞ્છિતં સર્વં કરિષ્યતિ મનોરથમ્ ।
ત્વં પટ્ટમહિષી રાજ્ઞઃ સર્વથા નાત્ર સંશયઃ ॥ ૬૪॥

વચનં કુરુ મે દેવિ પ્રાપ્સ્યસે સુખમુત્તમમ્ ।
સઙ્ગ્રામે જયસન્દેહઃ કષ્ટં પ્રાપ્ય ન સંશયઃ ॥ ૬૫॥

જાનાસિ રાજનીતિં ત્વં યથાવદ્વરવર્ણિનિ ।
ભુઙ્ક્ષ્વ રાજ્યસુખં પૂર્ણં વર્ષાણામયુતાયુતમ્ ॥ ૬૬॥

પુત્રસ્તે ભવિતા કાન્તઃ સોઽપિ રાજા ભવિષ્યતિ ।
યૌવને ક્રીડયિત્વાન્તે વાર્ધક્યે સુખમાપ્સ્યસિ ॥ ૬૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પઞ્ચમસ્કન્ધે
તામ્રકૃતં દેવીં પ્રતિ વિસ્રંસનવચનવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૫.૧૧॥

## ૫.૧૨ દ્વાદશોઽધ્યાયઃ । દેવીપરાજયકરણાય દુર્ધરપ્રબોધવચનમ્ ।

વ્યાસ ઉવાચ ।
તન્નિશમ્ય વચસ્તસ્ય તામ્રસ્ય જગદમ્બિકા ।
મેઘગમ્ભીરયા વાચા હસન્તી તમુવાચ હ ॥ ૧॥

દેવ્યુવાચ ।
ગચ્છ તામ્ર પતિં બ્રૂહિ મુમૂર્ષું મન્દચેતસમ્ ।
મહિષં ચાતિકામાર્તં મૂઢં જ્ઞાનવિવર્જિતમ્ ॥ ૨॥

યથા તે મહિષી માતા પ્રૌઢા યવસભક્ષિણી ।
નાહં તથા શ‍ૃઙ્ગવતી લમ્બપુચ્છા મહોદરી ॥ ૩॥

ન કામયેઽહં દેવેશં નૈવ વિષ્ણું ન શઙ્કરમ્ ।
ધનદં વરુણં નૈવ બ્રહ્માણં ન ચ પાવકમ્ ॥ ૪॥

એતાન્દેવગણાન્હિત્વા પશું કેન ગુણેન વૈ ।
વૃણોમ્યહં વૃથા લોકે ગર્હણા મે ભવેદિતિ ॥ ૫॥

નાહં પતિંવરા નારી વર્તતે મે પતિઃ પ્રભુઃ ।
સર્વકર્તા સર્વસાક્ષી હ્યકર્તા નિઃસ્પૃહઃ સ્થિરઃ ॥ ૬॥

નિર્ગુણો નિર્મમોઽનન્તો નિરાલમ્બો નિરાશ્રયઃ ।
સર્વજ્ઞઃ સર્વગઃ સાક્ષી પૂર્ણઃ પૂર્ણાશયઃ શિવઃ ॥ ૭॥

સર્વાવાસક્ષમઃ શાન્તઃ સર્વદૃક્સર્વભાવનઃ ।
તં ત્યક્ત્વા મહિષં મન્દં કથં સેવિતુમુત્સહે ॥ ૮॥

પ્રબુધ્ય યુધ્યતાં કામં કરોમિ યમવાહનમ્ ।
અથવા મનુજાનાં વૈ કરિષ્યે જલવાહકમ્ ॥ ૯॥

જીવિતેચ્છાસ્તિ ચેત્પાપ ગચ્છ પાતાલમાશુ વૈ ।
સમસ્તૈર્દાનવૈર્યુક્તસ્ત્વન્યથા હન્મિ સઙ્ગરે ॥ ૧૦॥

કામં સદૃશયોર્યોગઃ સંસારે સુખદો ભવેત્ ।
અન્યથા દુઃખદો ભૂયાદજ્ઞાનાદ્યદિ કલ્પિતઃ ॥ ૧૧॥

મૂર્ખસ્ત્વમસિ યદ્ બ્રૂષે પતિં મે ભજ ભામિનિ ।
ક્વાહં ક્વ મહિષઃ શ‍ૃઙ્ગી સમ્બન્ધઃ કીદૃશો દ્વયોઃ ॥ ૧૨॥

ગચ્છ યુધ્યસ્વ વા કામં હનિષ્યેઽહં સબાન્ધવમ્ ।

યજ્ઞભાગં દેવલોકં નોચેત્ત્યક્ત્વા સુખી ભવ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા સા તદા દેવી જગર્જ ભૃશમદ્ભુતમ્ ।
કલ્પાન્તસદૃશં નાદં ચક્રે દૈત્યભયાવહમ્ ॥ ૧૪॥

ચકમ્પે વસુધા ચેલુસ્તેન શબ્દેન ભૂધરાઃ ।
ગર્ભાશ્ચ દૈત્યપત્નીનાં સસ્રંસુર્ગર્જિતસ્વનાત્ ॥ ૧૫॥

તામ્રઃ શ્રુત્વા ચ તં શબ્દં ભયત્રસ્તમનાસ્તદા ।
પલાયનં તતઃ કૃત્વા જગામ મહિષાન્તિકમ્ ॥ ૧૬॥

નગરે તસ્ય યે દૈત્યાસ્તેઽપિ ચિન્તામવાપ્નુવન્ ।
બધિરીકૃતકર્ણાશ્ચ પલાયનપરા નૃપ ॥ ૧૭॥

તદા ક્રોધેન સિંહોઽપિ નનાદ ભૃશમુત્સટઃ ।
તેન નાદેન દૈતેયા ભયં જગ્મુરપિ સ્ફુટમ્ ॥ ૧૮॥

તામ્રં સમાગતં દૃષ્ટ્વા હયારિરપિ મોહિતઃ ।
ચિન્તયામાસ સચિવૈઃ કિં કર્તવ્યમતઃ પરમ્ ॥ ૧૯॥

દુર્ગગ્રહો વા કર્તવ્યો યુદ્ધં નિર્ગત્ય વા પુનઃ ।
પલાયને કૃતે શ્રેયો ભવેદ્વા દાનવોત્તમાઃ ॥ ૨૦॥

બુદ્ધિમન્તો દુરાધર્ષાઃ સર્વશાસ્ત્રવિશારદાઃ ।
મન્ત્રઃ ખલુ પ્રકર્તવ્યઃ સુગુપ્તઃ કાર્યસિદ્ધયે ॥ ૨૧॥

મન્ત્રમૂલં સ્મૃતં રાજ્યં યદિ સ સ્યાત્સુરક્ષિતઃ ।
મન્ત્રિભિશ્ચ સદાચારૈર્વિધેયઃ સર્વથા બુધૈઃ ॥ ૨૨॥

મન્ત્રભેદે વિનાશઃ સ્યાદ્રાજ્યસ્ય ભૂપતેસ્તથા ।
તસ્માદ્ભેદભયાદ્ ગુપ્તઃ કર્તવ્યો ભૂતિમિચ્છતા ॥ ૨૩॥

તદત્ર મન્ત્રિભિર્વાચ્યં વચનં હેતુમદ્ધિતમ્ ।
કાલદેશાનુસારેણ વિચિન્ત્ય નીતિનિર્ણયમ્ ॥ ૨૪॥

યા યોષાત્ર સમાયાતા પ્રબલા દેવનિર્મિતા ।
એકાકિની નિરાલમ્બા કારણં તદ્વિચિન્ત્યતામ્ ॥ ૨૫॥

યુદ્ધં પ્રાર્થયતે બાલા કિમાશ્ચર્યમતઃ પરમ્ ।
શ્રેયોઽત્ર વિપરીતં વા કો વેત્તિ ભુવનત્રયે ॥ ૨૬॥

ન બહૂનાં જયોઽપ્યસ્તિ નૈકસ્ય ચ પરાજયઃ ।
દૈવાધીનૌ સદા જ્ઞેયૌ યુદ્ધે જયપરાજયૌ ॥ ૨૭॥

ઉપાયવાદિનઃ પ્રાહુર્દૈવં કિં કેન વીક્ષિતમ્ ।
અદૃષ્ટમિતિ યન્નામ પ્રવદન્તિ મનીષિણઃ ॥ ૨૮॥

તત્સત્ત્વેઽપિ પ્રમાણં કિં કાતરાશાવલમ્બનમ્ ।
ન સમર્થજનાનાં હિ દૈવં કુત્રાપિ લક્ષ્યતે ॥ ૨૯॥

ઉદ્યમો દૈવમેતૌ હિ શૂરકાતરયોર્મતમ્ ।
વિચિન્ત્યાદ્ય ધિયા સર્વં કર્તવ્યં કાર્યમાદરાત્ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
ઇતિ રાજ્ઞો વચઃ શ્રુત્વા હેતુગર્ભં મહાયશાઃ ।
બિડાલાખ્યો મહારાજમિત્યુવાચ કૃતાઞ્જલિઃ ॥ ૩૧॥

રાજન્નેષા વિશાલાક્ષી જ્ઞાતવ્યા યત્નતઃ પુનઃ ।
કિમર્થમિહ સમ્પ્રાપ્તા કુતઃ કસ્ય પરિગ્રહઃ ॥ ૩૨॥

મરણં તે પરિજ્ઞાય સ્ત્રિયા સર્વાત્મના સુરૈઃ ।
પ્રેષિતા પદ્મપત્રાક્ષી સમુત્પાદ્ય સ્વતેજસા ॥ ૩૩॥

તેઽપિ છન્નાઃ સ્થિતાઃ ખેઽત્ર સર્વે યુદ્ધદિદૃક્ષવઃ ।
સમયેઽસ્યાઃ સહાયાસ્તે ભવિષ્યન્તિ યુયુત્સવઃ ॥ ૩૪॥

પુરતઃ કામિનીં કૃત્વા તે વૈ વિષ્ણુપુરોગમાઃ ।
વધિષ્યન્તિ ચ નઃ સર્વાન્સા ત્વાં યુદ્ધે હનિષ્યતિ ॥ ૩૫॥

એતચ્ચિકીર્ષિતં તેષાં મયા જ્ઞાતં નરાધિપ ।
ભવિતવ્યસ્ય ન જ્ઞાનં વર્તતે મમ સર્વથા ॥ ૩૬॥

યોદ્ધવ્યં ન ત્વયાદ્યેતિ નાહં વક્તું ક્ષમઃ પ્રભો ।
પ્રમાણં ત્વં મહારાજ કાર્યેઽત્ર દેવનિર્મિતે ॥ ૩૭॥

તદર્થેઽસ્માભિરનિશં મર્તવ્યં કાર્યગૌરવાત્ ।
વિહર્તવ્યં ત્વયા સાર્ધમેષ ધર્મોઽનુજીવિનામ્ ॥ ૩૮॥

વિચારોઽત્ર મહાનસ્તિ યદેકા કામિની નૃપ ।
યુદ્ધં પ્રાર્થયતેઽસ્માભિઃ સસૈન્યૈર્બલદર્પિતૈઃ ॥ ૩૯॥

દુર્મુખ ઉવાચ ।
રાજન્ યુદ્ધે જયો નોઽદ્ય ભવિતા વેદ્મ્યહં કિલ ।
પલાયનં ન કર્તવ્યં યશોહાનિકરં નૃણામ્ ॥ ૪૦॥

ઇન્દ્રાદીનાં સંયુગેઽપિ ન કૃતં યજ્જુગુપ્સિતમ્ ।
એકાકિનીં સ્ત્રિયં પ્રાપ્ય કો હિ કુર્યાત્પલાયનમ્ ॥ ૪૧॥

તસ્માદ્યુદ્ધં પ્રકર્તવ્યં મરણં વા રણે જયઃ ।
યદ્ભાવિ તદ્ભવત્યેવ કાત્ર ચિન્તા વિપશ્યતઃ ॥ ૪૨॥

મરણેઽત્ર યશઃપ્રાપ્તિર્જીવને ચ તથા સુખમ્ ।
ઉભયં મનસા કૃત્વા કર્તવ્યં યુદ્ધમદ્ય વૈ ॥ ૪૩॥

પલાયને યશોહાનિર્મરણં ચાયુષઃ ક્ષયે ।
તસ્માચ્છોકો ન કર્તવ્યો જીવિતે મરણે વૃથા ॥ ૪૪॥

વ્યાસ ઉવાચ ।
દુર્મુખસ્ય વચઃ શ્રુત્વા બાષ્કલો વાક્યમબ્રવીત્ ।
પ્રણતઃ પ્રાઞ્જલિર્ભૂત્વા રાજાનં વાક્યકોવિદઃ ॥ ૪૫॥

બાષ્કલ ઉવાચ ।
રાજંશ્ચિન્તા ન કર્તવ્યા કાર્યેઽસ્મિન્કાતરપ્રિયે ।
અહમેકો હનિષ્યામિ ચણ્ડીં ચઞ્ચલલોચનામ્ ॥ ૪૬॥

ઉત્સાહસ્તુ પ્રકર્તવ્યઃ સ્થાયીભાવો રસસ્ય ચ ।
ભયાનકો ભવેદ્વૈરી વીરસ્ય નૃપસત્તમ ॥ ૪૭॥

તસ્માત્ત્યક્ત્વા ભયં ભૂપ કરિષ્યે યુદ્ધમદ્ભુતમ્ ।
નયિષ્યામિ નરેન્દ્રાહં ચણ્ડિકાં યમસાદનમ્ ॥ ૪૮॥

ન બિભેમિ યમાદિન્દ્રાત્કુબેરાદ્વરુણાદપિ ।
વાયોર્વહ્નિસ્તથા વિષ્ણોઃ શઙ્કરાચ્છશિનો રવેઃ ॥ ૪૯॥

એકાકિની તથા નારી કિં પુનર્મદગર્વિતા ।
અહં તાં નિહનિષ્યામિ વિશિખૈશ્ચ શિલાશિતૈઃ ॥ ૫૦॥

પશ્ય બાહુબલં મેઽદ્ય વિહરસ્વ યથાસુખમ્ ।
ભવતાત્ર ન ગન્તવ્યં સઙ્ગ્રામેઽપ્યનયા સમમ્ ॥ ૫૧॥

વ્યાસ ઉવાચ ।

એવં બ્રુવતિ રાજેન્દ્રં બાષ્કલે મદગર્વિતે ।
પ્રણમ્ય નૃપતિં તત્ર દુર્ધરો વાક્યમબ્રવીત્ ॥ ૫૨॥

દુર્ધર ઉવાચ ।
મહિષાહં વિજેષ્યામિ દેવીં દેવવિનિર્મિતામ્ ।
અષ્ટાદશભુજાં રમ્યાં કારણાચ્ચ સમાગતામ્ ॥ ૫૩॥

રાજન્ ભીષયિતું ત્વાં વૈ માયૈષા નિર્મિતા સુરૈઃ ।
વિભીષિકેયં વિજ્ઞાય ત્યજ મોહં મનોગતમ્ ॥ ૫૪॥

રાજનીતિરિયં રાજન્ મન્ત્રિકૃત્યં તથા શ‍ૃણુ ।
સાત્ત્વિકા રાજસાઃ કેચિત્તામસાશ્ચ તથાપરે ॥ ૫૫॥

મન્ત્રિણસ્ત્રિવિધા લોકે ભવન્તિ દાનવાધિપ ।
સાત્ત્વિકાઃ પ્રભુકાર્યાણિ સાધયન્તિ સ્વશક્તિભિઃ ॥ ૫૬॥

આત્મકૃત્યં પ્રકુર્વન્તિ સ્વામિકાર્યાવિરોધતઃ ।
એકચિત્તા ધર્મપરા મન્ત્રશાસ્ત્રવિશારદાઃ ॥ ૫૭॥

રાજસા ભિન્નચિત્તાશ્ચ સ્વકાર્યનિરતાઃ સદા ।
કદાચિત્સ્વામિકાર્યં તે પ્રકુર્વન્તિ યદૃચ્છયા ॥ ૫૮॥

તામસા લોભનિરતાઃ સ્વકાર્યનિરતાઃ સદા ।
પ્રભુકાર્યં વિનાશ્યૈવ સ્વકાર્યં સાધયન્તિ તે ॥ ૫૯॥

સમયે તે વિભિદ્યન્તે પરૈસ્તુ પરિવઞ્ચિતાઃ ।
સ્વચ્છિદ્રં શત્રુપક્ષીયાન્નિર્દિશન્તિ ગૃહસ્થિતાઃ ॥ ૬૦॥

કાર્યભેદકરા નિત્યં કોશગુપ્તાસિવત્સદા ।
સઙ્ગ્રામેઽથ સમુત્પન્ને ભીષયન્તિ પ્રભું સદા ॥ ૬૧॥

વિશ્વાસસ્તુ ન કર્તવ્યસ્તેષાં રાજન્ કદાચન ।
વિશ્વાસે કાર્યહાનિઃ સ્યાન્મન્ત્રહાનિઃ સદૈવ હિ ॥ ૬૨॥

ખલાઃ કિં કિં ન કુર્વન્તિ વિશ્વસ્તા લોભતત્પરાઃ ।
તામસાઃ પાપનિરતા બુદ્ધિહીનાઃ શઠાસ્તથા ॥ ૬૩॥

તસ્માત્કાર્યં કરિષ્યામિ ગત્વાહં રણમસ્તકે ।
ચિન્તા ત્વયા ન કર્તવ્યા સર્વથા નૃપસત્તમ ॥ ૬૪॥

ગૃહીત્વા તાં દુરાચારામાગમિષ્યામિ સત્વરઃ ।

પશ્ય મેઽદ્ય બલં ધૈર્યં પ્રભુકાર્યં સ્વશક્તિતઃ ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવીપરાજયકરણાય
દુર્ધરપ્રબોધવચનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૫.૧૨॥

## ૫.૧૩ ત્રયોદશોઽધ્યાયઃ । મહિષસેનાધિપબાષ્કલદુર્મુખનિપાતનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા તૌ મહાબાહૂ દૈત્યૌ બાષ્કલદુર્મુખૌ ।
જગ્મતુર્મદદિગ્ધાઙ્ગૌ સર્વશસ્ત્રાસ્ત્રકોવિદૌ ॥ ૧॥

તૌ ગત્વા સમરે દેવીમૂચતુર્વચનં તદા ।
દાનવૌ ચ મદોન્મત્તૌ મેઘગમ્ભીરયા ગિરા ॥ ૨॥

દેવિ દેવા જિતા યેન મહિષેણ મહાત્મના ।
વરય ત્વં વરારોહે સર્વદૈત્યાધિપં નૃપમ્ ॥ ૩॥

સ કૃત્વા માનુષં રૂપં સર્વલક્ષણસંયુતમ્ ।
ભૂષિતં ભૂષણૈર્દિવ્યૈસ્ત્વામેષ્યતિ રહઃ કિલ ॥ ૪॥

ત્રૈલોક્યવિભવં કામં ત્વમેષ્યસિ શુચિસ્મિતે ।
મહિષે પરમં ભાવં કુરુ કાન્તે મનોગતમ્ ॥ ૫॥

કૃત્વા પતિં મહાવીરં સંસારસુખમદ્ભુતમ્ ।
ત્વં પ્રાપ્સ્યસિ પિકાલાપે યોષિતાં ખલુ વાઞ્છિતમ્ ॥ ૬॥

દેવ્યુવાચ ।
જાલ્મ ત્વં કિં વિજાનાસિ નારીયં કામમોહિતા ।
મન્દબુદ્ધિબલાત્યર્થં ભજેયં મહિષં શઠમ્ ॥ ૭॥

કુલશીલગુણૈસ્તુલ્યં તં ભજન્તિ કુલસ્ત્રિયઃ ।
અધિકં રૂપચાતુર્યબુદ્ધિશીલક્ષમાદિભિઃ ॥ ૮॥

કા નુ કામાતુરા નારી ભજેચ્ચ પશુરૂપિણમ્ ।
પશૂનામધમં નૂનં મહિષં દેવરૂપિણી ॥ ૯॥

ગચ્છતં મહિષં તૂર્ણં ભૂપં બાષ્કલદુર્મુખૌ ।
વદતં મદ્વચો દૈત્યં ગજતુલ્યં વિષાણિનમ્ ॥ ૧૦॥

પાતાલં ગચ્છ વાભ્યેત્ય સઙ્ગ્રામં કુરુ વા મયા ।
રણે જાતે સહસ્રાક્ષો નિર્ભયઃ સ્યાદિતિ ધ્રુવમ્ ॥ ૧૧॥

હત્વાહં ત્વાં ગમિષ્યામિ નાન્યથા ગમનં મમ ।
ઇત્થં જ્ઞાત્વા સુદુર્બુદ્ધે યથેચ્છસિ તથા કુરુ ॥ ૧૨॥

મામનિર્જિત્ય ભૂભાગે ન સ્થાનં તે કદાચન ।
ભવિષ્યતિ ચતુષ્પાદ દિવિ વા ગિરિકન્દરે ॥ ૧૩॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તૌ તૌ તયા દૈત્યૌ કોપાકુલિતલોચનૌ ।
ધનુર્બાણધરૌ વીરૌ યુદ્ધકામૌ બભૂવતુઃ ॥ ૧૪॥

કૃત્વા સુવિપુલં નાદં દેવી સા નિર્ભયા સ્થિતા ।
ઉભૌ ચ ચક્રતુસ્તીવ્રા બાણવૃષ્ટિં કુરૂદ્વહ ॥ ૧૫॥

ભગવત્યપિ બાણૌઘાન્મુમોચ દાનવૌ પ્રતિ ।
કૃત્વાતિમધુરં નાદં દેવકાર્યાર્થસિદ્ધયે ॥ ૧૬॥

તયોસ્તુ બાષ્કલસ્તૂર્ણં સમ્મુખોઽભૂદ્ રણાઙ્ગણે ।
દુર્મુખઃ પ્રેક્ષકસ્તત્ર દેવીમભિમુખઃ સ્થિતઃ ॥ ૧૭॥

તયોર્યુદ્ધમભૂદ્ ઘોરં દેવીબાષ્કલયોસ્તદા ।
બાણાસિપરિઘાઘાતૈર્ભયદં મન્દચેતસામ્ ॥ ૧૮॥

તતઃ ક્રુદ્ધા જગન્માતા દૃષ્ટ્વા તં યુદ્ધદુર્મદમ્ ।
જઘાન પઞ્ચભિર્બાણૈઃ કર્ણાકૃષ્ટૈઃ શિલાશિતૈઃ ॥ ૧૯॥

દાનવોઽપિ શરાન્દેવ્યાશ્ચિચ્છેદ નિશિતૈઃ શરૈઃ ।
સપ્તભિસ્તાડયામાસ દેવીં સિંહોપરિસ્થિતામ્ ॥ ૨૦॥

સાપિ તં દશભિસ્તીક્ષ્ણૈઃ સુપીતૈઃ સાયકૈઃ ખલમ્ ।
જઘાન તચ્છરાંશ્છિત્ત્વા જહાસ ચ મુહુર્મુહુઃ ॥ ૨૧॥

અર્ધચન્દ્રેણ બાણેન ચિચ્છેદ ચ શરાસનમ્ ।
બાષ્કલોઽપિ ગદાં ગૃહ્ય દેવીં હન્તુમુપાયયૌ ॥ ૨૨॥

આગચ્છન્તં ગદાપાણિં દાનવં મદગર્વિતમ્ ।
ચણ્ડિકા સ્વગદાપાતૈઃ પાતયામાસ ભૂતલે ॥ ૨૩॥

બાષ્કલઃ પતિતો ભૂમૌ મુહૂર્તાદુત્થિતઃ પુનઃ ।

ચિક્ષેપ ચ ગદાં સોઽપિ ચણ્ડિકાં ચણ્ડવિક્રમઃ ॥ ૨૪॥

તમાગચ્છન્તમાલોક્ય દેવી શૂલેન વક્ષસિ ।
જઘાન બાષ્કલં ક્રુદ્ધા પપાત ચ મમાર સઃ ॥ ૨૫॥

પતિતે બાષ્કલે સૈન્યં ભગ્નં તસ્ય દુરાત્મનઃ ।
જયેતિ ચ મુદા દેવાશ્ચુક્રુશુર્ગગને સ્થિતાઃ ॥ ૨૬॥

તસ્મિંશ્ચ નિહતે દૈત્યે દુર્મુખોઽતિબલાન્વિતઃ ।
આજગામ રણે દેવીં ક્રોધસંરક્તલોચનઃ ॥ ૨૭॥

તિષ્ઠ તિષ્ઠાબલે સોઽપિ ભાષમાણઃ પુનઃ પુનઃ ।
ધનુર્બાણધરઃ શ્રીમાન્રથસ્થઃ કવચાવૃતઃ ॥ ૨૮॥

તમાગચ્છન્તમાલોક્ય દેવી શઙ્ખમવાદયત્ ।
કોપયન્તી દાનવં તં જ્યાઘોષઞ્ચ ચકાર હ ॥ ૨૯॥

સોઽપિ બાણાન્મુમોચાશુ તીક્ષ્ણાનાશીવિષોપમાન્ ।
સ્વબાણૈસ્તાન્મહામાયા ચિચ્છેદ ચ નનાદ ચ ॥ ૩૦॥

તયોઃ પરસ્પરં યુદ્ધં બભૂવ તુમુલં નૃપ ।
બાણશક્તિગદાઘાતૈર્મુસલૈસ્તોમરૈસ્તથા ॥ ૩૧॥

રણભૂમૌ તદા જાતા રુધિરૌઘવહા નદી ।
પતિતાનિ તદા તીરે શિરાંસિ પ્રબભુસ્તદા ॥ ૩૨॥

યથા સન્તરણાર્થાય યમકિઙ્કરનાયકૈઃ ।
તુમ્બીફલાનિ નીતાનિ નવશિક્ષાપરૈર્મુદા ॥ ૩૩॥

રણભૂમિસ્તદા ઘોરા બભૂવાતીવ દુર્ગમા ।
શરીરૈઃ પતિતૈર્ભૂમૌ ખાદ્યમાનૈર્વૃકાદિભિઃ ॥ ૩૪॥

ગોમાયુસારમેયાશ્ચ કાકાઃ કઙ્કા અયોમુખાઃ ।
ગૃધ્રા શ્યેનાશ્ચ ખાદન્તિ શરીરાણિ દુરાત્મનામ્ ॥ ૩૫॥

વવૌ વાયુશ્ચ દુર્ગન્ધો મૃતાનાં દેહસઙ્ગતઃ ।
અભૂત્કિલકિલાશબ્દઃ ખગાનાં પલભક્ષિણામ્ ॥ ૩૬॥

તદા ચુકોપ દુષ્ટાત્મા દુર્મુખઃ કાલમોહિતઃ ।
દેવીમુવાચ ગર્વેણ કૃત્વા ચોર્ધ્વકરં શુભમ્ ॥ ૩૭॥

ગચ્છ ચણ્ડિ હનિષ્યામિ ત્વામદ્યૈવ સુબાલિશે ।
દૈત્યં વા ભજ વામોરુ મહિષં મદગર્વિતમ્ ॥ ૩૮॥

દેવ્યુવાચ ।
આસન્નમરણઃ કામં પ્રલપસ્યદ્ય મોહિતઃ ।
અદ્યૈવ ત્વાં હનિષ્યામિ યથાયં બાષ્કલો હતઃ ॥ ૩૯॥

ગચ્છ વા તિષ્ઠ વા મન્દ મરણં યદિ રોચતે ।
હત્વા ત્વાં વૈ વધિષ્યામિ બાલિશં મહિષીસુતમ્ ॥ ૪૦॥

તચ્છ્રુત્વા વચનં તસ્યા દુર્મુખો મર્તુમુદ્યતઃ ।
મુમોચ બાણવૃષ્ટિં તુ ચણ્ડિકાં પ્રતિ દારુણામ્ ॥ ૪૧॥

સાપિ તાં તરસા છિત્ત્વા બાણવૃષ્ટિં શિતૈઃ શરૈઃ ।
જઘાન દાનવં ક્રુદ્ધા વૃત્રં વજ્રધરો યથા ॥ ૪૨॥

તયોઃ પરસ્પરં યુદ્ધં સઞ્જાતં ચાતિકર્કશમ્ ।
ભયદં કાતરાણાઞ્ચ શૂરાણાં બલવર્ધનમ્ ॥ ૪૩॥

દેવી ચિચ્છેદ તરસા ધનુસ્તસ્ય કરે સ્થિતમ્ ।
તથૈવ પઞ્ચભિર્બાણૈર્બભઞ્જ રથમુત્તમમ્ ॥ ૪૪॥

રથે ભગ્ને મહાબાહુઃ પદાતિર્દુર્મુખસ્તદા ।
ગદાં ગહીત્વા દુર્ધર્ષાં જગામ ચણ્ડિકાં પ્રતિ ॥ ૪૫॥

ચકાર સ ગદાઘાતં સિંહમૌલૌ મહાબલઃ ।
ન ચચાલ હરિઃ સ્થાનાત્તાડિતોઽપિ મહાબલઃ ॥ ૪૬॥

અમ્બિકા તં સમાલોક્ય ગદાપાણિં પુરઃસ્થિતમ્ ।
ખડ્ગેન શિતધારેણ શિરશ્ચિચ્છેદ મૌલિમત્ ॥ ૪૭॥

છિન્ને ચ મસ્તકે ભૂમૌ પપાત દુર્મુખો મૃતઃ ।
જયશબ્દં તદા ચક્રુર્મુદિતા નિર્જરા ભૃશમ્ ॥ ૪૮॥

તુષ્ટુવુસ્તાં તદા દેવીં દુર્મુખે નિહતેઽમરાઃ ।
પુષ્પવૃષ્ટિં તથા ચક્રુર્જયશબ્દં નભઃસ્થિતાઃ ॥ ૪૯॥

ઋષયઃ સિદ્ધગન્ધર્વાઃ સવિદ્યાધરકિન્નરાઃ ।
જહૃષુસ્તં હતં દૃષ્ટ્વા દાનવં રણમસ્તકે ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં

સંહિતાયાં પઞ્ચમસ્કન્ધે મહિષસેનાધિપ-
બાષ્કલદુર્મુખનિપાતનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૫.૧૩॥

## ૫.૧૪ ચતુર્દશોઽધ્યાયઃ । તામ્રચિક્ષુરાખ્યવધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
દુર્મુખં નિહતં શ્રુત્વા મહિષઃ ક્રોધમૂર્ચ્છિતઃ ।
ઉવાચ દાનવાન્સર્વાન્કિં જાતમિતિ ચાસકૃત્ ॥ ૧॥

નિહતૌ દાનવૌ શૂરૌ રણે દુર્મુખબાષ્કલૌ ।
તન્વ્યા તત્પરમાશ્ચર્યં પશ્યન્તુ દૈવચેષ્ટિતમ્ ॥ ૨॥

કાલો હિ બલવાન્કર્તા સતતં સુખદુઃખયોઃ ।
નરાણાં પરતન્ત્રાણાં પુણ્યપાપાનુયોગતઃ ॥ ૩॥

નિહતૌ દાનવશ્રેષ્ઠૌ કિં કર્તવ્યમતઃ પરમ્ ।
બ્રુવન્તુ મિલિતાઃ સર્વે યદ્યુક્તં કાર્યસઙ્કટે ॥ ૪॥

વ્યાસ ઉવાચ ।
એવં બ્રુવતિ રાજેન્દ્ર મહિષેઽતિબલાન્વિતે ।
ચિક્ષુરાખ્યસ્તુ સેનાનીસ્તમુવાચ મહારથઃ ॥ ૫॥

રાજન્નહં હનિષ્યામિ કા ચિન્તા સ્ત્રીવિહિંસને ।
ઇત્યુક્ત્વા સ્વબલૈર્યુક્તઃ પ્રયયૌ રથસંયુતઃ ॥ ૬॥

દ્વિતીયં પાર્ષ્ણિરક્ષં તુ કૃત્વા તામ્રં મહાબલમ્ ।
મહતા સૈન્યઘોષેણ પૂરયન્ગગનં દિશઃ ॥ ૭॥

તમાગચ્છન્તમાલોક્ય દેવી ભગવતી શિવા ।
ચકાર શઙ્ખજ્યાઘોષં ઘણ્ટાનાદં મહાદ્ભુતમ્ ॥ ૮॥

તત્રસુસ્તેન શબ્દેન તે ચ સર્વે સુરારયઃ ।
કિમેતદિતિ ભાષન્તો દુદ્રુવુર્ભયકમ્પિતાઃ ॥ ૯॥

ચિક્ષુરાખ્યસ્તુ તાન્દૃષ્ટ્વા પલાયનપરાયણાન્ ।
ઉવાચાતીવ સઙ્ક્રુદ્ધઃ કિં ભયં વઃ સમાગતમ્ ॥ ૧૦॥

અદ્યૈવાહં હનિષ્યામિ બાણૈર્બાલાં મદોન્નતામ્ ।
તિષ્ઠન્ત્વત્ર ભયં ત્યક્ત્વા દૈત્યાઃ સમરમૂર્ધનિ ॥ ૧૧॥

ઇત્યુક્ત્વા દાનવશ્રેષ્ઠશ્ચાપપાણિર્બલાન્વિતઃ ।
આગત્ય સઙ્ગરે દેવીમિત્યુવાચ ગતવ્યથઃ ॥ ૧૨॥

કિં ગર્જસિ વિશાલાક્ષિ ભીષયન્તીતરાન્નરાન્ ।
નાહં બિભેમિ તન્વઙ્ગિ શ્રુત્વા તેઽદ્ય વિચેષ્ટિતમ્ ॥ ૧૩॥

સ્ત્રીવધે દૂષણં જ્ઞાત્વા તથૈવાકીર્તિસમ્ભવમ્ ।
ઉપેક્ષાં કુરુતે ચિત્તં મદીયં વામલોચને ॥ ૧૪॥

સ્ત્રીણાં યુદ્ધં કટાક્ષૈશ્ચ તથા હાવૈશ્ચ સુન્દરિ ।
ન શસ્ત્રૈર્વિહિતં ક્વાપિ ત્વાદૃશીનાં કદાચન ॥ ૧૫॥

પુષ્પૈરપિ ન યોદ્ધવ્યં કિં પુનર્નિશિતૈઃ શરૈઃ ।
ભવાદૃશીનાં દેહેષુ દુનોતિ માલતીદલમ્ ॥ ૧૬॥

ધિગ્જન્મ માનુષે લોકે ક્ષાત્રધર્માનુજીવિનામ્ ।
લાલિતોઽયં પ્રિયો દેહઃ કૃન્તનીયઃ શિતૈઃ શરૈઃ ॥ ૧૭॥

તૈલાભ્યઙ્ગૈઃ પુષ્પવાતૈસ્તથા મિષ્ટાન્નભોજનૈઃ ।
પોષિતોઽયં પ્રિયો દેહો ઘાતનીયઃ પરેષુભિઃ ॥ ૧૮॥

દેહં છિત્ત્વાસિધારાભિર્ધનભૃજ્જાયતે નરઃ ।
ધિગ્ધનં દુઃખદં પૂર્વં પશ્ચાત્કિં સુખદં ભવેત્ ॥ ૧૯॥

ત્વમપ્યજ્ઞૈવ વામોરુ યુદ્ધમાકાઙ્ક્ષસે યતઃ ।
સુખં સમ્ભોગજં ત્યક્ત્વા કં ગુણં વેત્સિ સઙ્ગરે ॥ ૨૦॥

ખડ્ગપાતં ગદાઘાતં ભેદનઞ્જ શિલીમુખૈઃ ।
મરણાન્તે તુ સંસ્કારો ગોમાયુમુખકર્ષણમ્ ॥ ૨૧॥

તસ્યૈવ કવિભિર્ધૂર્તૈઃ કૃતં ચાતીવ શંસનમ્ ।
રણે મૃતાનાં સ્વઃપ્રાપ્તિરર્થવાદોઽસ્તિ કેવલઃ ॥ ૨૨॥

તસ્માદ્ ગચ્છ વરારોહે યત્ર તે રમતે મનઃ ।
ભજ વા ભૂપતિં નાથં હયારિં સુરમર્દનમ્ ॥ ૨૩॥

વ્યાસ ઉવાચ ।
એવં બ્રુવાણં તં દૈત્યં પ્રોવાચ જગદમ્બિકા ।
કિં મૃષા ભાષસે મૂઢ બુદ્ધિમાનિવ પણ્ડિતઃ ॥ ૨૪॥

નીતિશાસ્ત્રં ન જાનાસિ વિદ્યાં ચાન્વીક્ષિકીં તથા ।

ન સેવિતાસ્ત્વયા વૃદ્ધા ન ધર્મે મતિરસ્તિ તે ॥ ૨૫॥

મૂર્ખસેવાપરો યસ્માત્તસ્માત્ત્વં મૂર્ખ એવ હિ ।
રાજધર્મં ન જાનાસિ કિં બ્રવીષિ મમાગ્રતઃ ॥ ૨૬॥

સઙ્ગ્રામે મહિષં હત્વા કૃત્વા રુધિરકર્દમમ્ ।
યશઃસ્તમ્ભં સ્થિરં કૃત્વા ગમિષ્યામિ યથાસુખમ્ ॥ ૨૭॥

દેવાનાં દુઃખદાતારં દાનવં મદગર્વિતમ્ ।
હનિષ્યેઽહં દુરાચારં યુદ્ધં કુરુ સ્થિરો ભવ ॥ ૨૮॥

જીવિતેચ્છાસ્તિ ચેન્મૂઢ મહિષસ્ય તથા તવ ।
તદા ગચ્છન્તુ પાતાલં દાનવાઃ સર્વ એવ તે ॥ ૨૯॥

મુમૂર્ષા યદિ વશ્ચિત્તે યુદ્ધં કુર્વન્તુ સત્વરાઃ ।
સર્વાનેવ વધિષ્યામિ નિશ્ચયોઽયં મમાધુના ॥ ૩૦॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્યા દાનવો બલદર્પિતઃ ।
મુમોચ બાણવૃષ્ટિં તાં ઘનવૃષ્ટિમિવાપરામ્ ॥ ૩૧॥

ચિચ્છેદ તસ્ય સા બાણાન્સ્વબાણૈર્નિશિતૈસ્તદા ।
જઘાન તં તથા ઘોરૈરાશીવિષસમૈઃ શરૈઃ ॥ ૩૨॥

યુદ્ધં પરસ્પરં તત્ર બભૂવ વિસ્મયપ્રદમ્ ।
ગદયા ઘાતયામાસ તં રથાજ્જગદમ્બિકા ॥ ૩૩॥

મૂર્ચ્છાં પ્રાપ સ દુષ્ટાત્મા ગદયાભિહતો ભૃશમ્ ।
મુહૂર્તદ્વયમાત્રં તુ રથોપસ્થ ઇવાચલઃ ॥ ૩૪॥

તં તથા મૂર્ચ્છિતં દૃષ્ટ્વા તામ્રઃ પરબલાર્દનઃ ।
આજગામ રણે યોદ્ધું ચણ્ડિકાં પ્રતિ ચાપલાત્ ॥ ૩૫॥

આગચ્છન્તં તુ તં વીક્ષ્ય હસન્તી પ્રાહ ચણ્ડિકા ।
એહ્યેહિ દાનવશ્રેષ્ઠ યમલોકં નયામ્યહમ્ ॥ ૩૬॥

કિં ભવદ્ભિઃ સમાયાતૈરબલૈશ્ચ ગતાયુષૈઃ ।
મહિષઃ કિં ગૃહે મૂઢઃ કરોતિ જીવનોદ્યમમ્ ॥ ૩૭॥

કિં ભવદ્ભિર્હતૈર્મન્દૈર્મમાપિ વિફલઃ શ્રમઃ ।
અહતે મહિષે પાપે સુરશત્રૌ દુરાત્મનિ ॥ ૩૮॥

તસ્માદ્યૂયં ગૃહં ગત્વા મહિષં પ્રેષયન્ત્વિહ ।
પશ્યેન્માં સોઽપિ મન્દાત્મા યાદૃશીં તાદૃશીં સ્થિતામ્ ॥ ૩૯॥

તામ્રસ્તદ્વચનં શ્રુત્વા બાણવૃષ્ટિં ચકાર હ ।
ચણ્ડિકાં પ્રતિ કોપેન કર્ણાકૃષ્ટશરાસનઃ ॥ ૪૦॥

ભગવત્યપિ તામ્રાક્ષી સમાકૃષ્ય શરાસનમ્ ।
બાણાન્મુમોચ તરસા હન્તુકામા સુરાહિતમ્ ॥ ૪૧॥

ચિક્ષુરાખ્યોઽપિબલવાન્મૂર્ચ્છાં ત્યક્ત્વોત્થિતઃ પુનઃ ।
ગૃહીત્વા સશરં ચાપં તસ્થૌ તત્સમ્મુખઃ ક્ષણાત્ ॥ ૪૨॥

ચિક્ષુરાખ્યશ્ચ તામ્રશ્ચ દ્વાવપ્યતિબલોત્કટૌ ।
યુયુધાતે મહાવીરૌ સહ દેવ્યા રણાઙ્ગણે ॥ ૪૩॥

કુપિતા ચ મહામાયા વવર્ષ શરસન્તતિમ્ ।
ચકાર દાનવાન્ સર્વાન્ બાણક્ષતતનુચ્છદાન્ ॥ ૪૪॥

અસુરાઃ ક્રોધસમ્મૂઢા બભૂવુઃ શરતાડિતાઃ ।
ચિક્ષિપુઃ શરજાલાનિ દેવીં પ્રતિ રુષાન્વિતાઃ ॥ ૪૫॥

બભુસ્તે રાક્ષસાસ્તત્ર કિંશુકા ઇવ પુષ્પિણઃ ।
શિલીમુખક્ષતાઃ સર્વે વસન્તે ચ વને રણે ॥ ૪૬॥

બભૂવ તુમુલં યુદ્ધં તામ્રેણ સહ સંયુગે ।
વિસ્મયં પરમં જગ્મુર્દેવા યે પ્રેક્ષકાઃ સ્થિતાઃ ॥ ૪૭॥

તામ્રો મુસલમાદાય લોહજં દારુણં દૃઢમ્ ।
જઘાન મસ્તકે સિંહં જહાસ ચ નનર્દ ચ ॥ ૪૮॥

નર્દમાનં તદા તં તુ દૃષ્ટ્વા દેવી રુષાન્વિતા ।
ખડ્ગેન શિતધારેણ શિરશ્ચિચ્છેદ સત્વરા ॥ ૪૯॥

છિન્ને શિરસિ તામ્રસ્તુ વિશીર્ષો મુસલી બલી ।
બભ્રામ ક્ષણમાત્રં તુ પપાત રણમસ્તકે ॥ ૫૦॥

પતિતં તામ્રમાલોક્ય ચિક્ષુરાખ્યો મહાબલઃ ।
ખડ્ગમાદાય તરસા દુદ્રાવ ચણ્ડિકાં પ્રતિ ॥ ૫૧॥

ભગવત્યપિ તં દૃષ્ટ્વા ખડ્ગપાણિમુપાગતમ્ ।

દાનવં પઞ્ચભિર્બાણૈર્જઘાન તરસા રણે ॥ ૫૨॥

એકેન પાતિતં ખડ્ગં દ્વિતીયેન તુ તત્કરઃ ।
કણ્ઠાચ્ચ મસ્તકં તસ્ય કૃન્તિતં ચાપરૈઃ શરૈઃ ॥ ૫૩॥

એવં તૌ નિહતૌ ક્રૂરૌ રાક્ષસૌ રણદુર્મદૌ ।
ભગ્નં સૈન્યં તયોસ્તૂર્ણં દિક્ષુ સન્ત્રસ્તમાનસમ્ ॥ ૫૪॥

દેવાશ્ચ મુદિતાઃ સર્વે દૃષ્ટ્વા તૌ નિહતૌ રણે ।
પુષ્પવૃષ્ટિં મુદા ચક્રુર્જયશબ્દં નભઃસ્થિતાઃ ॥ ૫૫॥

ઋષયો દેવગન્ધર્વા વેતાલાઃ સિદ્ધચારણાઃ ।
ઊચુસ્તે જય દેવીતિ ચામ્બિકેતિ પુનઃ પુનઃ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
તામ્રચિક્ષુરાખ્યવધવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૫.૧૪॥

## ૫.૧૫ પઞ્ચદશોઽધ્યાયઃ । અસિલોમબિડાલાખ્યવધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તૌ તયા નિહતૌ શ્રુત્વા મહિષો વિસ્મયાન્વિતઃ ।
પ્રેષયામાસ દૈતેયાંસ્તદ્વધાર્થં મહાબલાન્ ॥ ૧॥

અસિલોમબિડાલાખ્યપ્રમુખાન્ યુદ્ધદુર્મદાન્ ।
સૈન્યેન મહતા યુક્તાન્સાયુધાન્સપરિચ્છદાન્ ॥ ૨॥

તે તત્ર દદૃશુર્દેવીં સિંહસ્યોપરિ સંસ્થિતામ્ ।
અષ્ટાદશભુજાં દિવ્યાં ખડ્ગખેટકધારિણીમ્ ॥ ૩॥

અસિલોમાગ્રતો ગત્વા તામુવાચ હસન્નિવ ।
વિનયાવનતઃ શાન્તો દેવીં દૈત્યવધોદ્યતામ્ ॥ ૪॥

અસિલોમોવાચ ।
દેવિ બ્રૂહિ વચઃ સત્યં કિમર્થમિહ સુન્દરિ ।
આગતાસિ કિમર્થં વા હંસિ દૈત્યાન્નિરાગસઃ ॥ ૫॥

કારણં કથયાદ્ય ત્વં ત્વયા સન્ધિં કરોમ્યહમ્ ।
કાઞ્ચનં મણિરત્નાનિ ભાજનાનિ વરાણિ ચ ॥ ૬॥

યાનીચ્છસિ વરારોહે ગહીત્વા ગચ્છ મા ચિરમ્ ।
કિમર્થં યુદ્ધકામાસિ દુઃખસન્તાપવર્ધનમ્ ॥ ૭॥

કથયન્તિ મહાત્માનો યુદ્ધં સર્વસુખાપહમ્ ।
કોમલેઽતીવ તે દેહે પુષ્પઘાતાસહે ભૃશમ્ ॥ ૮॥

કિમર્થં શસ્ત્રસમ્પાતાન્સહસીતિ વિસિસ્મિયે ।
ચાતુર્યસ્ય ફલં શાન્તિઃ સતતં સુખસેવનમ્ ॥ ૯॥

તત્કિમર્થં દુઃખહેતું સઙ્ગ્રામં કર્તુમિચ્છસિ ।
સંસારેઽત્ર સુખં ગ્રાહ્યં દુઃખં હેયમિતિ સ્થિતિઃ ॥ ૧૦॥

તત્સુખં દ્વિવિધં પ્રોક્તં નિત્યાનિત્યપ્રભેદતઃ ।
આત્મજ્ઞાનં સુખં નિત્યમનિત્યં ભોગજં સ્મૃતમ્ ॥ ૧૧॥

નાશાત્મકં તુ તત્ત્યાજ્યં વેદશાસ્ત્રાર્થચિન્તકૈઃ ।
સૌગતાનાં મતં ચેત્ત્વં સ્વીકરોષિ વરાનને ॥ ૧૨॥

તથાપિ યૌવનં પ્રાપ્ય ભુઙ્ક્ષ્વ ભોગાનનુત્તમાન્ ।
પરલોકસ્ય સન્દેહો યદિ તેઽસ્તિ કૃશોદરિ ॥ ૧૩॥

સ્વર્ગભોગપરા નિત્યં ભવ ભામિનિ ભૂતલે ।
અનિત્યં યૌવનં દેહે જ્ઞાત્વેતિ સુકૃતં ચરેત્ ॥ ૧૪॥

પરોપતાપનં કાર્યં વર્જનીયં સદા બુધૈઃ ।
અવિરોધેન કર્તવ્યં ધર્માર્થકામસેવનમ્ ॥ ૧૫॥

તસ્માત્ત્વમપિ કલ્યાણિ મતિં ધર્મે સદા કુરુ ।
અપરાધં વિના દૈત્યાન્કસ્માન્મારયસેઽમ્બિકે ॥ ૧૬॥

દયાધર્મોઽસ્ય દેહોઽસ્તિ સત્યે પ્રાણાઃ પ્રકીર્તિતાઃ ।
તસ્માદ્દયા તથા સત્યં રક્ષણીયં સદા બુધૈઃ ॥ ૧૭॥

કારણં વદ સુશ્રોણિ દાનવાનાં વધે તવ ।
દેવ્યુવાચ ।
ત્વયા પૃષ્ટં મહાબાહો કિમર્થમિહ ચાગતા ॥ ૧૮॥

તદહં સમ્પ્રવક્ષ્યામિ હનને ચ પ્રયોજનમ્ ।
વિચરામિ સદા દૈત્ય સર્વલોકેષુ સર્વદા ॥ ૧૯॥

ન્યાયાન્યાયૌ ચ ભૂતાનાં પશ્યન્તી સાક્ષિરૂપિણી ।

ન મે કદાપિ ભોગેચ્છા ન લોભો ન ચ વૈરિતા ॥ ૨૦॥

ધર્માર્થં વિચરામ્યત્ર સંસારે સાધુરક્ષણમ્ ।
વ્રતમેતત્તુ નિયતં પાલયામિ નિજં સદા ॥ ૨૧॥

સાધૂનાં રક્ષણં કાર્યં હન્તવ્યા યેઽપ્યસાધવઃ ।
વેદસંરક્ષણં કાર્યમવતારૈરનેકશઃ ॥ ૨૨॥

યુગે યુગે તાનેવાહમવતારાન્બિભર્મિ ચ ।
મહિષસ્તુ દુરાચારો દેવાન્વૈ હન્તુમુદ્યતઃ ॥ ૨૩॥

જ્ઞાત્વાહં તદ્વધાર્થં ભોઃ પ્રાપ્તાસ્મિ રાક્ષસાધુના ।
તં હનિષ્યે દુરાચારં સુરશત્રું મહાબલમ્ ॥ ૨૪॥

ગચ્છ વા તિષ્ઠ કામં ત્વં સત્યમેતદુદાહૃતમ્ ।
બ્રૂહિ વા તં દુરાત્માનં રાજાનં મહિષીસુતમ્ ॥ ૨૫॥

કિમન્યાન્ પ્રેષયસ્યત્ર સ્વયં યુદ્ધં કુરુષ્વ હ ।
સન્ધિઞ્ચેત્કર્તુમિચ્છાસ્તિ રાજ્ઞસ્તવ મયા સહ ॥ ૨૬॥

સર્વે ગચ્છન્તુ પાતાલં વૈરં ત્યક્ત્વા યથાસુખમ્ ।
દેવદ્રવ્યં તુ યત્કિઞ્ચિદ્ધૃતં જિત્વા રણે સુરાન્ ।
તદ્દત્ત્વા યાન્તુ પાતાલં પ્રહ્લાદો યત્ર તિષ્ઠતિ ॥ ૨૭॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં દેવ્યા અસિલોમા પુરઃસ્થિતઃ ।
બિડાલાખ્યં મહાવીરં પપ્રચ્છ પ્રીતિપૂર્વકમ્ ॥ ૨૮॥

અસિલોમોવાચ ।
શ્રુતં તેઽદ્ય બિડાલાખ્ય ભવાન્યા કથિતં ચ યત્ ।
એવં ગતે કિં કર્તવ્યો વિગ્રહઃ સન્ધિરેવ વા ॥ ૨૯॥

બિડાલાખ્ય ઉવાચ ।
ન સન્ધિકામોઽસ્તિ નૃપોઽભિમાની
યુદ્ધે ચ મૃત્યું નિયતં હિ જાનન્ ।
દૃષ્ટ્વા હતાન્ પ્રેરયતે તથાસ્મા-
ન્દૈવ હિ કોઽતિક્રમિતું સમર્થઃ ॥ ૩૦॥

(દુઃસાધ્ય એવાસ્ત્વિહ સેવકાનાં

ધર્મઃ સદા માનવિવર્જિતાનામ્ ।
આજ્ઞાપરાણાં વશવર્તિકાનાં
પાઞ્ચાલિકાનામિવ સૂત્રભેદાત્ ॥)
ગત્વા કથં તસ્ય પુરસ્ત્વયા ચ
મયાપિ વક્તવ્યમિદં કઠોરમ્ ।
ગચ્છન્તુ પાતાલમિતશ્ચ સર્વે
દત્ત્વાથ રત્નાનિ ધનં સુરાણામ્ ॥ ૩૧॥

(પ્રિયં હિ વક્તવ્યમસત્યમેવ
ન ચ પ્રિયં સ્યાદ્ધિતકૃત્તુ ભાષિતમ્ ।
સત્યં પ્રિયં નો ભવતીહ કામં
મૌનં તતો બુદ્ધિમતાં પ્રતિષ્ઠિતમ્ ॥)
ન ફલ્ગુવાક્યૈઃ પ્રતિબોધનીયો
રાજા તુ વીરૈરિતિ નીતિશાસ્ત્રમ્ ॥ ૩૨॥

ન નૂનં તત્ર ગન્તવ્યં હિતં વા વક્તુમાદરાત્ ।
પ્રષ્ટું વાપિ ગતે રાજા કોપયુક્તો ભવિષ્યતિ ॥ ૩૩॥

ઇતિ સઞ્ચિન્ત્ય કર્તવ્યં યુદ્ધં પ્રાણસ્ય સંશયે ।
સ્વામિકાર્યં પરં મત્વા મરણં તૃણવત્તથા ॥ ૩૪॥

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય તૌ વીરૌ સંસ્થિતૌ યુદ્ધતત્પરૌ ।
ધનુર્બાણધરૌ તત્ર સન્નદ્ધૌ રથસઙ્ગતૌ ॥ ૩૫॥

પ્રથમં તુ બિડાલાખ્યઃ સપ્તબાણાન્મુમોચ હ ।
અસિલોમા સ્થિતો દૂરે પ્રેક્ષકઃ પરમાસ્ત્રવિત્ ॥ ૩૬॥

ચિચ્છેદ તાંસ્તથાપ્રાપ્તાનમ્બિકા સ્વશરૈઃ શરાન્ ।
બિડાલાખ્યં ત્રિભિર્બાણૈર્જઘાન ચ શિલાશિતૈઃ ॥ ૩૭॥

પ્રાપ્ય બાણવ્યથાં દૈત્યઃ પપાત સમરાઙ્ગણે ।
મૂર્ચ્છિતોઽથ મમારાશુ દાનવો દૈવયોગતઃ ॥ ૩૮॥

બિડાલાખ્યં હતં દૃષ્ટ્વા રણે શક્તિશરોત્કરૈઃ ।
અસિલોમા ધનુષ્પાણિઃ સંસ્થિતો યુદ્ધતત્પરઃ ॥ ૩૯॥

ઊર્ધ્વં સવ્યં કરં કૃત્વા તામુવાચ મિતં વચઃ ।

દેવિ જાનામિ મરણં દાનવાનાં દુરાત્મનામ્ ॥ ૪૦॥

તથાપિ યુદ્ધં કર્તવ્યં પરાધીનેન વૈ મયા ।
મહિષો મન્દબુદ્ધિશ્ચ ન જાનાતિ પ્રિયાપ્રિયે ॥ ૪૧॥

તદગ્રે નૈવ વક્તવ્યં હિતં ચૈવાપ્રિયં મયા ।
મર્તવ્યં વીરધર્મેણ શુભં વાપ્યશુભં ભવેત્ ॥ ૪૨॥

દૈવમેવ પરં મન્યે ધિપૌરુષમનર્થકમ્ ।
પતન્તિ દાનવાસ્તૂર્ણં તવ બાણહતા ભુવિ ॥ ૪૩॥

ઇત્યુક્ત્વા શરવૃષ્ટિં સ ચકાર દાનવોત્તમઃ ।
દેવી ચિચ્છેદ તાન્બાણૈરપ્રાપ્તાંસ્તુ નિજાન્તિકે ॥ ૪૪॥

અન્યૈર્વિવ્યાધ તં તૂર્ણમસિલોમાનમાશુગૈઃ ।
વીક્ષિતામરસઙ્ઘૈશ્ચ કોપપૂર્ણાનના તદા ॥ ૪૫॥

શુશુભે દાનવઃ કામં બાણૈર્વિદ્ધતનુઃ કિલ ।
સ્રવદ્રુધિરધારઃ સ પ્રફુલ્લઃ કિંશુકો યથા ॥ ૪૬॥

અસિલોમા ગદાં ગુર્વીં લૌહીમુદ્યમ્ય વેગતઃ ।
દુદ્રાવ ચણ્ડિકાં કોપાત્સિંહં મૂર્ધ્નિ જઘાન હ ॥ ૪૭॥

સિંહોઽપિ નખરાઘાતૈસ્તં દદાર ભુજાન્તરે ।
અગણય્ય ગદાઘાતં કૃતં તેન બલીયસા ॥ ૪૮॥

ઉત્પત્ય તરસા દૈત્યો ગદાપાણિઃ સુદારુણઃ ।
સિંહમૂર્ધ્નિ સમારુહ્ય જઘાન ગદયામ્બિકામ્ ॥ ૪૯॥

કૃતં તેન પ્રહારં તુ વઞ્ચયિત્વા વિશામ્પતે ।
ખડ્ગેન શિતધારેણ શિરશ્ચિચ્છેદ કણ્ઠતઃ ॥ ૫૦॥

છિન્ને શિરસિ દૈત્યેન્દ્રઃ પપાત તરસા ક્ષિતૌ ।
હાહાકારો મહાનાસીત્સૈન્યે તસ્ય દુરાત્મનઃ ॥ ૫૧॥

જય દેવીતિ દેવાસ્તા તુષ્ટુવુર્જગદમ્બિકામ્ ।
દેવદુન્દુભયો નેદુર્જગુશ્ચ નૃપ કિન્નરાઃ ॥ ૫૨॥

નિહતૌ દાનવૌ વીક્ષ્ય પતિતૌ ચ રણાઙ્ગણે ।
નિહતાઃ સૈનિકાઃ સર્વે તત્ર કેસરિણા બલાત્ ॥ ૫૩॥

ભક્ષિતાશ્ચ તથા કેચિન્નિઃશેષં તદ્રણં કૃતમ્ ।
ભગ્નાઃ કેચિદ્ ગતા મન્દા મહિષં પ્રતિ દુઃખિતાઃ ॥ ૫૪॥

ચુક્રુશૂ રુરુદુશ્ચૈવ ત્રાહિ ત્રાહીતિ ભાષણૈઃ ।
અસિલોમબિડાલાખ્યૌ નિહતૌ નૃપસત્તમ ॥ ૫૫॥

અન્યે યે સૈનિકા રાજન્ સિંહેન ભક્ષિતાશ્ચ તે ।
એવં બ્રુવન્તો રાજાનં તદા ચક્રુશ્ચ વૈશસમ્ ॥ ૫૬॥

તચ્છ્રુત્વા વચનં તેષાં મહિષો દુર્મનાસ્તદા ।
બભૂવ ચિન્તાકુલિતો વિમના દુઃખસંયુતઃ ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે અસિલોમ-
બિડાલાખ્યવધવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૫.૧૫॥

## ૫.૧૬ ષોડશોઽધ્યાયઃ । મહિષદ્વારા દેવીપ્રબોધનમ્ ।

વ્યાસ ઉવાચ ।
તેષાં તદ્વચનં શ્રુત્વા ક્રોધયુક્તો નરાધિપઃ ।
દારુકં પ્રાહ તરસા રથમાનય મેઽદ્ભુતમ્ ॥ ૧॥

સહસ્રખરસંયુક્તં પતાકાધ્વજભૂષિતમ્ ।
આયુધૈઃ સંયુતં શુભ્રં સુચક્રં ચારુકૂબરમ્ ॥ ૨॥

સૂતોઽપિ રથમાનીય તમુવાચ ત્વરાન્વિતઃ ।
રાજન્ રથોઽયમાનીતો દ્વારિ તિષ્ઠતિ ભૂષિતઃ ॥ ૩॥

સર્વાયુધસમાયુક્તો વરાસ્તરણસંયુતઃ ।
આનીતં તં રથં જ્ઞાત્વા દાનવેન્દ્રો મહાબલઃ ॥ ૪॥

માનુષં દેહમાસ્થાય સઙ્ગ્રામે ગન્તુમુદ્યતઃ ।
વિચાર્ય મનસા ચેતિ દેવી માં પ્રેક્ષ્ય દુર્મુખમ્ ॥ ૫॥

શૃઙ્ગિણં મહિષં નૂનં વિમના સા ભવિષ્યતિ ।
નારીણાં ચ પ્રિયં રૂપં તથા ચાતુર્યમિત્યપિ ॥ ૬॥

તસ્માદ્રૂપં ચ ચાતુર્યં કૃત્વા યાસ્યામિ તાં પ્રતિ ।
યથા માં વીક્ષ્ય સા બાલા પ્રેમયુક્તા ભવિષ્યતિ ॥ ૭॥

મમાપિ ચ તદૈવ સ્યાત્સુખં નાન્યસ્વરૂપતઃ ।
ઇતિ સઞ્ચિન્ત્ય મનસા દાનવેન્દ્રો મહાબલઃ ॥ ૮॥

ત્યક્ત્વા તન્માહિષં રૂપં બભૂવ પુરુષઃ શુભઃ ।
સર્વાયુધધરઃ શ્રીમાંશ્ચારુભૂષણભૂષિતઃ ॥ ૯॥

દિવ્યામ્બરધરઃ કાન્તઃ પુષ્પબાણ ઇવાપરઃ ।
રથોપવિષ્ટઃ કેયૂરસ્રગ્વી બાણધનુર્ધરઃ ॥ ૧૦॥

સેનાપરિવૃતો દેવીં જગામ મદગર્વિતઃ ।
મનોજ્ઞં રૂપમાસ્થાય માનિનીનાં મનોહરમ્ ॥ ૧૧॥

તમાગતં સમાલોક્ય દૈત્યાનામધિપં તદા ।
બહુભિઃ સંવૃતં વીરૈર્દેવી શઙ્ખમવાદયત્ ॥ ૧૨॥

સ શઙ્ખનિનદં શ્રુત્વા જનવિસ્મયકારકમ્ ।
સમીપમેત્ય દેવ્યાસ્તુ તામુવાચ હસન્નિવ ॥ ૧૩॥

દેવિ સંસારચક્રેઽસ્મિન્વર્તમાનો જનઃ કિલ ।
નરો વાથ તથા નારી સુખં વાઞ્છતિ સર્વથા ॥ ૧૪॥

સુખં સંયોગજં નૃણાં નાસંયોગે ભવેદિહ ।
સંયોગો બહુધા ભિન્નસ્તાન્બ્રવીમિ શ‍ૃણુષ્વ હ ॥ ૧૫॥

ભેદાન્સુપ્રીતિહેતૂત્થાન્સ્વભાવોત્થાનનેકશઃ ।
તત્ર પ્રીતિભવાનાદૌ કથયામિ યથામતિ ॥ ૧૬॥

માતાપિત્રોસ્તુ પુત્રેણ સંયોગસ્તૂત્તમઃ સ્મૃતઃ ।
ભ્રાતુર્ભ્રાત્રા તથા યોગઃ કારણાન્મધ્યમો મતઃ ॥ ૧૭॥

ઉત્તમસ્ય સુખસ્યૈવ દાતૃત્વાદુત્તમઃ સ્મૃતઃ ।
તસ્માદલ્પસુખસ્યૈવ પ્રદાતૃત્વાચ્ચ મધ્યમઃ ॥ ૧૮॥

નાવિકાનાં તુ સંયોગઃ સ્મૃતઃ સ્વાભાવિકો બુધૈઃ ।
વિવિધાવૃતચિત્તાનાં પ્રસઙ્ગપરિવર્તિનામ્ ॥ ૧૯॥

અત્યલ્પસુખદાતૃત્વાત્કનિષ્ઠોઽયં સ્મૃતો બુધૈઃ ।
અત્યુત્તમસ્તુ સંયોગઃ સંસારે સુખદઃ સદા ॥ ૨૦॥

નારીપુરુષયોઃ કાન્તે સમાનવયસો સદા ।
સંયોગો યઃ સમાખ્યાતઃ સ એવાત્યુત્તમઃ સ્મૃતઃ ॥ ૨૧॥

અત્યુત્તમસુખસ્યૈવ દાતૃત્વાત્સ તથાવિધઃ ।
ચાતુર્યરૂપવેષાદ્યૈઃ કુલશીલગુણૈસ્તથા ॥ ૨૨॥

પરસ્પરસમુત્કર્ષઃ કથ્યતે હિ પરસ્પરમ્ ।
તં ચેત્કરોષિ સંયોગં વીરેણ ચ મયા સહ ॥ ૨૩॥

અત્યુત્તમસુખસ્યૈવ પ્રાપ્તિઃ સ્યાત્તે ન સંશયઃ ।
નાનાવિધાનિ રૂપાણિ કરોમિ સ્વેચ્છયા પ્રિયે ॥ ૨૪॥

ઇન્દ્રાદયઃ સુરાઃ સર્વે સઙ્ગ્રામે વિજિતા મયા ।
રત્નાનિ યાનિ દિવ્યાનિ ભવનેઽસ્મિન્મમાધુના ॥ ૨૫॥

ભુઙ્ક્ષ્વ ત્વં તાનિ સર્વાણિ યથેષ્ટં દેહિ વા યથા ।
પટ્ટરાજ્ઞી ભવાદ્ય ત્વં દાસોઽસ્મિ તવ સુન્દરિ ॥ ૨૬॥

વૈરં ત્યજેઽહં દેવૈસ્તુ તવ વાક્યાન્ન સંશયઃ ।
યથા ત્વં સુખમાપ્નોષિ તથાહં કરવાણિ વૈ ॥ ૨૭॥

આજ્ઞાપય વિશાલાક્ષિ તથાહં પ્રકરોમ્યથ ।
ચિત્તં મે તવ રૂપેણ મોહિતં ચારુભાષિણિ ॥ ૨૮॥

આતુરોઽસ્મિ વરારોહે પ્રાપ્તસ્તે શરણં કિલ ।
પ્રપન્નં પાહિ રમ્ભોરુ કામબાણૈઃ પ્રપીડિતમ્ ॥ ૨૯॥

ધર્માણામુત્તમો ધર્મઃ શરણાગતરક્ષણમ્ ।
ત્વદીયોઽસ્મ્યસિતાપાઙ્ગિ સેવકોઽહં કૃશોદરિ ॥ ૩૦॥

મરણાન્તં વચઃ સત્યં નાન્યથા પ્રકરોમ્યહમ્ ।
પાદૌ નતોઽસ્મિ તન્વઙ્ગિ ત્યક્ત્વા નાનાયુધાનિ તે ॥ ૩૧॥

દયાં કુરુ વિશાલાક્ષિ તપ્તોઽસ્મિ કામમાર્ગણૈઃ ।
જન્મપ્રભૃતિ ચાર્વઙ્ગિ દૈન્યં નાચરિતં મયા ॥ ૩૨॥

બ્રહ્માદીનીશ્વરાન્પ્રાપ્ય ત્વયિ તદ્વિદધામ્યહમ્ ।
ચરિતં મમ જાનન્તિ રણે બ્રહ્માદયઃ સુરાઃ ॥ ૩૩॥

સોઽપ્યહં તવ દાસોઽસ્મિ મન્મુખં પશ્ય ભામિનિ ।
વ્યાસ ઉવાચ ।
ઇતિ બ્રુવાણં તં દૈત્યં દેવી ભગવતી હિ સા ॥ ૩૪॥

પ્રહસ્ય સસ્મિતં વાક્યમુવાચ વરવર્ણિની ।
દેવ્યુવાચ ।
નાહં પુરુષમિચ્છામિ પરમં પુરુષં વિના ॥ ૩૫॥

તસ્ય ચેચ્છાસ્મ્યહં દૈત્ય સૃજામિ સકલં જગત્ ।
સ માં પશ્યતિ વિશ્વાત્મા તસ્યાહં પ્રકૃતિઃ શિવા ॥ ૩૬॥

તત્સાન્નિધ્યવશાદેવ ચૈતન્યં મયિ શાશ્વતમ્ ।
જડાહં તસ્ય સંયોગાત્પ્રભવામિ સચેતના ॥ ૩૭॥

અયસ્કાન્તસ્ય સાન્નિધ્યાદયસશ્ચેતના યથા ।
ન ગ્રામ્યસુખવાઞ્છા મે કદાચિદપિ જાયતે ॥ ૩૮॥

મૂર્ખસ્ત્વમસિ મન્દાત્મન્ યત્સ્ત્રીસઙ્ગં ચિકીર્ષસિ ।
નરસ્ય બન્ધનાર્થાય શૃઙ્ખલા સ્ત્રી પ્રકીર્તિતા ॥ ૩૯॥

લોહબદ્ધોઽપિ મુચ્યેત સ્ત્રીબદ્ધો નૈવ મુચ્યતે ।
કિમિચ્છસિ ચ મન્દાત્મન્ મૂત્રાગારસ્ય સેવનમ્ ॥ ૪૦॥

શમં કુરુ સુખાય ત્વં શમાત્સુખમવાપ્સ્યસિ ।
નારીસઙ્ગે મહદ્દુઃખં જાનન્કિં ત્વં વિમુહ્યસિ ॥ ૪૧॥

ત્યજ વૈરં સુરૈઃ સાર્ધં યથેષ્ટં વિચરાવનૌ ।
પાતાલં ગચ્છ વા કામં જીવિતેચ્છા યદસ્તિ તે ॥ ૪૨॥

અથવા કુરુ સઙ્ગ્રામં બલવત્યસ્મિ સામ્પ્રતમ્ ।
પ્રેષિતાહં સુરૈઃ સર્વૈસ્તવ નાશાય દાનવ ॥ ૪૩॥

સત્યં બ્રવીમિ યેનાદ્ય ત્વયા વચનસૌહૃદમ્ ।
દર્શિતં તેન તુષ્ટાસ્મિ જીવન્ગચ્છ યથાસુખમ્ ॥ ૪૪॥

સતાં સપ્તપદી મૈત્રી તેન મુઞ્ચામિ જીવિતમ્ ।
મરણેચ્છાસ્તિ ચેદ્યુદ્ધં કુરુ વીર યથાસુખમ્ ॥ ૪૫॥

હનિષ્યામિ મહાબાહો ત્વામહં નાત્ર સંશયઃ ।
વ્યાસ ઉવાચ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા દાનવઃ કામમોહિતઃ ॥ ૪૬॥

ઉવાચ શ્લક્ષ્ણયા વાચા મધુરં વચનં તતઃ ।
બિભેમ્યહં વરારોહે ત્વાં પ્રહર્તું વરાનને ॥ ૪૭॥

કોમલાં ચારુસર્વાઙ્ગીં નારીં નરવિમોહિનીમ્ ।
જિત્વા હરિહરાદીંશ્ચ લોકપાલાંશ્ચ સર્વશઃ ॥ ૪૮॥

કિં ત્વયા સહ યુદ્ધં મે યુક્તં કમલલોચને ।
રોચતે યદિ ચાર્વઙ્ગિ વિવાહં કુરુ માં ભજ ॥ ૪૯॥

નોચેદ્ ગચ્છ યથેષ્ટં તે દેશં યસ્માત્સમાગતા ।
નાહં ત્વાં પ્રહરિષ્યામિ યતો મૈત્રી કૃતા ત્વયા ॥ ૫૦॥

હિતમુક્તં શુભં વાક્યં તસ્માદ્ ગચ્છ યથાસુખમ્ ।
કા શોભા મે ભવેદન્તે હત્વા ત્વાં ચારુલોચનામ્ ॥ ૫૧॥

સ્ત્રીહત્યા બાલહત્યા ચ બ્રહ્મહત્યા દુરત્યયા ।
ગૃહીત્વા ત્વાં ગૃહં નૂનં ગચ્છામ્યદ્ય વરાનને ॥ ૫૨॥

તથાપિ મે ફલં ન સ્યાદ્બલાદ્ભોગસુખં કુતઃ ।
પ્રબ્રવીમિ સુકેશિ ત્વાં વિનયાવનતો યતઃ ॥ ૫૩॥

પુરુષસ્ય સુખં ન સ્યાદૃતે કાન્તામુખામ્બુજાત્ ।
તત્તથૈવ હિ નારીણાં ન સ્યાચ્ચ પુરુષં વિના ॥ ૫૪॥

સંયોગે સુખસમ્ભૂતિર્વિયોગે દુઃખસમ્ભવઃ ।
કાન્તાસિ રૂપસમ્પન્ના સર્વાભરણભૂષિતા ॥ ૫૫॥

ચાતુર્યં ત્વયિ કિં નાસ્તિ યતો માં ન ભજસ્યહો ।
તવોપદિષ્ટં કેનેદં ભોગાનાં પરિવર્જનમ્ ॥ ૫૬॥

વઞ્ચિતાસિ પ્રિયાલાપે વૈરિણા કેનચિત્ત્વિહ ।
મુઞ્ચાગ્રહમિમં કાન્તે કુરુ કાર્યં સુશોભનમ્ ॥ ૫૭॥

સુખં તવ મમાપિ સ્યાદ્વિવાહે વિહિતે કિલ ।
વિષ્ણુર્લક્ષ્યા સહાભાતિ સાવિત્ર્યા ચ સહાત્મભૂઃ ॥ ૫૮॥

રુદ્રો ભાતિ ચ પાર્વત્યા શચ્યા શતમખસ્તથા ।
કા નારી પતિહીના ચ સુખં પ્રાપ્નોતિ શાશ્વતમ્ ॥ ૫૯॥

યેન ત્વમસિતાપાઙ્ગિ ન કરોષિ પતિં શુભમ્ ।
કામઃ ક્વાદ્ય ગતઃ કાન્તે યસ્ત્વાં બાણૈઃ સુકોમલૈઃ ॥ ૬૦॥

માદનૈઃ પઞ્ચભિઃ કામં ન તાડયતિ મન્દધીઃ ।
મન્યેઽહમિવ કામોઽપિ દયાવાંસ્ત્વયિ સુન્દરિ ॥ ૬૧॥

અબલેતિ ચ મન્વાનો ન પ્રેરયતિ માર્ગણાન્ ।
મનોભવસ્ય વૈરં વા કિમપ્યસ્તિ મયા સહ ॥ ૬૨॥

તેન ચ ત્વય્યરાલાક્ષિ ન મુઞ્ચતિ શિલીમુખાન્ ।
અથવા મેઽહિતૈર્દેવૈર્વારિતોઽસૌ ઝષધ્વજઃ ॥ ૬૩॥

સુખવિધ્વંસિભિસ્તેન ત્વયિ ન પ્રહરત્યપિ ।
ત્યક્ત્વા માં મૃગશાવાક્ષિ પશ્ચાત્તાપં કરિષ્યસિ ॥ ૬૪॥

મન્દોદરીવ તન્વઙ્ગિ પરિત્યજ્ય શુભં નૃપમ્ ।
અનુકૂલં પતિં પશ્ચાત્સા ચકાર શઠં પતિમ્ ।
કામાર્તા ચ યદા જાતા મોહેન વ્યાકુલાન્તરા ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે મહિષદ્વારા
દેવીપ્રબોધનં નામ ષોડશોઽધ્યાયઃ ॥ ૫.૧૬॥

## ૫.૧૭ સપ્તદશોઽધ્યાયઃ । રાજપુત્રીમન્દોદરીવૃત્તવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય દેવી પપ્રચ્છ દાનવમ્ ।
કા સા મન્દોદરી નારી કોઽસૌ ત્યક્તો નૃપસ્તયા ॥ ૧॥

શઠઃ કો વા નૃપઃ પશ્ચાત્તન્મે બ્રૂહિ કથાનકમ્ ।
વિસ્તરેણ યથા પ્રાપ્તં દુઃખં વનિતયા પુનઃ ॥ ૨॥

મહિષ ઉવાચ ।
સિંહલો નામ દેશોઽસ્તિ વિખ્યાતઃ પૃથિવીતલે ।
ઘનપાદપસંયુક્તો ધનધાન્યસમૃદ્ધિમાન્ ॥ ૩॥

ચન્દ્રસેનાભિધસ્તત્ર રાજા ધર્મપરાયણઃ ।
ન્યાયદણ્ડધરઃ શાન્તઃ પ્રજાપાલનતત્પરઃ ॥ ૪॥

સત્યવાદી મૃદુઃ શૂરસ્તિતિક્ષુર્નીતિસાગરઃ ।
શાસ્ત્રવિત્સર્વધર્મજ્ઞો ધનુર્વેદેઽતિનિષ્ઠિતઃ ॥ ૫॥

તસ્ય ભાર્યા વરારોહા સુન્દરી સુભગા શુભા ।

સદાચારાતિસુમુખી પતિભક્તિપરાયણા ॥ ૬॥

નામ્ના ગુણવતી કાન્તા સર્વલક્ષણસંયુતા ।
સુષુવે પ્રથમે ગર્ભે પુત્રીં સા ચાતિસુન્દરીમ્ ॥ ૭॥

પિતા ચાતીવ સન્તુષ્ટઃ પુત્રીં પ્રાપ્ય મનોરમામ્ ।
મન્દોદરીતિ નામાસ્યાઃ પિતા ચક્રે મુદાન્વિતઃ ॥ ૮॥

ઇન્દોઃ કલેવ ચાત્યર્થં વવૃધે સા દિને દિને ।
દશવર્ષા યદા જાતા કન્યા ચાતિમનોહરા ॥ ૯॥

વરાર્થં નૃપતિશ્ચિન્તામવાપ ચ દિને દિને ।
મદ્રદેશાધિપઃ શૂરઃ સુધન્વા નામ પાર્થિવઃ ॥ ૧૦॥

તસ્ય પુત્રોઽતિમેધાવી કમ્બુગ્રીવોઽતિવિશ્રુતઃ ।
બ્રાહ્મણૈઃ કથિતો રાજ્ઞે સ યુક્તોઽસ્યા વરઃ શુભઃ ॥ ૧૧॥

સર્વલક્ષણસમ્પન્નઃ સર્વવિદ્યાર્થપારગઃ ।
રાજ્ઞા પૃષ્ટા તદા રાજ્ઞી નામ્ના ગુણવતી પ્રિયા ॥ ૧૨॥

કમ્બુગ્રીવાય કન્યાં સ્વાં દાસ્યામિ વરવર્ણિનીમ્ ।
સા તુ પત્યુર્વચઃ શ્રુત્વા પુત્રીં પપ્રચ્છ સાદરમ્ ॥ ૧૩॥

વિવાહં તે પિતા કર્તું કમ્બુગ્રીવેણ વાઞ્છતિ ।
તચ્છ્રુત્વા માતરં પ્રાહ વાક્યં મન્દોદરી તદા ॥ ૧૪॥

નાહં પતિં કરિષ્યામિ નેચ્છા મેઽસ્તિ પરિગ્રહે ।
કૌમારં વ્રતમાસ્થાય કાલં નેષ્યામિ સર્વથા ॥ ૧૫॥

સ્વાતન્ત્ર્યેણ ચરિષ્યામિ તપસ્તીવ્રં સદૈવ હિ ।
પારતન્ત્ર્યં પરં દુઃખં માતઃ સંસારસાગરે ॥ ૧૬॥

સ્વાતન્ત્ર્યાન્મોક્ષમિત્યાહુઃ પણ્ડિતાઃ શાસ્ત્રકોવિદાઃ ।
તસ્માન્મુક્તા ભવિષ્યામિ પત્યા મે ન પ્રયોજનમ્ ॥ ૧૭॥

વિવાહે વર્તમાને તુ પાવકસ્ય ચ સન્નિધૌ ।
વક્તવ્યં વચનં સમ્યક્ત્વદધીનાસ્મિ સર્વદા ॥ ૧૮॥

શ્વશ્રૂદેવરવર્ગાણાં દાસીત્વં શ્વશુરાલયે ।
પતિચિત્તાનુવર્તિત્વં દુઃખાદ્દુઃખતરં સ્મૃતમ્ ॥ ૧૯॥

કદાચિત્પતિરન્યાં વા કામિનીં ચ ભજેદ્યદિ ।
તદા મહત્તરં દુઃખં સપત્નીસમ્ભવં ભવેત્ ॥ ૨૦॥

તદેર્ષ્યા જાયતે પત્યૌ ક્લેશશ્ચાપિ ભવેદથ ।
સંસારે ક્વ સુખં માતર્નારીણાં ચ વિશેષતઃ ॥ ૨૧॥

સ્વભાવાત્પરતન્ત્રાણાં સંસારે સ્વપ્નધર્મિણિ ।
શ્રુતં મયા પુરા માતરુત્તાનચરણાત્મજઃ ॥ ૨૨॥

ઉત્તમઃ સર્વધર્મજ્ઞો ધ્રુવાદવરજો નૃપઃ ।
પત્નીં ધર્મપરાં સાધ્વીં પતિભક્તિપરાયણામ્ ॥ ૨૩॥

અપરાધં વિના કાન્તાં ત્યક્તવાન્વિપિને પ્રિયામ્ ।
એવંવિધાનિ દુઃખાનિ વિદ્યમાને તુ ભર્તરિ ॥ ૨૪॥

કાલયોગાન્મૃતે તસ્મિન્નારી સ્યાદ્દુઃખભાજનમ્ ।
વૈધવ્યં પરમં દુઃખં શોકસન્તાપકારકમ્ ॥ ૨૫॥

પરોષિતપતિત્વેઽપિ દુઃખં સ્યાદધિકં ગૃહે ।
મદનાગ્નિવિદગ્ધાયાઃ કિં સુખં પતિસઙ્ગજમ્ ॥ ૨૬॥

તસ્માત્પતિર્ન કર્તવ્યઃ સર્વથેતિ મતિર્મમ ।
એવં પ્રોક્તા તદા માતા પતિં પ્રાહ નૃપાત્મજા ॥ ૨૭॥

ન ચ વાઞ્છતિ ભર્તારં કૌમારવ્રતધારિણી ।
વ્રતજાપ્યપરા નિત્યં સંસારાદ્વિમુખી સદા ॥ ૨૮॥

ન કાઙ્ક્ષતિ પતિં કર્તું બહુદોષવિચક્ષણા ।
ભાર્યાયા ભાષિતં શ્રુત્વા તથૈવ સંસ્થિતો નૃપઃ ॥ ૨૯॥

વિવાહો ન કૃતઃ પુત્ર્યા જ્ઞાત્વા ભાવવિવર્જિતામ્ ।
વર્તમાના ગૃહેષ્વેવ પિત્રા માત્રા ચ રક્ષિતા ॥ ૩૦॥

યૌવનસ્યાઙ્કુરા જાતા નારીણાં કામદીપકાઃ ।
તથાપિ સા વયસ્યાભિઃ પ્રેરિતાપિ પુનઃ પુનઃ ॥ ૩૧॥

ચકમે ન પતિં કર્તું જ્ઞાનાર્થપદભાષિણી ।
એકદોદ્યાનદેશે સા વિહર્તું બહુપાદપે ॥ ૩૨॥

જગામ સુમુખી પ્રેમ્ણા સૈરન્ધ્રીગણસેવિતા ।
રેમે કૃશોદરી તત્રાપશ્યત્કુસુમિતા લતાઃ ॥ ૩૩॥

પુષ્પાણિ ચિન્વતી રમ્યા વયસ્યાભિઃ સમાવૃતા ।
કોસલાધિપતિસ્તત્ર માર્ગે દૈવવશાત્તદા ॥ ૩૪॥

આજગામ મહાવીરો વીરસેનોઽતિવિશ્રુતઃ ।
એકાકી રથમારૂઢઃ કતિચિત્સેવકૈર્વૃતઃ ॥ ૩૫॥

સૈન્યં ચ પૃષ્ઠતસ્તસ્ય સમાયાતિ શનૈઃ શનૈઃ ।
દૃષ્ટસ્તસ્યા વયસ્યાભિર્દૂરતઃ પાર્થિવસ્તદા ॥ ૩૬॥

મન્દોદર્યૈ તથા પ્રોક્તં સમાયાતિ નરઃ પથિ ।
રથારૂઢો મહાબાહૂ રૂપવાન્મદનોઽપરઃ ॥ ૩૭॥

મન્યેઽહં નૃપતિઃ કશ્ચિત્પ્રાપ્તો ભાગ્યવશાદિહ ।
એવં બ્રુવત્યાં તત્રાસૌ કોસલેન્દ્રઃ સમાગતઃ ॥ ૩૮॥

દૃષ્ટ્વા તામસિતાપાઙ્ગીં વિસ્મયં પ્રાપ ભૂપતિઃ ।
ઉત્તીર્ય સ રથાત્તૂર્ણં પપ્રચ્છ પરિચારિકામ્ ॥ ૩૯॥

કેયં બાલા વિશાલાક્ષી કસ્ય પુત્રી વદાશુ મે ।
એવં પૃષ્ટા તુ સૈરન્ધ્રી તમુવાચ શુચિસ્મિતા ॥ ૪૦॥

પ્રથમં બ્રૂહિ મે વીર પૃચ્છામિ ત્વાં સુલોચન ।
કોઽસિ ત્વં કિમિહાયાતઃ કિં કાર્યં વદ સામ્પ્રતમ્ ॥ ૪૧॥

ઇતિ પૃષ્ટસ્તુ સૈરન્ધ્ર્યા તામુવાચ મહીપતિઃ ।
કોસલો નામ દેશોઽસ્તિ પૃથિવ્યાં પરમાદ્ભુતઃ ॥ ૪૨॥

તસ્ય પાલયિતા ચાહં વીરસેનાભિધઃ પ્રિયે ।
વાહિની પૃષ્ઠતઃ કામં સમાયાતિ ચતુર્વિધા ॥ ૪૩॥

માર્ગભ્રમાદિહ પ્રાપ્તં વિદ્ધિ માં કોસલાધિપમ્ ।
સૈરન્ધ્ર્યુવાચ ।
ચન્દ્રસેનસુતા રાજન્નામ્ના મન્દોદરી કિલ ॥ ૪૪॥

ઉદ્યાને રન્તુકામેયં પ્રાપ્તા કમલલોચના ।
શ્રુત્વા તદ્ભાષિતં રાજા પ્રત્યુવાચ પ્રસાધિકામ્ ॥ ૪૫॥

સૈરન્ધ્રિ ચતુરાસિ ત્વં રાજપુત્રીં પ્રબોધય ।
કકુત્સ્થવંશજશ્ચાહં રાજાસ્મિ ચારુલોચને ॥ ૪૬॥

ગાન્ધર્વેણ વિવાહેન પતિં માં કુરુ કામિનિ ।
ન મે ભાર્યાસ્તિ સુશ્રોણિ વયસોઽદ્ભુતયૌવનામ્ ॥ ૪૭॥

વાઞ્છામિ રૂપસમ્પન્નાં સુકુલાં કામિનીં કિલ ।
અથવા તે પિતા મહ્યં વિધિના દાતુમર્હતિ ॥ ૪૮॥

અનુકૂલઃ પતિશ્ચાહં ભવિષ્યામિ ન સંશયઃ ।
મહિષ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સૈરન્ધ્રી પ્રાહ તાં તદા ॥ ૪૯॥

પ્રહસ્ય મધુરં વાક્યં કામશાસ્ત્રવિશારદા ।
મન્દોદરિ નૃપઃ પ્રાપ્તઃ સૂર્યવંશસમુદ્ભવઃ ॥ ૫૦॥

રૂપવાન્બલવાન્કાન્તો વયસા ત્વત્સમઃ પુનઃ ।
પ્રીતિમાન્નૃપતિર્જાતસ્ત્વયિ સુન્દરિ સર્વથા ॥ ૫૧॥

પિતાપિ તે વિશાલાક્ષિ પરિતપ્યતિ સર્વથા ।
વિવાહકાલં તે જ્ઞાત્વા ત્વાં ચ વૈરાગ્યસંયુતામ્ ॥ ૫૨॥

ઇત્યાહાસ્માન્સ નૃપતિર્વિનિઃશ્વસ્ય પુનઃ પુનઃ ।
પુત્રીં પ્રબોધયન્ત્વેતાં સૈરન્ધ્ર્યઃ સેવને રતાઃ ॥ ૫૩॥

વક્તું શક્તા વયં ન ત્વાં હઠધર્મરતાં પુનઃ ।
ભર્તુઃ શુશ્રૂષણં સ્ત્રીણાં પરો ધર્મોઽબ્રવીન્મનુઃ ॥ ૫૪॥

ભર્તારં સેવમાના વૈ નારી સ્વર્ગમવાપ્નુયાત્ ।
તસ્માત્કુરુ વિશાલાક્ષિ વિવાહં વિધિપૂર્વકમ્ ॥ ૫૫॥

મન્દાદર્યુવાચ ।
નાહં પતિં કરિષ્યામિ ચરિષ્યે તપ અદ્ભુતમ્ ।
નિવારય નૃપં બાલે કિં માં પશ્યતિ નિસ્ત્રપઃ ॥ ૫૬॥

સૈરન્ધ્ર્યુવાચ ।
દુર્જયો દેવિ કામોઽસૌ કાલોઽસૌ દુરતિક્રમઃ ।
તસ્માન્મે વચનં પથ્યં કર્તુમર્હસિ સુન્દરિ ॥ ૫૭॥

અન્યથા વ્યસનં નૂનમાપતેદિતિ નિશ્ચયઃ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા કન્યોવાચાથ તાં સખીમ્ ॥ ૫૮॥

યદ્યદ્ભવેત્તદ્ભવતુ દૈવયોગાદસંશયમ્ ।

ન વિવાહં કરિષ્યેઽહં સર્વથા પરિચારિકે ॥ ૫૯॥

મહિષ ઉવાચ ।
ઇતિ તસ્યાસ્તુ નિર્બન્ધં જ્ઞાત્વા પ્રાહ નૃપં પુનઃ ।
ગચ્છ રાજન્ યથાકામં નેયમિચ્છતિ સત્પતિમ્ ॥ ૬૦॥

નૃપસ્તુ તદ્વચઃ શ્રુત્વા નિર્ગતઃ સહ સેનયા ।
કોસલાન્વિમના ભૂત્વા કામિનીં પ્રતિ નિઃસ્પૃહઃ ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવીમહિષસંવાદે
રાજપુત્રીમન્દોદરીવૃત્તવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૫.૧૭॥

## ૫.૧૮ અષ્ટાદશોઽધ્યાયઃ । મહિષાસુરવધઃ ।

મહિષ ઉવાચ ।
તસ્યાસ્તુ ભગિની કન્યા નામ્ના ચેન્દુમતી શુભા ।
વિવાહયોગ્યા સઞ્જાતા સુરૂપાવરજા યદા ॥ ૧॥

તસ્યા વિવાહઃ સંવૃત્તઃ સઞ્જાતશ્ચ સ્વયંવરઃ ।
રાજાનો બહુદેશીયાઃ સઙ્ગતાસ્તત્ર મણ્ડપે ॥ ૨॥

તયા વૃતો નૃપઃ કશ્ચિદ્બલવાન્ રૂપસંયુતઃ ।
કુલશીલસમાયુક્તઃ સર્વલક્ષણસંયુતઃ ॥ ૩॥

તદા કામાતુરા જાતા વિટં વીક્ષ્ય નૃપં તુ સા ।
ચકમે દૈવયોગાત્તુ શઠં ચાતુર્યભૂષિતમ્ ॥ ૪॥

પિતરં પ્રાહ તન્વઙ્ગી વિવાહં કુરુ મે પિતઃ ।
ઇચ્છા મેઽદ્ય સમુદ્ભૂતા દૃષ્ટ્વા મદ્રાધિપં ત્વિહ ॥ ૫॥

ચન્દ્રસેનોઽપિ તચ્છ્રુત્વા પુત્ર્યા યદ્ભાષિતં રહઃ ।
પ્રસન્નેન ચ મનસા તત્કાર્યે તત્પરોઽભવત્ ॥ ૬॥

તમાહૂય નૃપં ગેહે વિવાહવિધિના દદૌ ।
કન્યાં મન્દોદરીં તસ્મૈ પારિબર્હં તથા બહુ ॥ ૭॥

ચારુદેષ્ણોઽપિ તાં પ્રાપ્ય સુન્દરીં મુદિતોઽભવત્ ।
જગામ સ્વગૃહં તુષ્ટો રાજાપિ સહિતઃ સ્ત્રિયા ॥ ૮॥

રેમે નૃપતિશાર્દૂલઃ કામિન્યા બહુવાસરાન્ ।
કદાચિદ્દાસપત્ન્યા સ રમમાણો રહઃ કિલ ॥ ૯॥

સૈરન્ધ્ર્યા કથિતં તસ્યૈ તયા દૃષ્ટઃ પતિસ્તથા ।
ઉપાલમ્ભં દદૌ તસ્મૈ સ્મિતપૂર્વં રુષાન્વિતા ॥ ૧૦॥

કદાચિદપિ સામાન્યાં રહો રૂપવતીં નૃપઃ ।
ક્રીડયઁલ્લાલયન્દૃષ્ટઃ ખેદં પ્રાપ તદૈવ સા ॥ ૧૧॥

ન જ્ઞાતોઽયં શઠઃ પૂર્વં યદા દૃષ્ટઃ સ્વયંવરે ।
કિં કૃતં તુ મયા મોહાદ્વઞ્ચિતાહં નૃપેણ હ ॥ ૧૨॥

કિં કરોમ્યદ્ય સન્તાપં નિર્લજ્જે નિર્ઘૃણે શઠે ।
કા પ્રીતિરીદૃશે પત્યૌ ધિગદ્ય મમ જીવિતમ્ ॥ ૧૩॥

અદ્યપ્રભૃતિ સંસારે સુખં ત્યક્તં મયા ખલુ ।
પતિસમ્ભોગજં સર્વં સન્તોષોઽદ્ય મયા કૃતઃ ॥ ૧૪॥

અકર્તવ્યં કૃતં કાર્યં તજ્જાતં દુઃખદં મમ ।
દેહત્યાગઃ ક્રિયતે ચેદ્ધત્યાતીવ દુરત્યયા ॥ ૧૫॥

પિતૃગેહં વ્રજામ્યાશુ તત્રાપિ ન સુખં ભવેત્ ।
હાસ્યયોગ્યા સખીનાં તુ ભવેયં નાત્ર સંશયઃ ॥ ૧૬॥

તસ્માદત્રૈવ સંવાસો વૈરાગ્યયુતયા મયા ।
કર્તવ્યઃ કાલયોગેન ત્યક્ત્વા કામસુખં પુનઃ ॥ ૧૭॥

મહિષ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય સા નારી દુઃખશોકપરાયણા ।
સ્થિતા પતિગૃહં ત્યક્ત્વા સુખં સંસારજં તતઃ ॥ ૧૮॥

તસ્માત્ત્વમપિ કલ્યાણિ મામનાદૃત્ય ભૂપતિમ્ ।
અન્યં કાપુરુષં મન્દં કામાર્તા સંશ્રયિષ્યસિ ॥ ૧૯॥

વચનં કુરુ મે તથ્યં નારીણાં પરમં હિતમ્ ।
અકૃત્વા પરમં શોકં લપ્સ્યસે નાત્ર સંશયઃ ॥ ૨૦॥

દેવ્યુવાચ ।
મન્દાત્મન્ ગચ્છ પાતાલં યુદ્ધં વા કુરુ સામ્પ્રતમ્ ।
હત્વા ત્વામસુરાન્સર્વાન્ગમિષ્યામિ યથાસુખમ્ ॥ ૨૧॥

યદા યદા હિ સાધૂનાં દુઃખં ભવતિ દાનવ ।
તદા તેષાં ચ રક્ષાર્થં દેહં સન્ધારયામ્યહમ્ ॥ ૨૨॥

અરૂપાયાશ્ચ મે રૂપમજન્માયાશ્ચ જન્મ ચ ।
સુરાણાં રક્ષણાર્થાય વિદ્ધિ દૈત્ય વિનિશ્ચિતમ્ ॥ ૨૩॥

સત્યં બ્રવીમિ જાનીહિ પ્રાર્થિતાહં સુરૈઃ કિલ ।
ત્વદ્વધાર્થં હયારે ત્વાં હત્વા સ્થાસ્યામિ નિશ્ચલા ॥ ૨૪॥

તસ્માદ્યુધ્યસ્વ વા ગચ્છ પાતાલમસુરાલયમ્ ।
સર્વથા ત્વાં હનિષ્યામિ સત્યમેતદ્ બ્રવીમ્યહમ્ ॥ ૨૫॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તઃ સ તયા દેવ્યા ધનુરાદાય દાનવઃ ।
યુદ્ધકામઃ સ્થિતસ્તત્ર સઙ્ગ્રામાઙ્ગણભૂમિષુ ॥ ૨૬॥

મુમોચ તરસા બાણાન્કર્ણાકૃષ્ટાઞ્છિલાશિતાન્ ।
દેવી ચિચ્છેદ તાન્બાણૈઃ ક્રોધાન્મુક્તૈરયોમુખૈઃ ॥ ૨૭॥

તયોઃ પરસ્પરં યુદ્ધં સમ્બભૂવ ભયપ્રદમ્ ।
દેવાનાં દાનવાનાઞ્ચ પરસ્પરજયૈષિણામ્ ॥ ૨૮॥

મધ્યે દુર્ધર આગત્ય મુમોચ ચ શિલીમુખાન્ ।
દેવીં પ્રતિ વિષાસક્તાન્કોપયન્નતિદારુણાન્ ॥ ૨૯॥

તતો ભગવતી ક્રુદ્ધા તં જઘાન શિતૈઃ શરૈઃ ।
દુર્ધરસ્તુ પપાતોર્વ્યાં ગતાસુર્ગિરિશૃઙ્ગવત્ ॥ ૩૦॥

તં તથા નિહતં દૃષ્ટ્વા ત્રિનેત્રઃ પરમાસ્ત્રવિત્ ।
આગત્ય સપ્તભિર્બાણૈર્જઘાન પરમેશ્વરીમ્ ॥ ૩૧॥

અનાગતાંસ્તુ ચિચ્છેદ દેવી તાન્વિશિખૈઃ શરાન્ ।
ત્રિશૂલેન ત્રિનેત્રં તુ જઘાન જગદમ્બિકા ॥ ૩૨॥

અન્ધકસ્ત્વાજગામાશુ હતં દૃષ્ટ્વા ત્રિલોચનમ્ ।
ગદયા લોહમય્યાઽઽશુ સિંહં વિવ્યાધ મસ્તકે ॥ ૩૩॥

સિંહસ્તુ નખઘાતેન તં હત્વા બલવત્તરમ્ ।
ચખાદ તરસા માંસમન્ધકસ્ય રુષાન્વિતઃ ॥ ૩૪॥

તાન્ રણે નિહતાન્વીક્ષ્ય દાનવો વિસ્મયં ગતઃ ।

ચિક્ષેપ તરસા બાણાનતિતીક્ષ્ણાઞ્છિલાશિતાન્ ॥ ૩૫॥

દ્વિધા ચક્રે શરાન્દેવી તાનપ્રાપ્તાઞ્છિલીમુખૈઃ ।
ગદયા તાડયામાસ દૈત્યં વક્ષસિ ચામ્બિકા ॥ ૩૬॥

સ ગદાભિહતો મૂર્ચ્છામવાપામરબાધકઃ ।
વિષહ્ય પીડાં પાપાત્મા પુનરાગત્ય સત્વરઃ ॥ ૩૭॥

જઘાન ગદયા સિંહં મૂર્ધ્નિ ક્રોધસમન્વિતઃ ।
સિંહોઽપિ નખઘાતેન તં દદાર મહાસુરમ્ ॥ ૩૮॥

વિહાય પૌરુષં રૂપં સોઽપિ સિંહો બભૂવ હ ।
નખૈર્વિદારયામાસ દેવીસિંહં મદોત્કટમ્ ॥ ૩૯॥

તઞ્ચ કેસરિણં વીક્ષ્ય દેવી ક્રુદ્ધા હ્યયોમુખૈઃ ।
શરૈરવાકિરત્તીક્ષ્ણૈઃ ક્રૂરૈરાશીવિષૈરિવ ॥ ૪૦॥

ત્યક્ત્વા સ હરિરૂપં તુ ગજો ભૂત્વા મદસ્રવઃ ।
શૈલશ઼ૃઙ્ગં કરે કૃત્વા ચિક્ષેપ ચણ્ડિકાં પ્રતિ ॥ ૪૧॥

આગચ્છન્તં ગિરેઃ શ઼ૃઙ્ગં દેવી બાણૈઃ શિલાશિતૈઃ ।
ચકાર તિલશઃ ખણ્ડાઞ્જહાસ જગદમ્બિકા ॥ ૪૨॥

ઉત્પત્ય ચ તદા સિંહસ્તસ્ય મૂર્ધ્નિ વ્યવસ્થિતઃ ।
નખૈર્વિદારયામાસ મહિષં ગજરૂપિણમ્ ॥ ૪૩॥

વિહાય ગજરૂપં ચ બભૂવાષ્ટાપદી તથા ।
હન્તુકામો હરિં કોપાદ્દારુણો બલવત્તરઃ ॥ ૪૪॥

તં વીક્ષ્ય શરભં દેવી ખડ્ગેન સા રુષાન્વિતા ।
ઉત્તમાઙ્ગે જઘાનાશુ સોઽપિ તાં પ્રાહરત્તદા ॥ ૪૫॥

તયોઃ પરસ્પરં યુદ્ધં બભૂવાતિભયપ્રદમ્ ।
માહિષં રૂપમાસ્થાય શ઼ૃઙ્ગાભ્યાં પ્રાહરત્તદા ॥ ૪૬॥

પુચ્છપ્રભ્રમણેનાશુ શ઼ૃઙ્ગાઘાતૈર્મહાસુરઃ ।
તાડયામાસ તન્વઙ્ગીં ઘોરરૂપો ભયાનકઃ ॥ ૪૭॥

પુચ્છેન પર્વતાચ્છૃઙ્ગે ગૃહીત્વા ભ્રામયન્બલાત્ ।
પ્રેષયામાસ પાપાત્મા પ્રહસન્પરયા મુદા ॥ ૪૮॥

તામુવાચ બલોન્મત્તસ્તિષ્ઠ દેવિ રણાઙ્ગણે ।
અદ્યાહં ત્વાં હનિષ્યામિ રૂપયૌવનભૂષિતામ્ ॥ ૪૯॥

મૂર્ખાસિ મદમત્તાદ્ય યન્મયા સહ સઙ્ગરમ્ ।
કરોષિ મોહિતાતીવ મૃષા બલવતી ખરા ॥ ૫૦॥

હત્વા ત્વાં નિહનિષ્યામિ દેવાન્કપટપણ્ડિતાન્ ।
યે નારીં પુરતઃ કૃત્વા જેતુમિચ્છન્તિ માં શઠાઃ ॥ ૫૧॥

દેવ્યુવાચ ।
મા ગર્વં કુરુ મન્દાત્મંસ્તિષ્ઠ તિષ્ઠ રણાઙ્ગણે ।
કરિષ્યામિ નિરાતઙ્કાન્હત્વા ત્વાં સુરસત્તમાન્ ॥ ૫૨॥

પીત્વાદ્ય માધવીં મિષ્ટાં શાતયામિ રણેઽધમ ।
દેવાનાં દુઃખદં પાપં મુનીનાં ભયકારકમ્ ॥ ૫૩॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા ચષકં હૈમં ગહીત્વા સુરયા યુતમ્ ।
પપૌ પુનઃ પુનઃ ક્રોધાદ્ધન્તુકામા મહાસુરમ્ ॥ ૫૪॥

પીત્વા દ્રાક્ષાસવં મિષ્ટં શૂલમાદાય સત્વરા ।
દુદ્રાવ દાનવં દેવી હર્ષયન્દેવતાગણાન્ ॥ ૫૫॥

દેવાસ્તાં તુષ્ટુવુઃ પ્રેષ્ણા ચક્રુઃ કુસુમવર્ષણમ્ ।
જય જીવેતિ તે પ્રોચુર્દુન્દુભીનાઞ્ચ નિઃસ્વનૈઃ ॥ ૫૬॥

ઋષયઃ સિદ્ધગન્ધર્વાઃ પિશાચોરગચારણાઃ ।
કિન્નરાઃ પ્રેક્ષ્ય સઙ્ગ્રામં મુદિતા ગગને સ્થિતાઃ ॥ ૫૭॥

સોઽપિ નાનાવિધાન્દેહાન્કૃત્વા કૃત્વા પુનઃ પુનઃ ।
માયામયાઞ્જઘાનાજૌ દેવીં કપટપણ્ડિતઃ ॥ ૫૮॥

ચણ્ડિકાપિ ચ તં પાપં ત્રિશૂલેન બલાદ્ધૃદિ ।
તાડયામાસ તીક્ષ્ણેન ક્રોધાદરુણલોચના ॥ ૫૯॥

તાડિતોઽસૌ પપાતોર્વ્યાં મૂર્ચ્છામાપ મુહૂર્તકમ્ ।
પુનરુત્થાય ચામુણ્ડાં પદ્ભ્યાં વેગાદતાડયત્ ॥ ૬૦॥

વિનિહત્ય પદાઘાતૈર્જહાસ ચ મુહુર્મુહુઃ ।
રુરાવ દારુણં શબ્દં દેવાનાં ભયકારકમ્ ॥ ૬૧॥

તતો દેવી સહસ્રારં સુનાભં ચક્રમુત્તમમ્ ।
કરે કૃત્વા જગાદોચ્ચૈઃ સંસ્થિતં મહિષાસુરમ્ ॥ ૬૨॥

પશ્ય ચક્રં મદાન્ધાદ્ય તવ કણ્ઠનિકૃન્તનમ્ ।
ક્ષણમાત્રં સ્થિરો ભૂત્વા યમલોકં વ્રજાધુના ॥ ૬૩॥

ઇત્યુક્ત્વા દારુણં ચક્રં મુમોચ જગદમ્બિકા ।
શિરશ્છિન્નં રથાઙ્ગેન દાનવસ્ય તદા રણે ॥ ૬૪॥

સુસ્રાવ રુધિરં ચોષ્ણં કણ્ઠનાલાદ્ ગિરેર્યથા ।
ગૈરિકાદ્યરુણં પ્રૌઢં પ્રવાહમિવ નૈર્ઝરમ્ ॥ ૬૫॥

કબન્ધસ્તસ્ય દૈત્યસ્ય ભ્રમન્વૈ પતિતઃ ક્ષિતૌ ।
જયશબ્દશ્ચ દેવાનાં બભૂવ સુખવર્ધનઃ ॥ ૬૬॥

સિંહસ્ત્વતિબલસ્તત્ર પલાયનપરાનથ ।
દાનવાન્ભક્ષયામાસ ક્ષુધાર્ત ઇવ સઙ્ગરે ॥ ૬૭॥

મૃતે ચ મહિષે ક્રૂરે દાનવા ભયપીડિતાઃ ।
મૃતશેષાશ્ચ યે કેચિત્પાતાલં તે યયુર્નૃપ ॥ ૬૮॥

આનન્દં પરમં જગ્મુર્દેવાસ્તસ્મિન્નિપાતિતે ।
મુનયો માનવાશ્ચૈવ યે ચાન્યે સાધવઃ ક્ષિતૌ ॥ ૬૯॥

ચણ્ડિકાપિ રણં ત્યક્ત્વા શુભે દેશેઽથ સંસ્થિતા ।
દેવાસ્તત્રાયયુઃ શીઘ્રં સ્તોતુકામાઃ સુખપ્રદામ્ ॥ ૭૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
મહિષાસુરવધો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૫.૧૮॥

## ૫.૧૯ એકોનવિંશોઽધ્યાયઃ । દેવીસાન્ત્વનમ્ ।

વ્યાસ ઉવાચ ।
અથ પ્રમુદિતાઃ સર્વે દેવા ઇન્દ્રપુરોગમાઃ ।
મહિષં નિહતં દૃષ્ટ્વા તુષ્ટુવુર્જગદમ્બિકામ્ ॥ ૧॥

દેવા ઊચુઃ ।
બ્રહ્મા સૃજત્યવતિ વિષ્ણુરિદં મહેશઃ

શક્ત્યા તવૈવ હરતે નનુ ચાન્તકાલે ॥

ઈશા ન તેઽપિ ચ ભવન્તિ તયા વિહીના-
સ્તસ્માત્ત્વમેવ જગતઃ સ્થિતિનાશકર્ત્રી ॥ ૨॥

કીર્તિર્મતિઃ સ્મૃતિગતી કરુણા દયા ત્વં
શ્રદ્ધા ધૃતિશ્ચ વસુધા કમલાજપા ચ ।
પુષ્ટિઃ કલાથ વિજયા ગિરિજા જયા ત્વં
તુષ્ટિઃ પ્રમા ત્વમસિ બુદ્ધિરુમા રમા ચ ॥ ૩॥

વિદ્યા ક્ષમા જગતિ કાન્તિરપીહ મેધા
સર્વં ત્વમેવ વિદિતા ભુવનત્રયેઽસ્મિન્ ।
આભિર્વિના તવ તુ શક્તિભિરાશુ કર્તું
કો વા ક્ષમઃ સકલલોકનિવાસભૂમે ॥ ૪॥

ત્વં ધારણા નનુ ન ચેદસિ કૂર્મનાગૌ
ધર્તું ક્ષમૌ કથમિલામપિ તૌ ભવેતામ્ ।
પૃથ્વી ન ચેત્ત્વમસિ વા ગગને કથં સ્થા-
સ્યત્યેતદમ્બ નિખિલં બહુભારયુક્તમ્ ॥ ૫॥

યે વા સ્તુવન્તિ મનુજા અમરાન્વિમૂઢા
માયાગુણૈસ્તવ ચતુર્મુખવિષ્ણુરુદ્રાન્ ।
શુભ્રાંશુવહ્નિયમવાયુગણેશમુખ્યાન્
કિં ત્વામૃતે જનનિ તે પ્રભવન્તિ કાર્યે ॥ ૬॥

યે જુહ્વતિ પ્રવિતતેઽલ્પધિયોઽમ્બ યજ્ઞે
વહ્નૌ સુરાન્સમધિકૃત્ય હવિઃ સમૃદ્ધમ્ ।
સ્વાહા ન ચેત્ત્વમસિ તે કથમાપુરદ્ધા
ત્વામેવ કિં ન હિ યજન્તિ તતો હિ મૂઢાઃ ॥ ૭॥

ભોગપ્રદાસિ ભવતીહ ચરાચરાણાં
સ્વાંશૈર્દદાસિ ખલુ જીવનમેવ નિત્યમ્ ।
સ્વીયાન્સુરાઞ્જનનિ પોષયસીહ યદ્વ-
ત્તદ્વત્પરાનપિ ચ પાલયસીતિ હેતોઃ ॥ ૮॥

માતઃ સ્વયંવિરચિતાન્વિપિને વિનોદા-
દ્વન્ધ્યાન્પલાશરહિતાંશ્ચ કટૂંશ્ચ વૃક્ષાન્ ।

નોચ્છેદયન્તિ પુરુષા નિપુણાઃ કથઞ્ચિ-
ત્તસ્માત્ત્વમપ્યતિતરાં પરિપાસિ દૈત્યાન્ ॥ ૯॥

યત્ત્વં તુ હંસિ રણમૂર્ધ્નિ શરૈરરાતી-
ન્દેવાઙ્ગનાસુરતકેલિમતીન્વિદિત્વા ।
દેહાન્તરેઽપિ કરુણારસમાદદાના
તત્તે ચરિત્રમિદમીપ્સિતપૂરણાય ॥ ૧૦॥

ચિત્રં ત્વમી યદસુભી રહિતા ન સન્તિ
ત્વચ્ચિન્તિતેન દનુજાઃ પ્રથિતપ્રભાવાઃ ।
યેષાં કૃતે જનનિ દેહનિબન્ધનં તે
ક્રીડારસસ્તવ ન ચાન્યતરોઽત્ર હેતુઃ ॥ ૧૧॥

પ્રાપ્તે કલાવહહ દુષ્ટતરે ચ કાલે
ન ત્વાં ભજન્તિ મનુજા નનુ વઞ્ચિતાસ્તે ।
ધૂર્તૈઃ પુરાણચતુરૈર્હરિશઙ્કરાણાં
સેવાપરાશ્ચ વિહિતાસ્તવ નિર્મિતાનામ્ ॥ ૧૨॥

જ્ઞાત્વા સુરાંસ્તવ વશાનસુરાર્દિતાંશ્ચ
યે વૈ ભજન્તિ ભુવિ ભાવયુતા વિભગ્નાન્ ।
ધૃત્વા કરે સુવિમલં ખલુ દીપકં તે
કૂપે પતન્તિ મનુજા વિજલેઽતિઘોરે ॥ ૧૩॥

વિદ્યા ત્વમેવ સુખદાસુખદાપ્યવિદ્યા
માતસ્ત્વમેવ જનનાર્તિહરા નરાણામ્ ।
મોક્ષાર્થિભિસ્તુ કલિતા કિલ મન્દધીભિ-
ર્નારાધિતા જનનિ ભોગપરૈસ્તથાજ્ઞૈઃ ॥ ૧૪॥

બ્રહ્મા હરશ્ચ હરિરપ્યનિશં શરણ્યં
પાદામ્બુજં તવ ભજન્તિ સુરાસ્તથાન્યે ।
તદ્વૈ ન યેઽલ્પમતયો મનસા ભજન્તિ
ભ્રાન્તાઃ પતન્તિ સતતં ભવસાગરે તે ॥ ૧૫॥

ચણ્ડિ ત્વદઙ્ઘ્રિજલજોત્થરજઃપ્રસાદૈ-
ર્બ્રહ્મા કરોતિ સકલં ભુવનં ભવાદૌ ।
શૌરિશ્ચ પાતિ ખલુ સંહરતે હરસ્તુ
ત્વાં સેવતે ન મનુજસ્ત્વિહ દુર્ભગોઽસૌ ॥ ૧૬॥

વાગ્દેવતા ત્વમસિ દેવિ સુરાસુરાણાં
વક્તું ન તેઽમરવરાઃ પ્રભવન્તિ શક્તાઃ ।
ત્વં ચેન્મુખે વસસિ નૈવ યદૈવ તેષાં
યસ્માદ્ભવન્તિ મનુજા ન હિ તદ્વિહીનાઃ ॥ ૧૭॥

શપ્તો હરિસ્તુ ભૃગુણા કુપિતેન કામં
મીનો બભૂવ કમઠઃ ખલુ સૂકરસ્તુ ।
પશ્ચાન્નૃસિંહ ઇતિ યશ્છલકૃદ્ધરાયાં
તાન્સેવતાં જનનિ મૃત્યુભયં ન કિં સ્યાત્ ॥ ૧૮॥

શમ્ભોઃ પપાત ભુવિ લિઙ્ગમિદં પ્રસિદ્ધં
શાપેન તેન ચ ભૃગોર્વિપિને ગતસ્ય ।
તં યે નરા ભુવિ ભજન્તિ કપાલિનં તુ
તેષાં સુખં કથમિહાપિ પરત્ર માતઃ ॥ ૧૯॥

યોઽભૂદ્ ગજાનનગણાધિપતિર્મહેશા-
ત્તં યે ભજન્તિ મનુજા વિતથપ્રપન્નાઃ ।
જાનન્તિ તે ન સકલાર્થફલપ્રદાત્રીં
ત્વાં દેવિ વિશ્વજનનીં સુખસેવનીયામ્ ॥ ૨૦॥

ચિત્રં ત્વયારિજનતાપિ દયાર્દ્રભાવા-
દ્ધત્વા રણે શિતશરૈર્ગમિતા ઘુલોકમ્ ।
નોચેત્સ્વકર્મનિચિતે નિરયે નિતાન્તં
દુઃખાતિદુઃખગતિમાપદમાપતેત્સા ॥ ૨૧॥

બ્રહ્મા હરશ્ચ હરિરપ્યુત ગર્વભાવા-
જ્જાનન્તિ તેઽપિ વિબુધા ન તવ પ્રભાવમ્ ।
કેઽન્યે ભવન્તિ મનુજા વિદિતું સમર્થાઃ
સમ્મોહિતાસ્તવ ગુણૈરમિતપ્રભાવૈઃ ॥ ૨૨॥

ક્લિશ્યન્તિ તેઽપિ મુનયસ્તવ દુર્વિભાવ્યં
પાદામ્બુજં ન હિ ભજન્તિ વિમૂઢચિત્તાઃ ।
સૂર્યાગ્નિસેવનપરાઃ પરમાર્થતત્ત્વં
જ્ઞાતં ન તૈઃ શ્રુતિશતૈરપિ વેદસારમ્ ॥ ૨૩॥

મન્યે ગુણાસ્તવ ભુવિ પ્રથિતપ્રભાવાઃ

કુર્વન્તિ યે હિ વિમુખાન્નનુ ભક્તિભાવાત્ ।
લોકાન્સ્વબુદ્ધિરચિતૈર્વિવિધાગમૈશ્ચ
વિષ્ણ્વીશભાસ્કરગણેશપરાન્વિધાય ॥ ૨૪॥

કુર્વન્તિ યે તવ પદાદ્વિમુખાન્નરાગ્ર્યા-
ન્સ્વોક્તાગમૈર્હરિહરાર્ચનભક્તિયોગૈઃ ।
તેષાં ન કુપ્યસિ દયાં કુરુષેઽમ્બિકે ત્વં
તાન્મોહમન્ત્રનિપુણાન્પ્રથયસ્યલં ચ ॥ ૨૫॥

તુર્યે યુગે ભવતિ ચાતિબલં ગુણસ્ય
તુર્યસ્ય તેન મથિતાન્યસદાગમાનિ ।
ત્વાં ગોપયન્તિ નિપુણાઃ કવયઃ કલૌ વૈ
ત્વત્કલ્પિતાન્સુરગણાનપિ સંસ્તુવન્તિ ॥ ૨૬॥

ધ્યાયન્તિ મુક્તિફલદાં ભુવિ યોગસિદ્ધાં
વિદ્યાં પરાઞ્ચ મુનયોઽતિવિશુદ્ધસત્ત્વાઃ ।
તે નાપ્નુવન્તિ જનનીજઠરે તુ દુઃખં
ધન્યાસ્ત એવ મનુજાસ્ત્વયિ યે વિલીનાઃ ॥ ૨૭॥

ચિચ્છક્તિરસ્તિ પરમાત્મનિ યેન સોઽપિ
વ્યક્તો જગત્સુ વિદિતો ભવકૃત્યકર્તા ।
કોઽન્યસ્ત્વયા વિરહિતઃ પ્રભવત્યમુષ્મિન્
કર્તું વિહર્તુમપિ સઞ્ચલિતું સ્વશક્ત્યા ॥ ૨૮॥

તત્ત્વાનિ ચિદ્વિરહિતાનિ જગદ્વિધાતું
કિં વા ક્ષમાણિ જગદમ્બ યતો જડાનિ ।
કિં ચેન્દ્રિયાણિ ગુણકર્મયુતાનિ સન્તિ
દેવિ ત્વયા વિરહિતાનિ ફલં પ્રદાતુમ્ ॥ ૨૯॥

દેવા મખેષ્વપિ હુતં મુનિભિઃ સ્વભાગં
ગૃહ્ણીયુરમ્બ વિધિવત્પ્રતિપાદિતં કિમ્ ।
સ્વાહા ન ચેત્ત્વમસિ તત્ર નિમિત્તભૂતા
તસ્માત્ત્વમેવ નનુ પાલયસીવ વિશ્વમ્ ॥ ૩૦॥

સર્વં ત્વયેદમખિલં વિહિતં ભવાદૌ
ત્વં પાસિ વૈ હરિહરપ્રમુખાન્દિગીશાન્ ।
કાલેઽત્સિ વિશ્વમપિ તે ચરિતં ભવાદ્યં

જાનન્તિ નૈવ મનુજાઃ ક્વ નુ મન્દભાગ્યાઃ ॥ ૩૧॥

હત્વાસુરં મહિષરૂપધરં મહોગ્રં
માતસ્ત્વયા સુરગણઃ કિલ રક્ષિતોઽયમ્ ।
કાં તે સ્તુતિં જનનિ મન્દધિયો વિદામો
વેદા ગતિં તવ યથાર્થતયા ન જગ્મુઃ ॥ ૩૨॥

કાર્યં કૃતં જગતિ નો યદસૌ દુરાત્મા
વૈરી હતો ભુવનકણ્ટકદુર્વિભાવ્યઃ ।
કીર્તિઃ કૃતા નનુ જગત્સુ કૃપા વિધેયા-
પ્યસ્માંશ્ચ પાહિ જનનિ પ્રથિતપ્રભાવે ॥ ૩૩॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા સુરૈર્દેવી તાનુવાચ મૃદુસ્વરા ।
અન્યત્કાર્યં ચ દુઃસાધ્યં બ્રુવન્તુ સુરસત્તમાઃ ॥ ૩૪॥

યદા યદા હિ દેવાનાં કાર્યં સ્યાદતિદુર્ઘટમ્ ।
સ્મર્તવ્યાહં તદા શીઘ્રં નાશયિષ્યામિ ચાપદમ્ ॥ ૩૫॥

દેવા ઊચુઃ ।
સર્વં કૃતં ત્વયા દેવિ કાર્યં નઃ ખલુ સામ્પ્રતમ્ ।
યદયં નિહતઃ શત્રુરસ્માકં મહિષાસુરઃ ॥ ૩૬॥

સ્મરિષ્યામો યથા તેઽમ્બ સદૈવ પદપઙ્કજમ્ ।
તથા કુરુ જગન્માતર્ભક્તિં ત્વય્યપ્યચઞ્ચલામ્ ॥ ૩૭॥

અપરાધસહસ્રાણિ માતૈવ સહતે સદા ।
ઇતિ જ્ઞાત્વા જગદ્યોનિં ન ભજન્તે કુતો જનાઃ ॥ ૩૮॥

દ્વૌ સુપર્ણૌ તુ દેહેઽસ્મિંસ્તયોઃ સખ્યં નિરન્તરમ્ ।
નાન્યઃ સખા તૃતીયોઽસ્તિ યોઽપરાધં સહેત હિ ॥ ૩૯॥

તસ્માજ્જીવઃ સખાયં ત્વાં હિત્વા કિં નુ કરિષ્યતિ ।
પાપાત્મા મન્દભાગ્યોઽસૌ સુરમાનુષયોનિષુ ॥ ૪૦॥

પ્રાપ્ય દેહં સુદુષ્પ્રાપં ન સ્મરેત્ત્વાં નરાધમઃ ।
મનસા કર્મણા વાચા બ્રૂમઃ સત્યં પુનઃ પુનઃ ॥ ૪૧॥

સુખે વાપ્યથવા દુઃખે ત્વં નઃ શરણમદ્ભુતમ્ ।

પાહિ નઃ સતતં દેવિ સર્વૈસ્તવ વરાયુધૈઃ ॥ ૪૨॥

અન્યથા શરણં નાસ્તિ ત્વત્પાદામ્બુજરેણુતઃ ।
વ્યાસ ઉવાચ ।
એવં સ્તુતા સુરૈર્દેવી તત્રૈવાન્તરધીયત ।
વિસ્મયં પરમં જગ્મુર્દેવાસ્તાં વીક્ષ્ય નિર્ગતામ્ ॥ ૪૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
દેવીસાન્ત્વનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૫.૧૯॥

## ૫.૨૦ વિંશોઽધ્યાયઃ । મહિષવધાનન્તરં પૃથિવીસુખવર્ણનમ્ ।

જનમેજય ઉવાચ -
અથાદ્ભુતં વીક્ષ્ય મુને પ્રભાવં
દેવ્યા જગચ્છાન્તિકરં પરઞ્ચ ।
ન તૃપ્તિરસ્તિ દ્વિજવર્ય શૃણ્વતઃ
કથામૃતં તે મુખપદ્મજાતમ્ ॥ ૧॥

અન્તર્હિતાયાં ચ તદા ભવાન્યા
ચક્રુશ્ચ કિં દેવપુરોગમાસ્તે ।
દેવ્યાશ્ચરિત્ર પરમં પવિત્રં
દુરાપમેવાલ્પપુણ્યૈર્નરાણામ્ ॥ ૨॥

કસ્તૃપ્તિમાપ્નોતિ કથામૃતેન
ભિન્નોઽલ્પભાગ્યાત્પટુકર્ણરન્ધ્રઃ ।
પીતેન યેનામરતાં પ્રયાતિ
ધિક્તાન્નરાન્ યે ન પિબન્તિ સાદરમ્ ॥ ૩॥

લીલાચરિત્રં જગદમ્બિકાયા
રક્ષાન્વિતં દેવમહામુનીનામ્ ।
સંસારવાર્ધેસ્તરણં નરાણાં
કથં કૃતજ્ઞા હિ પરિત્યજેયુઃ ॥ ૪॥

મુક્તાશ્ચ યે ચૈવ મુમુક્ષવશ્ચ
સંસારિણો રોગયુતાશ્ચ કેચિત્ ।

તેષાં સદા શ્રોત્રપુટૈશ્ચ પેયં
સર્વાર્થદં વેદવિદો વદન્તિ ॥ ૫॥

તથા વિશેષેણ મુને નૃપાણાં
ધર્માર્થકામેષુ સદા રતાનામ્ ।
મુક્તાશ્ચ યસ્માત્ખલુ તત્પિબન્તિ
કથં ન પેયં રહિતૈશ્ચ તેભ્યઃ ॥ ૬॥

યૈઃ પૂજિતા પૂર્વભવે ભવાની
સત્કુન્દપુષ્પૈરથ ચમ્પકૈશ્ચ ।
બૈલ્વૈર્દલૈસ્તે ભુવિ ભોગયુક્તા
નૃપા ભવન્તીત્યનુમેયમેવમ્ ॥ ૭॥

યે ભક્તિહીના સમવાપ્ય દેહં
તં માનુષં ભારતભૂમિભાગે ।
યૈર્નાર્ચિતા તે ધનધાન્યહીના
રોગાન્વિતાઃ સન્તતિવર્જિતાશ્ચ ॥ ૮॥

ભ્રમન્તિ નિત્યં કિલ દાસભૂતા
આજ્ઞાકરાઃ કેવલભારવાહાઃ ।
દિવાનિશં સ્વાર્થપરાઃ કદાપિ
નૈવાપ્નુવન્ત્યૌદરપૂર્તિમાત્રમ્ ॥ ૯॥

અન્ધાશ્ચ મૂકા બધિરાશ્ચ ખઞ્જાઃ
કુષ્ઠાન્વિતા યે ભુવિ દુઃખભાજઃ ।
તત્રાનુમાનં કવિભિર્વિધેયં
નારાધિતા તૈઃ સતતં ભવાની ॥ ૧૦॥

યે રાજભોગાન્વિતઋદ્ધિપૂર્ણાઃ
સંસેવ્યમાના બહુભિર્મનુષ્યૈઃ ।
દૃશ્યન્તિ યે વા વિભવૈઃ સમેતા-
સ્તૈઃ પૂજિતામ્બેત્યનુમેયમેવ ॥ ૧૧॥

તસ્માત્સત્યવતીસૂનો દેવ્યાશ્ચરિતમુત્તમમ્ ।
કથયસ્વ કૃપાં કૃત્વા દયાવાનસિ સામ્પ્રતમ્ ॥ ૧૨॥

હત્વા તં મહિષં પાપં સ્તુતા સમ્પૂજિતા સુરૈઃ ।

ક્વ ગતા સા મહાલક્ષ્મીઃ સર્વતેજઃસમુદ્ભવા ॥ ૧૩॥

કથિતં તે મહાભાગ ગતાન્તર્ધાનમાશુ સા ।
સ્વર્ગે વા મૃત્યુલોકે વા સંસ્થિતા ભુવનેશ્વરી ॥ ૧૪॥

લયં ગતા વા તત્રૈવ વૈકુણ્ઠે વા સમાશ્રિતા ।
અથવા હેમશૈલે સા તત્ત્વતો મે વદાધુના ॥ ૧૫॥

વ્યાસ ઉવાચ ।
પૂર્વં મયા તે કથિતં મણિદ્વીપં મનોહરમ્ ।
ક્રીડાસ્થાનં સદા દેવ્યા વલ્લભં પરમં સ્મૃતમ્ ॥ ૧૬॥

યત્ર બ્રહ્મા હરિઃ સ્થાણુઃ સ્ત્રીભાવં તે પ્રપેદિરે ।
પુરુષત્વં પુનઃ પ્રાપ્ય સ્વાનિ કાર્યાણિ ચક્રિરે ॥ ૧૭॥

યઃ સુધાસિન્ધુમધ્યેઽસ્તિ દ્વીપઃ પરમશોભનઃ ।
નાનારૂપૈઃ સદા તત્ર વિહારં કુરુતેઽમ્બિકા ॥ ૧૮॥

સ્તુતા સમ્પૂજિતા દેવૈઃ સા તત્રૈવ ગતા શિવા ।
યત્ર સઙ્ક્રીડતે નિત્યં માયાશક્તિઃ સનાતની ॥ ૧૯॥

દેવાસ્તાં નિર્ગતાં વીક્ષ્ય દેવીં સર્વેશ્વરીં તથા ।
રવિવંશોદ્ભવં ચક્રુર્ભૂમિપાલં મહાબલમ્ ॥ ૨૦॥

અયોધ્યાધિપતિં વીરં શત્રુઘ્નં નામ પાર્થિવમ્ ।
સર્વલક્ષણસમ્પન્નં મહિષસ્યાસને શુભે ॥ ૨૧॥

દત્ત્વા રાજ્યં તદા તસ્મૈ દેવા ઇન્દ્રપુરોગમાઃ ।
સ્વકીયૈર્વાહનૈઃ સર્વે જગ્મુઃ સ્વાન્યાલયાનિ તે ॥ ૨૨॥

ગતેષુ તેષુ દેવેષુ પૃથિવ્યાં પૃથિવીપતે ।
ધર્મરાજ્યં બભૂવાથ પ્રજાશ્ચ સુખિતાસ્તથા ॥ ૨૩॥

પર્જન્યઃ કાલવર્ષી ચ ધરા ધાન્યગુણાવૃતા ।
પાદપાઃ ફલપુષ્પાઢ્યા બભૂવુઃ સુખદાઃ સદા ॥ ૨૪॥

ગાવશ્ચ ક્ષીરસમ્પન્ના ઘટોધ્ન્યઃ કામદા નૃણામ્ ।
નદ્યઃ સુમાર્ગગાઃ સ્વચ્છાઃ શીતોદાઃ ખગસંયુતાઃ ॥ ૨૫॥

બ્રાહ્મણા વેદતત્ત્વાશ્ચ યજ્ઞકર્મરતાસ્તથા ।
ક્ષત્રિયા ધર્મસંયુક્તા દાનાધ્યયનતત્પરાઃ ॥ ૨૬॥

શસ્ત્રવિદ્યારતા નિત્યં પ્રજારક્ષણતત્પરાઃ ।
ન્યાયદણ્ડધરાઃ સર્વે રાજાનઃ શમસંયુતાઃ ॥ ૨૭॥

અવિરોધસ્તુ ભૂતાનાં સર્વેષાં સમ્બભૂવ હ ।
આકરા ધનદા નૃણાં વ્રજા ગોયૂથસંયુતાઃ ॥ ૨૮॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ નૃપસત્તમ ।
દેવીભક્તિપરાઃ સર્વે સમ્બભૂવુર્ધરાતલે ॥ ૨૯॥

સર્વત્ર યજ્ઞયૂપાશ્ચ મણ્ડપાશ્ચ મનોહરાઃ ।
મખૈઃ પૂર્ણા ધરાશ્ચાસન્ બ્રાહ્મણૈઃ ક્ષત્રિયૈઃ કૃતૈઃ ॥ ૩૦॥

પતિવ્રતધરા નાર્યઃ સુશીલાઃ સત્યસંયુતાઃ ।
પિતૃભક્તિપરાઃ પુત્રા આસન્ધર્મપરાયણાઃ ॥ ૩૧॥

ન પાખણ્ડં ન વાધર્મઃ કુત્રાપિ પૃથિવીતલે ।
વેદવાદા શાસ્ત્રવાદા નાન્યે વાદાસ્તથાભવન્ ॥ ૩૨॥

કલહો નૈવ કેષાઞ્ચિન્ન દૈન્યં નાશુભા મતિઃ ।
સર્વત્ર સુખિનો લોકાઃ કાલે ચ મરણં તથા ॥ ૩૩॥

સુહૃદાં ન વિયોગશ્ચ નાપદશ્ચ કદાચન ।
નાનાવૃષ્ટિર્ન દુર્ભિક્ષં ન મારી દુઃખદા નૃણામ્ ॥ ૩૪॥

ન રોગો ન ચ માત્સર્યં ન વિરોધઃ પરસ્પરમ્ ।
સર્વત્ર સુખસમ્પન્ના નરા નાર્યઃ સુખાન્વિતાઃ ॥ ૩૫॥

ક્રીડન્તિ માનવાઃ સર્વે સ્વર્ગે દેવગણા ઇવ ।
ન ચૌરા ન ચ પાખણ્ડા વઞ્ચકા દમ્ભકાસ્તથા ॥ ૩૬॥

પિશુના લમ્પટાઃ સ્તબ્ધા ન બભૂવુસ્તદા નૃપ ।
ન વેદદ્વેષિણઃ પાપા માનવાઃ પૃથિવીપતે ॥ ૩૭॥

સર્વધર્મરતા નિત્યં દ્વિજસેવાપરાયણાઃ ।
ત્રિધાત્વાત્સૃષ્ટિધર્મસ્ય ત્રિવિધા બ્રાહ્મણાસ્તતઃ ॥ ૩૮॥

સાત્ત્વિકા રાજસાશ્ચૈવ તામસાશ્ચ તથાપરે ।
સર્વે વેદવિદો દક્ષાઃ સાત્ત્વિકાઃ સત્ત્વવૃત્તયઃ ॥ ૩૯॥

પ્રતિગ્રહવિહીનાશ્ચ દયાદમપરાયણાઃ ।

યજ્ઞાસ્તે સાત્ત્વિકૈરન્નૈઃ કુર્વાણા ધર્મતત્પરાઃ ॥ ૪૦॥

પુરોડાશવિધાનૈશ્ચ પશુભિર્ન કદાચન ।
દાનમધ્યયનઞ્ચૈવ યજનં તુ તૃતીયકમ્ ॥ ૪૧॥

ત્રિકર્મરસિકાસ્તે વૈ સાત્ત્વિકા બ્રાહ્મણા નૃપ ।
રાજસા વેદવિદ્વાંસઃ ક્ષત્રિયાણાં પુરોહિતાઃ ॥ ૪૨॥

ષટ્કર્મનિરતા સર્વે વિધિવન્માંસભક્ષકાઃ ।
યજનં યાજનં દાનં તથૈવ ચ પ્રતિગ્રહઃ ॥ ૪૩॥

અધ્યયનં તુ વેદાનાં તથૈવાધ્યાપનં તુ ષટ્ ।
તામસાઃ ક્રોધસંયુક્તા રાગદ્વેષપરાઃ પુનઃ ॥ ૪૪॥

રાજ્ઞાં કર્મકરા નિત્યં કિઞ્ચિદધ્યયને રતાઃ ।
મહિષે નિહતે સર્વે સુખિનો વેદતત્પરાઃ ॥ ૪૫॥

બભૂવુર્વ્રતનિષ્ણાતા દાનધર્મપરાસ્તથા ।
ક્ષત્રિયાઃ પાલને યુક્તા વૈશ્યા વણિજવૃત્તયઃ ॥ ૪૬॥

કૃષિવાણિજ્યગોરક્ષાકુસીદવૃત્તયઃ પરે ।
એવં પ્રમુદિતો લોકો મહિષે વિનિપાતિતે ॥ ૪૭॥

અનુદ્વેગઃ પ્રજાનાં વૈ સમ્બભૂવ ધનાગમઃ ।
બહુક્ષીરા શુભા ગાવો નદ્યશ્ચૈવ બહૂદકાઃ ॥ ૪૮॥

વૃક્ષા બહુફલાશ્ચાસન્માનવા રોગવર્જિતાઃ ।
નાધયો નેતયઃ ક્વાપિ પ્રજાનાં દુઃખદાયકાઃ ॥ ૪૯॥

ન નિધનમુપયાન્તિ પ્રાણિનસ્તેઽપ્યકાલે
સકલવિભવયુક્તા રોગહીનાઃ સદૈવ ।
નિગમવિહિતધર્મે તત્પરાશ્ચણ્ડિકાયા-
શ્ચરણસરસિજાનાં સેવને દત્તચિત્તાઃ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે મહિષવધાનન્તરં
પૃથિવીસુખવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૫.૨૦॥

## ૫.૨૧ એકવિંશોઽધ્યાયઃ । શુમ્ભનિશુમ્ભદ્વારા સ્વર્ગવિજયવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ દેવ્યાશ્ચરિતમુત્તમમ્ ।
સુખદં સર્વજન્તૂનાં સર્વપાપપ્રણાશનમ્ ॥ ૧॥

યથા શુમ્ભો નિશુમ્ભશ્ચ ભ્રાતરૌ બલવત્તરૌ ।
બભૂવતુર્મહાવીરૌ અવધ્યૌ પુરુષૈઃ કિલ ॥ ૨॥

બહુસેનાવૃતૌ શૂરૌ દેવાનાં દુઃખદૌ સદા
દુરાચારૌ મદોત્સિક્તૌ બહુદાનવસંયુતૌ ॥ ૩॥

હતાવમ્બિકયા તૌ તુ સઙ્ગ્રામેઽતીવ દારુણે ।
દેવાનાઞ્જ હિતાર્થાય સર્વૈઃ પરિચરૈઃ સહ ॥ ૪॥

ચણ્ડમુણ્ડૌ મહાબાહૂ રક્તબીજોઽતિદારુણઃ ।
ધૂમ્રલોચનનામા ચ નિહતાસ્તે રણાઙ્ગણે ॥ ૫॥

તાન્નિહત્ય સુરાણાં સા જહાર ભયમુત્તમમ્ ।
સ્તુતા સમ્પૂજિતા દેવૈર્ગિરૌ હેમાચલે શુભે ॥ ૬॥

રાજોવાચ ।
કાવેતાવસુરાવાદૌ કથં તૌ બલિનાં વરૌ ।
કેન સંસ્થાપિતૌ ચેહ સ્ત્રીવધ્યત્વં કુતો ગતૌ ॥ ૭॥

તપસા વરદાનેન કસ્ય જાતૌ મહાબલૌ ।
કથઞ્ચ નિહતૌ સર્વં કથયસ્વ સવિસ્તરમ્ ॥ ૮॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્કથાં દિવ્યાં સર્વપાપપ્રણાશિનીમ્ ।
દેવ્યાશ્ચરિતસંયુક્તાં સર્વાર્થફલદાં શુભામ્ ॥ ૯॥

પુરા શુમ્ભનિશુમ્ભૌ દ્વાવસુરૌ ભૂમિમણ્ડલે ।
પાતાલતશ્ચ સમ્પ્રાપ્તૌ ભ્રાતરૌ શુભદર્શનૌ ॥ ૧૦॥

તૌ પ્રાપ્તયૌવનૌ ચૈવ ચેરતુસ્તપ ઉત્તમમ્ ।
અન્નોદકં પરિત્યજ્ય પુષ્કરે લોકપાવને ॥ ૧૧॥

વર્ષાણામયુતં યાવદ્યોગવિદ્યાપરાયણૌ ।
એકત્રૈવાસનં કૃત્વા તેપાતે પરમં તપઃ ॥ ૧૨॥

તયોસ્તુષ્ટોઽભવદ્ બ્રહ્મા સર્વલોકપિતામહઃ ।
તત્રાગતશ્ચ ભગવાનારુહ્ય વરટાપતિમ્ ॥ ૧૩॥

તાવુભૌ ચ જગત્સ્રષ્ટા દૃષ્ટ્વા ધ્યાનપરૌ સ્થિતૌ ।
ઉત્તિષ્ઠત મહાભાગૌ તુષ્ટોઽહં તપસા કિલ ॥ ૧૪॥

વાઞ્છિતં વાં વરં કામં દદામિ બ્રુવતામિહ ।
કામદોઽહં સમાયાતો દૃષ્ટ્વા વાં તપસો બલમ્ ॥ ૧૫॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય પ્રબુદ્ધૌ તૌ સમાહિતૌ ।
પ્રદક્ષિણક્રિયાં કૃત્વા પ્રણામં ચક્રતુસ્તદા ॥ ૧૬॥

દણ્ડવત્પ્રણિપાતઞ્ચ કૃત્વા તૌ દુર્બલાકૃતી ।
ઊચતુર્મધુરાં વાચં દીનૌ ગદ્ગદયા ગિરા ॥ ૧૭॥

દેવદેવ દયાસિન્ધો ભક્તાનામભયપ્રદ ।
અમરત્વઞ્ચ નૌ બ્રહ્મન્દેહિ તુષ્ટોઽસિ ચેદ્વિભો ॥ ૧૮॥

મરણાદપરં કિઞ્ચિદ્ભયં નાસ્તિ ધરાતલે ।
તસ્માદ્ભયાચ્ચ સન્ત્રસ્તૌ યુષ્માકં શરણં ગતૌ ॥ ૧૯॥

ત્રાહિ ત્વં દેવદેવેશ જગત્કર્તઃ ક્ષમાનિધે ।
પરિસ્ફોટય વિશ્વાત્મન્ સદ્યો મરણજં ભયમ્ ॥ ૨૦॥

બ્રહ્મોવાચ ।
કિમિદં પ્રાર્થનીયં વો વિપરીતં તુ સર્વથા ।
અદેયં સર્વથા સર્વૈઃ સર્વેભ્યો ભુવનત્રયે ॥ ૨૧॥

જાતસ્ય હિ ધ્રુવો મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
મર્યાદા વિહિતા લોકે પૂર્વં વિશ્વકૃતા કિલ ॥ ૨૨॥

મર્તવ્યં સર્વથા સર્વૈઃ પ્રાણિભિર્નાત્ર સંશયઃ ।
અન્યં પ્રાર્થયતં કામં દદામિ યચ્ચ વાઞ્છિતમ્ ॥ ૨૩॥

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય વચસ્તસ્ય સુવિમૃશ્ય ચ દાનવૌ ।
ઊચતુઃ પ્રણિપત્યાથ બ્રહ્માણં પુરતઃ સ્થિતમ્ ॥ ૨૪॥

પુરુષૈરમરાદ્યૈશ્ચ માનવૈર્મૃગપક્ષિભિઃ ।

અવધ્યત્વં કૃપાસિન્ધો દેહિ નૌ વાઞ્છિતં વરમ્ ॥ ૨૫॥

નારી બલવતી કાસ્તિ યા નૌ નાશં કરિષ્યતિ ।
ન બિભીવઃ સ્ત્રિયઃ કામં ત્રૈલોક્યે સચરાચરે ॥ ૨૬॥

અવધ્યૌ ભ્રાતરૌ સ્યાતાં નરેભ્યઃ પઙ્કજોદ્ભવ ।
ભયં ન સ્ત્રીજનેભ્યશ્ચ સ્વભાવાદબલા હિ સા ॥ ૨૭॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા તયોર્વાક્યં પ્રદદૌ વાઞ્છિતં વરમ્ ।
બ્રહ્મા પ્રસન્નમનસા જગામાથ સ્વમાલયમ્ ॥ ૨૮॥

ગતેઽથ ભવને તસ્મિન્દાનવૌ સ્વગૃહં ગતૌ ।
ભૃગું પુરોહિતં કૃત્વા ચક્રતુઃ પૂજનં તદા ॥ ૨૯॥

શુભે દિને સુનક્ષત્રે જાતરૂપમયં શુભમ્ ।
કૃત્વા સિંહાસનં દિવ્યં રાજ્યાર્થં પ્રદદૌ મુનિઃ ॥ ૩૦॥

શુમ્ભાય જ્યેષ્ઠભૂતાય દદૌ રાજ્યાસનં શુભમ્ ।
સેવનાર્થં તદૈવાશુ સમ્પ્રાપ્તા દાનવોત્તમાઃ ॥ ૩૧॥

ચણ્ડમુણ્ડૌ મહાવીરૌ ભ્રાતરૌ બલદર્પિતૌ ।
સમ્પ્રાપ્તૌ સૈન્યસંયુક્તૌ રથવાજિગજાન્વિતૌ ॥ ૩૨॥

ધૂમ્રલોચનનામા ચ તદ્રૂપશ્ચણ્ડવિક્રમઃ ।
શુમ્ભઞ્ચ ભૂપતિં શ્રુત્વા તદાગાદ્બલસંયુતઃ ॥ ૩૩॥

રક્તબીજસ્તથા શૂરો વરદાનબલાધિકઃ ।
અક્ષૌહિણીભ્યાં સંયુક્તસ્તત્રૈવાગત્ય સઙ્ગતઃ ॥ ૩૪॥

તસ્યૈકં કારણં રાજન્ સઙ્ગ્રામે યુધ્યતઃ સદા ।
દેહાદ્રુધિરસમ્પાતસ્તસ્ય શસ્ત્રાહતસ્ય ચ ॥ ૩૫॥

જાયતે ચ યદા ભૂમાવુત્પદ્યન્તે હ્યનેકશઃ ।
તાદૃશાઃ પુરુષાઃ ક્રૂરા બહવઃ શસ્ત્રપાણયઃ ॥ ૩૬॥

સમ્ભવન્તિ તદાકારાસ્તદ્રૂપાસ્તત્પરાક્રમાઃ ।
યુદ્ધં પુનસ્તે કુર્વન્તિ પુરુષા રક્તસમ્ભવાઃ ॥ ૩૭॥

અતઃ સોઽપિ મહાવીર્યઃ સઙ્ગ્રામેઽતીવ દુર્જયઃ ।
અવધ્યઃ સર્વભૂતાનાં રક્તબીજો મહાસુરઃ ॥ ૩૮॥

અન્યે ચ બહવઃ શૂરાશ્ચતુરઙ્ગસમન્વિતાઃ ।
શુમ્ભઞ્ચ નૃપતિં મત્વા બભૂવુસ્તસ્ય સેવકાઃ ॥ ૩૯॥

અસઙ્ખ્યાતા તદા જાતા સેના શુમ્ભનિશુમ્ભયોઃ ।
પૃથિવ્યાઃ સકલં રાજ્યં ગૃહીતં બલવત્તયા ॥ ૪૦॥

સેનાયોગં તદા કૃત્વા નિશુમ્ભઃ પરવીરહા ।
જગામ તરસા સ્વર્ગે શચીપતિજયાય ચ ॥ ૪૧॥

ચકારાસૌ મહાયુદ્ધં લોકપાલૈઃ સમન્તતઃ ।
વૃત્રહા વજ્રપાતેન તાડયામાસ વક્ષસિ ॥ ૪૨॥

સ વજ્રાભિહતો ભૂમૌ પપાત દાનવાનુજઃ ।
ભગ્નં બલં તદા તસ્ય નિશુમ્ભસ્ય મહાત્મનઃ ॥ ૪૩॥

ભ્રાતરં મૂર્ચ્છિતં શ્રુત્વા શુમ્ભઃ પરબલાર્દનઃ ।
તત્રાગત્ય સુરાન્સર્વાંસ્તાડયામાસ સાયકૈઃ ॥ ૪૪॥

કૃતં યુદ્ધં મહત્તેન શુમ્ભેનાક્લિષ્ટકર્મણા ।
નિર્જિતાસ્તુ સુરાઃ સર્વે સેન્દ્રાઃ પાલાશ્ચ સર્વશઃ ॥ ૪૫॥

ઐન્દ્રં પદં તદા તેન ગૃહીતં બલવત્તયા ।
કલ્પપાદપસંયુક્તં કામધેનુસમન્વિતમ્ ॥ ૪૬॥

ત્રૈલોક્યં યજ્ઞભાગાશ્ચ હૃતાસ્તેન મહાત્મના ।
નન્દનં ચ વનં પ્રાપ્ય મુદિતોઽભૂન્મહાસુરઃ ॥ ૪૭॥

સુધાયાશ્ચૈવ પાનેન સુખમાપ મહાસુરઃ ।
કુબેરં સ ચ નિર્જિત્ય તસ્ય રાજ્યં ચકાર હ ॥ ૪૮॥

અધિકારં તથા ભાનોઃ શશિનશ્ચ ચકાર હ ।
યમઞ્ચૈવ વિનિર્જિત્ય જગ્રાહ તત્પદં તથા ॥ ૪૯॥

વરુણસ્ય તથા રાજ્યં ચકાર વહ્નિકર્મ ચ ।
વાયોઃ કાર્યં નિશુમ્ભશ્ચ ચકાર સ્વબલાન્વિતઃ ॥ ૫૦॥

તતો દેવા વિનિર્ધૂતા હૃતરાજ્યા હૃતશ્રિયઃ ।
સન્ત્યજ્ય નન્દનં સર્વે નિર્યયુર્ગિરિગહ્વરે ॥ ૫૧॥

હૃતાધિકારાસ્તે સર્વે બભ્રમુર્વિજને વને ।

નિરાલમ્બા નિરાધારા નિસ્તેજસ્કા નિરાયુધાઃ ॥ ૫૨॥

વિચેરુરમરાઃ સર્વે પર્વતાનાં ગુહાસુ ચ ।
ઉદ્યાનેષુ ચ શૂન્યેષુ નદીનાં ગહ્વરેષુ ચ ॥ ૫૩॥

ન પ્રાપુસ્તે સુખં વાપિ સ્થાનભ્રષ્ટા વિચેતસઃ ।
લોકપાલા મહારાજ દૈવાધીનં સુખં કિલ ॥ ૫૪॥

બલવન્તો મહાભાગા બહુજ્ઞા ધનસંયુતાઃ ।
કાલે દુઃખં તથા દૈન્યમાપ્નુવન્તિ નરાધિપ ॥ ૫૫॥

ચિત્રમેતન્મહારાજ કાલસ્યૈવ વિચેષ્ટિતમ્ ।
યઃ કરોતિ નરં તાવદ્રાજાનં ભિક્ષુકં તતઃ ॥ ૫૬॥

દાતારં યાચકં ચૈવ બલવન્તં તથાબલમ્ ।
પણ્ડિતં વિકલં કામં શૂરં ચાતીવ કાતરમ્ ॥ ૫૭॥

મખાનાઞ્ચ શતં કૃત્વા પ્રાપ્યેન્દ્રાસનમુત્તમમ્ ।
પુનર્દુઃખં પરં પ્રાપ્તં કાલસ્ય ગતિરીદૃશી ॥ ૫૮॥

કાલઃ કરોતિ ધર્મિષ્ઠં પુરુષં જ્ઞાનસંયુતમ્ ।
તમેવાતીવ પાપિષ્ઠં જ્ઞાનલેશવિવર્જિતમ્ ॥ ૫૯॥

ન વિસ્મયોઽત્ર કર્તવ્યઃ સર્વથા કાલચેષ્ટિતે ।
બ્રહ્મવિષ્ણુહરાદીનામપીદૃક્કષ્ટચેષ્ટિતમ્ ॥ ૬૦॥

વિષ્ણુર્જનનમાપ્નોતિ સૂકરાદિષુ યોનિષુ ।
હરઃ કપાલી સઞ્જાતઃ કાલેનૈવ બલીયસા ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે શુમ્ભનિશુમ્ભદ્વારા
સ્વર્ગવિજયવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૫.૨૧॥

## ૫.૨૨ દ્વાવિંશોઽધ્યાયઃ । દેવકૃતદેવ્યારાધનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
પરાજિતાઃ સુરાઃ સર્વે રાજ્યં શુમ્ભઃ શશાસ હ ।
એવં વર્ષસહસ્રં તુ જગામ નૃપસત્તમ ॥ ૧॥

ભ્રષ્ટરાજ્યાસ્તતો દેવાશ્ચિન્તામાપુઃ સુદુસ્તરામ્ ।

ગુરું દુઃખાતુરાસ્તે તુ પપ્રચ્છુરિદમાદૃતાઃ ॥ ૨॥

કિં કર્તવ્યં ગુરો બ્રૂહિ સર્વજ્ઞસ્ત્વં મહામુનિઃ ।
ઉપાયોઽસ્તિ મહાભાગ દુઃખસ્ય વિનિવૃત્તયે ॥ ૩॥

ઉપચારપરા નૂનં વેદમન્ત્રાઃ સહસ્રશઃ ।
વાઞ્છિતાર્થકરા નૂનં સૂત્રૈઃ સંલક્ષિતાઃ કિલ ॥ ૪॥

ઇષ્ટયો વિવિધાઃ પ્રોક્તાઃ સર્વકામફલપ્રદાઃ ।
તાઃ કુરુષ્વ મુને નૂનં ત્વં જાનાસિ ચ તત્ક્રિયાઃ ॥ ૫॥

વિધિઃ શત્રુવિનાશાય યથોદ્દિષ્ટઃ સદાગમે ।
તં કુરુષ્વાદ્ય વિધિવદ્યથા નો દુઃખસઙ્ક્ષયઃ ॥ ૬॥

ભવેદાઙ્ગિરસાદ્યૈવ તથા ત્વં કર્તુમર્હસિ ।
દાનવાનાં વિનાશાય અભિચારં યથામતિ ॥ ૭॥

બૃહસ્પતિરુવાચ ।
સર્વે મન્ત્રાશ્ચ વેદોક્તા દૈવાધીનફલાશ્ચ તે ।
ન સ્વતન્ત્રાઃ સુરાધીશ તથૈકાન્તફલપ્રદાઃ ॥ ૮॥

મન્ત્રાણાં દેવતા યૂયં તે તુ દુઃખૈકભાજનમ્ ।
જાતાઃ સ્મ કાલયોગેન કિં કરોમિ પ્રસાધનમ્ ॥ ૯॥

ઇન્દ્રાગ્નિવરુણાદીનાં યજનં યજ્ઞકર્મસુ ।
તે યૂયં વિપદં પ્રાપ્તાઃ કરિષ્યન્તિ કિમિષ્ટયઃ ॥ ૧૦॥

અવશ્યમ્ભાવિભાવાનાં પ્રતીકારો ન વિદ્યતે ।
ઉપાયસ્ત્વથ કર્તવ્ય ઇતિ શિષ્ટાનુશાસનમ્ ॥ ૧૧॥

દૈવં હિ બલવત્કેચિત્પ્રવદન્તિ મનીષિણઃ ।
ઉપાયવાદિનો દૈવં પ્રવદન્તિ નિરર્થકમ્ ॥ ૧૨॥

દૈવં ચૈવાપ્યુપાયશ્ચ દ્વાવેવાભિમતૌ નૃણામ્ ।
કેવલં દૈવમાશ્રિત્ય ન સ્થાતવ્યં કદાચન ॥ ૧૩॥

ઉપાયઃ સર્વથા કાર્યો વિચાર્ય સ્વધિયા પુનઃ ।
તસ્માદ્ બ્રવીમિ વઃ સર્વાન્સંવિચાર્ય પુનઃ પુનઃ ॥ ૧૪॥

પુરા ભગવતી તુષ્ટા જઘાન મહિષાસુરમ્ ।
યુષ્માભિસ્તુ સ્તુતા દેવી વરદાનં દદાવથ ॥ ૧૫॥

આપદં નાશયિષ્યામિ સંસ્મૃતા વા સદૈવ હિ ।
યદા યદા વો દેવેશા આપદો દૈવસમ્ભવાઃ ॥ ૧૬॥

પ્રભવન્તિ તદા કામં સ્મર્તવ્યાહં સુરૈઃ સદા ।
સ્મૃતાહં નાશયિષ્યામિ યુષ્માકં પરમાપદઃ ॥ ૧૭॥

તસ્માદ્ધિમાચલે ગત્વા પર્વતે સુમનોહરે ।
આરાધનં ચણ્ડિકાયાઃ કુરુધ્વં પ્રેમપૂર્વકમ્ ॥ ૧૮॥

માયાબીજવિધાનજ્ઞાસ્તત્પુરશ્ચરણે રતાઃ ।
જાનામ્યહં યોગબલાત્પ્રસન્ના સા ભવિષ્યતિ ॥ ૧૯॥

દુઃખસ્યાન્તોઽદ્ય યુષ્માકં દૃશ્યતે નાત્ર સંશયઃ ।
તસ્મિઞ્છૈલે સદા દેવી તિષ્ઠતીતિ મયા શ્રુતમ્ ॥ ૨૦॥

સ્તુતા સમ્પૂજિતા સદ્યો વાઞ્છિતાર્થાન્ પ્રદાસ્યતિ ।
નિશ્ચયં પરમં કૃત્વા ગચ્છધ્વં વૈ હિમાલયમ્ ॥ ૨૧॥

સુરાઃ સર્વાણિ કાર્યાણિ સા વઃ કામં વિધાસ્યતિ ।
વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા દેવાસ્તે પ્રયયુર્ગિરિમ્ ॥ ૨૨॥

હિમાલયં મહારાજ દેવીધ્યાનપરાયણાઃ ।
માયાબીજં હૃદા નિત્યં જપન્તઃ સર્વ એવ હિ ॥ ૨૩॥

નમશ્ચક્રુર્મહામાયાં ભક્તાનામભયપ્રદામ્ ।
તુષ્ટુવુઃ સ્તોત્રમન્ત્રૈશ્ચ ભક્ત્યા પરમયા યુતાઃ ॥ ૨૪॥

નમો દેવિ વિશ્વેશ્વરિ પ્રાણનાથે
સદાનન્દરૂપે સુરાનન્દદે તે ।
નમો દાનવાન્તપ્રદે માનવાના-
મનેકાર્થદે ભક્તિગમ્યસ્વરૂપે ॥ ૨૫॥

ન તે નામસઙ્ખ્યાં ન તે રૂપમીદૃ-
ક્તથા કોઽપિ વેદાદિદેવસ્વરૂપે ।
ત્વમેવાસિ સર્વેષુ શક્તિસ્વરૂપા
પ્રજાસૃષ્ટિસંહારકાલે સદૈવ ॥ ૨૬॥

સ્મૃતિસ્ત્વં ધૃતિસ્ત્વં ત્વમેવાસિ બુદ્ધિ-
ર્જરા પુષ્ટિતુષ્ટી ધૃતિઃ કાન્તિશાન્તી ।
સુવિદ્યા સુલક્ષ્મીર્ગતિઃ કીર્તિમેધે
ત્વમેવાસિ વિશ્વસ્ય બીજં પુરાણમ્ ॥ ૨૭॥

યદા યૈઃ સ્વરૂપૈઃ કરોષીહ કાર્યં
સુરાણાં ચ તેભ્યો નમામોઽદ્ય શાન્ત્યૈ ।
ક્ષમા યોગનિદ્રા દયા ત્વં વિવક્ષા
સ્થિતા સર્વભૂતેષુ શસ્તૈઃ સ્વરૂપૈઃ ॥ ૨૮॥

કૃતં કાર્યમાદૌ ત્વયા યત્સુરાણાં
હતોઽસૌ મહારિર્મદાન્ધો હયારિઃ ।
દયા તે સદા સર્વદેવેષુ દેવિ
પ્રસિદ્ધા પુરાણેષુ વેદેષુ ગીતા ॥ ૨૯॥

કિમત્રાસ્તિ ચિત્રં યદમ્બા સુતં સ્વં
મુદા પાલયેત્પોષયેત્સમ્યગેવ ।
યતસ્ત્વં જનિત્રી સુરાણાં સહાયા
કુરુષ્વૈકચિત્તેન કાર્યં સમગ્રમ્ ॥ ૩૦॥

ન વા તે ગુણાનામિયત્તાં સ્વરૂપં
વયં દેવિ જાનીમહે વિશ્વવન્દ્યે ।
કૃપાપાત્રમિત્યેવ મત્વા તથાસ્મા-
ન્ભયેભ્યઃ સદા પાહિ પાતું સમર્થે ॥ ૩૧॥

વિના બાણપાતૈર્વિના મુષ્ટિઘાતૈ-
ર્વિનાશૂલખડ્ગૈર્વિના શક્તિદણ્ડૈઃ ।
રિપૂન્હન્તુમેવાસિ શક્તા વિનોદા-
ત્તથાપીહ લોકોપકારાય લીલા ॥ ૩૨॥

ઇદં શાશ્વતં નૈવ જાનન્તિ મૂઢા
ન કાર્યં વિના કારણં સમ્ભવેદ્વા ।
વયં તર્કયામોઽનુમાનં પ્રમાણં
ત્વમેવાસિ કર્તાસ્ય વિશ્વસ્ય ચેતિ ॥ ૩૩॥

અજઃ સૃષ્ટિકર્તા મુકુન્દોઽવિતાયં
હરો નાશકૃદ્વૈ પુરાણે પ્રસિદ્ધઃ ।

ન કિં ત્વત્પ્રસૂતાસ્ત્રયસ્તે યુગાદૌ
ત્વમેવાસિ સર્વસ્ય તેનૈવ માતા ॥ ૩૪॥

ત્રિભિસ્ત્વં પુરારાધિતા દેવિ દત્તા
ત્વયા શક્તિરુગ્રા ચ તેભ્યઃ સમગ્રા ।
ત્વયા સંયુતાસ્તે પ્રકુર્વન્તિ કામં
જગત્પાલનોત્પત્તિસંહારમેવ ॥ ૩૫॥

તે કિં ન મન્દમતયો યતયો વિમૂઢા-
સ્ત્વાં યે ન વિશ્વજનનીં સમુપાશ્રયન્તિ ।
વિદ્યાં પરાં સકલકામફલપ્રદાં તાં
મુક્તિપ્રદાં વિબુધવૃન્દસુવન્દિતાઙ્ઘ્રિમ્ ॥ ૩૬॥

યે વૈષ્ણવાઃ પાશપતાશ્ચ સૌરા
દમ્ભાસ્ત એવ પ્રતિભાન્તિ નૂનમ્ ।
ધ્યાયન્તિ ન ત્વાં કમલાઞ્ચ લજ્જાં
કાન્તિં સ્થિતિં કીર્તિમથાપિ પુષ્ટિમ્ ॥ ૩૭॥

હરિહરાદિભિરપ્યથ સેવિતા
ત્વમિહ દેવવરૈરસુરૈસ્તથા ।
ભુવિ ભજન્તિ ન યેઽલ્પધિયો નરા
જનનિ તે વિધિના ખલુ વઞ્ચિતાઃ ॥ ૩૮॥

જલધિજાપદપઙ્કજરઞ્જનં
જતુરસેન કરોતિ હરિઃ સ્વયમ્ ।
ત્રિનયનોઽપિ ધરાધરજાઙ્ઘ્રિપં-
કજપરાગનિષેવણતત્પરઃ ॥ ૩૯॥

કિમપરસ્ય નરસ્ય કથાનકૈ-
સ્તવ પદાબ્જયુગં ન ભજન્તિ કે ।
વિગતરાગગૃહાશ્ચ દયાં ક્ષમાં
કૃતધિયો મુનયોઽપિ ભજન્તિ તે ॥ ૪૦॥

દેવિ ત્વદઙ્ઘ્રિભજને ન જના રતા યે
સંસારકૂપપતિતાઃ પતિતાઃ કિલામી ।
તે કુષ્ઠગુલ્મશિરાધિયુતા ભવન્તિ
દારિદ્ર્યદૈન્યસહિતા રહિતાઃ સુખૌઘૈઃ ॥ ૪૧॥

યે કાષ્ઠભારવહને યવસાવહારે
કાર્યે ભવન્તિ નિપુણા ધનદારહીનાઃ ।
જાનીમહેઽલ્પમતિભિર્ભવદઙ્ઘ્રિસેવા
પૂર્વે ભવે જનનિ તૈર્ન કૃતા કદાપિ ॥ ૪૨॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા સુરૈઃ સર્વૈરમ્બિકા કરુણાન્વિતા ।
પ્રાદુર્બભૂવ તરસા રૂપયૌવનસંયુતા ॥ ૪૩॥

દિવ્યામ્બરધરા દેવી દિવ્યભૂષણભૂષિતા ।
દિવ્યમાલ્યસમાયુક્તા દિવ્યચન્દનચર્ચિતા ॥ ૪૪॥

જગન્મોહનલાવણ્યા સર્વલક્ષણલક્ષિતા ।
અદ્વિતીયસ્વરૂપા સા દેવાનાં દર્શનં ગતા ॥ ૪૫॥

જાહ્નવ્યાં સ્નાતુકામા સા નિર્ગતા ગિરિગહ્વરાત્ ।
દિવ્યરૂપધરા દેવી વિશ્વમોહનમોહિની ॥ ૪૬॥

દેવાન્સ્તુતિપરાનાહ મેઘગમ્ભીરયા ગિરા ।
પ્રેમપૂર્વં સ્મિતં કૃત્વા કોકિલામઞ્જુવાદિની ॥ ૪૭॥

દેવ્યુવાચ ।
ભો ભોઃ સુરવરાઃ કાત્ર ભવદ્ભિઃ સ્તૂયતે ભૃશમ્ ।
કિમર્થં બ્રૂત વઃ કાર્યં ચિન્તાવિષ્ટાઃ કુતઃ પુનઃ ॥ ૪૮॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા ભાષિતં તસ્યા મોહિતા રૂપસમ્પદા ।
પ્રેમપૂર્વં હૃદુત્સાહાસ્તામૂચુઃ સુરસત્તમાઃ ॥ ૪૯॥

દેવા ઊચુઃ ।
દેવિ સ્તુમસ્ત્વાં વિશ્વેશિ પ્રણતાઃ સ્મ કૃપાર્ણવે ।
પાહિ નઃ સર્વદુઃખેભ્યઃ સંવિગ્નાન્દૈત્યતાપિતાન્ ॥ ૫૦॥

પુરા ત્વયા મહાદેવિ નિહત્યાસુરકણ્ટકમ્ ।
મહિષં નો વરો દત્તઃ સ્મર્તવ્યાહં સદાપદિ ॥ ૫૧॥

સ્મરણાદ્દૈત્યજાં પીડાં નાશયિષ્યામ્યસંશયમ્ ।
તેન ત્વં સંસ્મૃતા દેવિ નૂનમસ્માભિરિત્યપિ ॥ ૫૨॥

અથ શુમ્ભનિશુમ્ભૌ દ્વાવસુરૌ ઘોરદર્શનૌ ।
ઉત્પન્નૌ વિઘ્નકર્તારાવહન્યૌ પુરુષૈઃ કિલ ॥ ૫૩॥

રક્તબીજશ્ચ બલવાંશ્ચણ્ડમુણ્ડૌ તથાસુરૌ ।
એતૈરન્યૈશ્ચ દેવાનાં હૃતં રાજ્યં મહાબલૈઃ ॥ ૫૪॥

ગતિરન્યા ન ચાસ્માકં ત્વમેવાસિ મહાબલે ।
કુરુ કાર્યં સુરાણાં વૈ દુઃખિતાનાં સુમધ્યમે ॥ ૫૫॥

દેવાસ્ત્વદઙ્ઘ્રિભજને નિરતાઃ સદૈવ
તે દાનવૈરતિબલૈર્વિપદં સુનીતાઃ ।
તાન્દેવિ દુઃખરહિતાન્ કુરુ ભક્તિયુક્તા-
ન્માતસ્ત્વમેવ શરણં ભવ દુઃખિતાનામ્ ॥ ૫૬॥

સકલભુવનરક્ષા દેવિ કાર્યા ત્વયાદ્ય
સ્વકૃતમિતિ વિદિત્વા વિશ્વમેતદ્યુગાદૌ ।
જનનિ જગતિ પીડાં દાનવા દર્પયુક્તાઃ
સ્વબલમદસમેતાસ્તે પ્રકુર્વન્તિ માતઃ ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
દેવકૃતદેવ્યારાધનવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૫.૨૨॥

## ૫.૨૩ ત્રયોવિંશોઽધ્યાયઃ । દેવ્યા સુગ્રીવદૂતાય સ્વવ્રતકથનમ્ ।

વ્યાસ ઉવાચ ।
એવં સ્તુતા તદા દેવી દૈવતૈઃ શત્રુતાપિતૈઃ ।
સ્વશરીરાત્પરં રૂપં પ્રાદુર્ભૂતં ચકાર હ ॥ ૧॥

પાર્વત્યાસ્તુ શરીરાદ્વૈ નિઃસૃતા ચામ્બિકા યદા ।
કૌશિકીતિ સમસ્તેષુ તતો લોકેષુ પઠ્યતે ॥ ૨॥

નિઃસૃતાયાં તુ તસ્યાં સા પાર્વતી તનુવ્યત્યયાત્ ।
કૃષ્ણરૂપાથ સઞ્જાતા કાલિકા સા પ્રકીર્તિતા ॥ ૩॥

મષીવર્ણા મહાઘોરા દૈત્યાનાં ભયવર્ધિની ।

કાલરાત્રીતિ સા પ્રોક્તા સર્વકામફલપ્રદા ॥ ૪॥

અમ્બિકાયાઃ પરં રૂપં વિરરાજ મનોહરમ્ ।
સર્વભૂષણસંયુક્તં લાવણ્યગુણસંયુતમ્ ॥ ૫॥

તતોઽમ્બિકા તદા દેવાનિત્યુવાચ હ સસ્મિતા ।
તિષ્ઠન્તુ નિર્ભયા યૂયં હનિષ્યામિ રિપૂનિહ ॥ ૬॥

કાર્યં વઃ સર્વથા કાર્યં વિહરિષ્યામ્યહં રણે ।
નિશુમ્ભાદીન્વધિષ્યામિ યુષ્માકં સુખહેતવે ॥ ૭॥

ઇત્યુક્ત્વા સા તદા દેવી સિંહારૂઢા મદોત્કટા ।
કાલિકાં પાર્શ્વતઃ કૃત્વા જગામ નગરે રિપોઃ ॥ ૮॥

સા ગત્વોપવને તસ્થાવમ્બિકા કાલિકાન્વિતા ।
જગાવથ કલં તત્ર જગન્મોહનમોહનમ્ ॥ ૯॥

શ્રુત્વા તન્મધુરં ગાનં મોહમીયુઃ ખગા મૃગાઃ ।
મુદઞ્ચ પરમાં પ્રાપુરમરા ગગને સ્થિતાઃ ॥ ૧૦॥

તસ્મિન્નવસરે તત્ર દાનવૌ શુમ્ભસેવકૌ ।
ચણ્ડમુણ્ડાભિધૌ ઘોરૌ રમમાણૌ યદૃચ્છયા ॥ ૧૧॥

આગતૌ દદૃશાતે તુ તાં તદા દિવ્યરૂપિણીમ્ ।
અમ્બિકાં ગાનસંયુક્તાં કાલિકાં પુરતઃ સ્થિતામ્ ॥ ૧૨॥

દૃષ્ટ્વા તાં દિવ્યરૂપાઞ્ચ દાનવૌ વિસ્મયાન્વિતૌ ।
જગ્મતુસ્તરસા પાર્શ્વં શુમ્ભસ્ય નૃપસત્તમ ॥ ૧૩॥

તૌ ગત્વા તં સમાસીનં દૈત્યાનામધિપં ગૃહે ।
ઊચતુર્મધુરાં વાણીં પ્રણમ્ય શિરસા નૃપમ્ ॥ ૧૪॥

રાજન્ હિમાલયાત્કામં કામિની કામમોહિની ।
સમ્પ્રાપ્તા સિંહમારૂઢા સર્વલક્ષણસંયુતા ॥ ૧૫॥

નેદૃશી દેવલોકેઽસ્તિ ન ગન્ધર્વપુરે તથા ।
ન દૃષ્ટા ન શ્રુતા ક્વાપિ પૃથિવ્યાં પ્રમદોત્તમા ॥ ૧૬॥

ગાનઞ્ચ તાદૃશં રાજન્ કરોતિ જનરઞ્જનમ્ ।
મૃગાસ્તિષ્ઠન્તિ તત્પાર્શ્વે મધુરસ્વરમોહિતાઃ ॥ ૧૭॥

જ્ઞાયતાં કસ્ય પુત્રીયં કિમર્થમિહ ચાગતા ।
ગૃહ્યતાં રાજશાર્દૂલ તવ યોગ્યાસ્તિ કામિની ॥ ૧૮॥

જ્ઞાત્વાઽઽનય ગૃહે ભાર્યાં કુરુ કલ્યાણલોચનામ્ ।
નિશ્ચિતં નાસ્તિ સંસારે નારી ત્વેવંવિધા કિલ ॥ ૧૯॥

દેવાનાં સર્વરત્નાનિ ગૃહીતાનિ ત્વયા નૃપ ।
કસ્માન્નેમાં વરારોહાં પ્રગહ્ણાસિ નૃપોત્તમ ॥ ૨૦॥

ઇન્દ્રસ્યૈરાવતઃ શ્રીમાન્પારિજાતતરુસ્તથા ।
ગૃહીતોઽશ્વઃ સપ્તમુખસ્ત્વયા નૃપ બલાત્કિલ ॥ ૨૧॥

વિમાનં વૈધસં દિવ્યં મરાલધ્વજસંયુતમ્ ।
ત્વયાત્તં રત્નભૂતં તદ્બલેન નૃપ ચાદ્ભુતમ્ ॥ ૨૨॥

કુબેરસ્ય નિધિઃ પદ્મસ્ત્વયા રાજન્ સમાહૃતઃ ।
છત્રં જલપતેઃ શુભ્રં ગૃહીતં તત્ત્વયા બલાત્ ॥ ૨૩॥

પાશશ્ચાપિ નિશુમ્ભેન ભ્રાત્રા તવ નૃપોત્તમ ।
ગૃહીતોઽસ્તિ હઠાત્કામં વરુણસ્ય જિતસ્ય ચ ॥ ૨૪॥

અમ્લાનપઙ્કજાં તુભ્યં માલાં જલનિધિર્દદૌ ।
ભયાત્તવ મહારાજ રત્નાનિ વિવિધાનિ ચ ॥ ૨૫॥

મૃત્યોઃ શક્તિર્યમસ્યાપિ દણ્ડઃ પરમદારુણઃ ।
ત્વયા જિત્વા હૃતઃ કામં કિમન્યદ્વર્ણ્યતે નૃપ ॥ ૨૬॥

કામધેનુર્ગૃહીતાદ્ય વર્તતે સાગરોદ્ભવા ।
મેનકાદ્યા વશે રાજંસ્તવ તિષ્ઠન્તિ ચાપ્સરાઃ ॥ ૨૭॥

એવં સર્વાણિ રત્નાનિ ત્વયાત્તાનિ બલાદપિ ।
કસ્માન્ન ગૃહ્યતે કાન્તારત્નમેષા વરાઙ્ગના ॥ ૨૮॥

સર્વાણિ તે ગૃહસ્થાનિ રત્નાનિ વિશદાન્યથ ।
અનયા સમ્ભવિષ્યન્તિ રત્નભૂતાનિ ભૂપતે ॥ ૨૯॥

ત્રિષુ લોકેષુ દૈત્યેન્દ્ર નેદૃશી વર્તતે પ્રિયા ।
તસ્માત્તામાનયાશુ ત્વં કુરુ ભાર્યાં મનોહરામ્ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા તયોર્વાક્યં મધુરં મધુરાક્ષરમ્ ।

પ્રસન્નવદનઃ પ્રાહ સુગ્રીવં સનિધૌ સ્થિતમ્ ॥ ૩૧॥

ગચ્છ સુગ્રીવ દૂતત્વં કુરુ કાર્યં વિચક્ષણ ।
વક્તવ્યઞ્ચ તથા તત્ર યથાભ્યેતિ કૃશોદરી ॥ ૩૨॥

ઉપાયૌ દ્વૌ પ્રયોક્તવ્યૌ કાન્તાસુ સુવિચક્ષણૈઃ ।
સામદાને ઇતિ પ્રાહુઃ શ‍ૃઙ્ગારરસકોવિદાઃ ॥ ૩૩॥

ભેદે પ્રયુજ્યમાનેઽપિ રસાભાસસ્તુ જાયતે ।
નિગ્રહે રસભઙ્ગઃ સ્યાત્તસ્માત્તૌ દૂષિતૌ બુધૈઃ ॥ ૩૪॥

સામદાનમુખૈર્વાક્યૈઃ શ્લક્ષ્ણૈર્નર્મયુતૈસ્તથા ।
કા ન યાતિ વશે દૂત કામિની કામપીડિતા ॥ ૩૫॥

વ્યાસ ઉવાચ ।
સુગ્રીવસ્તુ વચઃ શ્રુત્વા શુમ્ભોક્તં સુપ્રિયં પટુ ।
જગામ તરસા તત્ર યત્રાસ્તે જગદમ્બિકા ॥ ૩૬॥

સોઽપશ્યત્સુમુખીં કાન્તાં સિંહસ્યોપરિસંસ્થિતામ્ ।
પ્રણમ્ય મધુરં વાક્યમુવાચ જગદમ્બિકામ્ ॥ ૩૭॥

દૂત ઉવાચ ।
વરોરુ ત્રિદશારાતિઃ શુમ્ભઃ સર્વાઙ્ગસુન્દરઃ ।
ત્રૈલોક્યાધિપતિઃ શૂરઃ સર્વજિદ્રાજતે નૃપઃ ॥ ૩૮॥

તેનાહં પ્રેષિતઃ કામં ત્વત્સકાશં મહાત્મના ।
ત્વદ્રૂપશ્રવણાસક્તચિત્તેનાતિવિદૂયતા ॥ ૩૯॥

વચનં તસ્ય તન્વઙ્ગિ શ‍ૃણુ પ્રેમપુરઃસરમ્ ।
પ્રણિપત્ય યથા પ્રાહ દૈત્યાનામધિપસ્ત્વયિ ॥ ૪૦॥

દેવા મયા જિતાઃ સર્વે ત્રૈલોક્યાધિપતિસ્ત્વહમ્ ।
યજ્ઞભાગાનહં કાન્તે ગૃહ્ણામીહ સ્થિતઃ સદા ॥ ૪૧॥

હૃતસારા કૃતા નૂનં દ્યૌર્મયા રત્નવર્જિતા ।
યાનિ રત્નાનિ દેવાનાં તાનિ ચાહૃતવાનહમ્ ॥ ૪૨॥

ભોક્તાહં સર્વરત્નાનાં ત્રિષુ લોકેષુ ભામિનિ ।
વશાનુગાઃ સુરાઃ સર્વે મમ દૈત્યાશ્ચ માનવાઃ ॥ ૪૩॥

ત્વદ્ગુણૈઃ કર્ણમાગત્ય પ્રવિશ્ય હૃદયાન્તરમ્ ।

ત્વદધીનઃ કૃતઃ કામં કિઙ્કરોઽસ્મિ કરોમિ કિમ્ ॥ ૪૪॥

ત્વમાજ્ઞાપય રમ્ભોરુ તત્કરોમિ વશાનુગઃ ।
દાસોઽહં તવ ચાર્વઙ્ગિ રક્ષ માં કામબાણતઃ ॥ ૪૫॥

ભજ માં ત્વં મરાલાક્ષિ તવાધીનં સ્મરાકુલમ્ ।
ત્રૈલોક્યસ્વામિની ભૂત્વા ભુઙ્ક્ષ્વ ભોગાનનુત્તમાન્ ॥ ૪૬॥

તવ ચાજ્ઞાકરઃ કાન્તે ભવામિ મરણાવધિ ।
અવધ્યોઽસ્મિ વરારોહે સદેવાસુરમાનુષૈઃ ॥ ૪૭॥

સદા સૌભાગ્યસંયુક્તા ભવિષ્યસિ વરાનને ।
યત્ર તે રમતે ચિત્તં તત્ર ક્રીડસ્વ સુન્દરિ ॥ ૪૮॥

ઇતિ તસ્ય વચશ્ચિત્તે વિમૃશ્ય મદમન્થરે ।
વક્તવ્યં યદ્ભવેત્પ્રેમણા તદ્ બ્રૂહિ મધુરં વચઃ ॥ ૪૯॥

શુમ્ભાય ચઞ્ચલાપાઙ્ગિ તદ્બ્રવીમ્યહમાશુ વૈ ।
વ્યાસ ઉવાચ ।
તદ્દૂતવચનં શ્રુત્વા સ્મિતં કૃત્વા સુપેશલમ્ ॥ ૫૦॥

તં પ્રાહ મધુરાં વાચં દેવી દેવાર્થસાધિકા ।
દેવ્યુવાચ ।
જાનામ્યહં નિશુમ્ભં ચ શુમ્ભં ચાતિબલં નૃપમ્ ॥ ૫૧॥

જેતારં સર્વદેવાનાં હન્તારઞ્ચૈવ વિદ્વિષામ્ ।
રાશિં સર્વગુણાનાઞ્ચ ભોક્તારં સર્વસમ્પદામ્ ॥ ૫૨॥

દાતારં ચાતિશૂરં ચ સુન્દરં મન્મથાકૃતિમ્ ।
દ્વાત્રિંશલ્લક્ષણૈર્યુક્તમવધ્યં સુરમાનુષૈઃ ॥ ૫૩॥

જ્ઞાત્વા સમાગતાસ્મ્યત્ર દ્રષ્ટુકામા મહાસુરમ્ ।
રત્નં કનકમાયાતિ સ્વશોભાધિકવૃદ્ધયે ॥ ૫૪॥

તત્રાહં સ્વપતિં દ્રષ્ટું દૂરાદેવાગતાસ્મિ વૈ ।
દૃષ્ટા મયા સુરાઃ સર્વે માનવા ભુવિ માનદાઃ ॥ ૫૫॥

ગન્ધર્વા રાક્ષસાશ્ચાન્યે યે ચાતિપ્રિયદર્શનાઃ ।
સર્વે શુમ્ભભયાદ્ભીતા વેપમાના વિચેતસઃ ॥ ૫૬॥

શ્રુત્વા શુમ્ભગુણાનત્ર પ્રાપ્તાસ્મ્યદ્ય દિદૃક્ષયા ।

ગચ્છ દૂત મહાભાગ બ્રૂહિ શુમ્ભં મહાબલમ્ ॥ ૫૭॥

નિર્જને શ્લક્ષ્ણયા વાચા વચનં વચનાન્મમ ।
ત્વાં જ્ઞાત્વા બલિનાં શ્રેષ્ઠં સુન્દરાણાં ચ સુન્દરમ્ ॥ ૫૮॥

દાતારં ગુણિનં શૂરં સર્વવિદ્યાવિશારદમ્ ।
જેતારં સર્વદેવાનાં દક્ષં યોગ્યં કુલોત્તરમ્ ॥ ૫૯॥

ભોક્તારં સર્વરત્નાનાં સ્વાધીનં સ્વબલોન્નતમ્ ।
પતિકામાસ્મ્યહં સત્યં તવ યોગ્યા નરાધિપ ॥ ૬૦॥

સ્વેચ્છયા નગરે તેઽત્ર સમાયાતા મહામતે ।
મમાસ્તિ કારણં કિઞ્ચિદ્વિવાહે રાક્ષસોત્તમ ॥ ૬૧॥

બાલભાવાદ્વ્રતં કિઞ્ચિત્કૃતં રાજન્મયા પુરા ।
ક્રીડન્ત્યા ચ વયસ્યાભિઃ સહૈકાન્તે યદૃચ્છયા ॥ ૬૨॥

સ્વદેહબલદર્પેણ સખીનાં પુરતો રહઃ ।
મત્સમાનબલઃ શૂરો રણે માં જેષ્યતિ સ્ફુટમ્ ॥ ૬૩॥

તં વરિષ્યામ્યહં કામં જ્ઞાત્વા તસ્ય બલાબલમ્ ।
જહસુર્વચનં શ્રુત્વા સખ્યો વિસ્મિતમાનસાઃ ॥ ૬૪॥

કિમેતયા કૃતં ક્રૂરં વ્રતમદ્ભુતમાશુ વૈ ।
તસ્માત્ત્વમપિ રાજેન્દ્ર જ્ઞાત્વા મે હીદૃશં બલં । ૬૫॥

જિત્વા માં સ્વબલેનાત્ર વાઞ્છિતં કુરુ ચાત્મનઃ ।
ત્વં વા તવાનુજો ભ્રાતા સમેત્ય સમરાઙ્ગણે ।
જિત્વા માં સમરેણાત્ર વિવાહં કુરુ સુન્દર ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવ્યા સુગ્રીવદૂતાય
સ્વવ્રતકથનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૫.૨૩॥

## ૫.૨૪ ચતુર્વિંશોઽધ્યાયઃ । દેવીમાહાત્મ્યે દેવીપાર્શ્વે ધૂમ્રલોચનદૂતપ્રેષણમ્ ।

વ્યાસ ઉવાચ ।
દેવ્યાસ્તદ્વચનં શ્રુત્વા સ દૂતઃ પ્રાહ વિસ્મિતઃ ।
કિં બ્રૂષે રુચિરાપાઙ્ગિ સ્ત્રીસ્વભાવાદ્ધિ સાહસાત્ ॥ ૧॥

ઇન્દ્રાદ્યા નિર્જિતા યેન દેવા દૈત્યાસ્તથાપરે ।
તં કથં સમરે દેવિ જેતુમિચ્છસિ ભામિનિ ॥ ૨॥

ત્રૈલોક્યે તાદૃશો નાસ્તિ યઃ શુમ્ભં સમરે જયેત્ ।
કા ત્વં કમલપત્રાક્ષિ તસ્યાગ્રે યુધિ સામ્પ્રતમ્ ॥ ૩॥

અવિચાર્ય ન વક્તવ્યં વચનં ચાપિ સુન્દરિ ।
બલં સ્વપરયોર્જ્ઞાત્વા વક્તવ્યં સમયોચિતમ્ ॥ ૪॥

ત્રૈલોક્યાધિપતિઃ શુમ્ભસ્તવ રૂપેણ મોહિતઃ ।
ત્વાઞ્ચ પ્રાર્થયતે રાજા કુરુ તસ્યેપ્સિતં પ્રિયે ॥ ૫॥

ત્યક્ત્વા મૂર્ખસ્વભાવં ત્વં સમ્માન્ય વચનં મમ ।
ભજ શુમ્ભં નિશુમ્ભં વા હિતમેતદ્ બ્રવીમિ તે ॥ ૬॥

શ‌ૃઙ્ગારઃ સર્વથા સર્વૈઃ પ્રાણિભિઃ પરયા મુદા ।
સેવનીયો બુદ્ધિમદ્ભિર્નવાનામુત્તમો યતઃ ॥ ૭॥

નાગમિષ્યસિ ચેદ્ બાલે સઙ્ક્રુદ્ધઃ પૃથિવીપતિઃ ।
અન્યાનાજ્ઞાકરાન્પ્રેષ્ય બલાન્નેષ્યતિ સામ્પ્રતમ્ ॥ ૮॥

કેશેષ્વાકૃષ્ય તે નૂનં દાનવા બલદર્પિતાઃ ।
ત્વાં નયિષ્યન્તિ વામોરુ તરસા શુમ્ભસન્નિધૌ ॥ ૯॥

સ્વલજ્જાં રક્ષ તન્વઙ્ગિ સાહસં સર્વથા ત્યજ ।
માનિતા ગચ્છ તત્પાર્શ્વે માનપાત્રં યતોઽસિ વૈ ॥ ૧૦॥

ક્વ યુદ્ધં નિશિતૈર્બાણૈઃ ક્વ સુખં રતિસઙ્ગજમ્ ।
સારાસારં પરિચ્છિદ્ય કુરુ મે વચનં પટુ ॥ ૧૧॥

ભજ શુમ્ભં નિશુમ્ભં વા લબ્ધાસિ પરમં સુખમ્ ।
દેવ્યુવાચ ।
સત્યં દૂત મહાભાગ પ્રવક્તું નિપુણો હ્યસિ ॥ ૧૨॥

નિશુમ્ભશુમ્ભૌ જાનામિ બલવન્તાવિતિ ધ્રુવમ્ ।
પ્રતિજ્ઞા મે કૃતા બાલ્યાદન્યથા સા કથં ભવેત્ ॥ ૧૩॥

તસ્માદ્ બ્રૂહિ નિશુમ્ભઞ્ચ શુમ્ભં વા બલવત્તરમ્ ।
વિના યુદ્ધં ન મે ભર્તા ભવિતા કોઽપિ સૌષ્ઠવાત્ ॥ ૧૪॥

જિત્વા માં તરસા કામં કરં ગૃહ્ણાતુ સામ્પ્રતમ્ ।

યુદ્ધેચ્છયા સમાયાતાં વિદ્ધિ મામબલાં નૃપ ॥ ૧૫॥

યુદ્ધં દેહિ સમર્થોઽસિ વીરધર્મં સમાચર ।
બિભેષિ મમ શૂલાચ્ચેત્પાતાલં ગચ્છ મા ચિરમ્ ॥ ૧૬॥

ત્રિદિવં ચ ધરાં ત્યક્ત્વા જીવિતેચ્છા યદસ્તિ તે ।
ઇતિ દૂત વદાશુ ત્વં ગત્વા સ્વપતિમાદરાત્ ॥ ૧૭॥

સ વિચાર્ય યથાયુક્તં કરિષ્યતિ મહાબલઃ ।
સંસારે દૂતધર્મોઽયં યત્સત્યં ભાષણં કિલ ॥ ૧૮॥

શત્રૌ પત્યૌ ચ ધર્મજ્ઞ તથા ત્વં કુરુ મા ચિરમ્ ।
વ્યાસ ઉવાચ ।
અથ તદ્વચનં શ્રુત્વા નીતિમદ્બલસંયુતમ્ ॥ ૧૯॥

હેતુયુક્તં પ્રગલ્ભઞ્ચ વિસ્મિતઃ પ્રયયૌ તદા ।
ગત્વા દૈત્યપતિં દૂતો વિચાર્ય ચ પુનઃ પુનઃ ॥ ૨૦॥

પ્રણમ્ય પાદયોઃ પ્રહ્વઃ પ્રત્યુવાચ નૃપઞ્જ તમ્ ।
રાજનીતિકરં વાક્યં મૃદુપૂર્વં પ્રિયં વચઃ ॥ ૨૧॥

દૂત ઉવાચ ।
સત્યં પ્રિયં ચ વક્તવ્યં તેન ચિન્તાપરો હ્યહમ્ ।
સત્યં પ્રિયં ચ રાજેન્દ્ર વચનં દુર્લભં કિલ ॥ ૨૨॥

અપ્રિયં વદતાં કામં રાજા કુપ્યતિ સર્વથા ।
સાક્ષાત્કુતઃ સમાયાતા કસ્ય વા કિમ્બલાબલા ॥ ૨૩॥

ન જ્ઞાનગોચરં કિઞ્ચિત્કિં બ્રવીમિ વિચેષ્ટિતમ્ ।
યુદ્ધકામા મયા દૃષ્ટા ગર્વિતા કટુભાષિણી ॥ ૨૪॥

તયા યત્કથિતં સમ્યક્ તચ્છૃણુષ્વ મહામતે ।
મયા બાલ્યાત્પ્રતિજ્ઞેયં કૃતા પૂર્વં વિનોદતઃ ॥ ૨૫॥

સખીનાં પુરતઃ કામં વિવાહં પ્રતિ સર્વથા ।
યો માં યુદ્ધે જયેદ્દ્વા દર્પઞ્ચ વિધુનોતિ વૈ ॥ ૨૬॥

તં વરિષ્યામ્યહં કામં પતિં સમબલં કિલ ।
ન મે પ્રતિજ્ઞા મિથ્યા સા કર્તવ્યા નૃપસત્તમ ॥ ૨૭॥

તસ્માદ્યુધ્યસ્વ ધર્મજ્ઞ જિત્વા માં સ્વવશં કુરુ ।

તથેતિ વ્યાહૃતં વાક્યં શ્રુત્વાહં સમુપાગતઃ ॥ ૨૮॥

યથેચ્છસિ મહારાજ તથા કુરુ તવ પ્રિયમ્ ।
સા યુદ્ધાર્થં કૃતમતિઃ સાયુધા સિંહગામિની ॥ ૨૯॥

નિશ્ચલા વર્તતે ભૂપ યથોગ્યં તદ્વિધીયતામ્ ।
વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સુગ્રીવસ્ય નરાધિપઃ ॥ ૩૦॥

પપ્રચ્છ ભ્રાતરંશૂરં સમીપસ્થં મહાબલમ્ ।
શુમ્ભ ઉવાચ ।
ભ્રાતઃ કિમત્ર કર્તવ્યં બ્રૂહિ સત્યં મહામતે ॥ ૩૧॥

નાર્યેકા યોદ્ધુકામાસ્તિ સમાહ્વયતિ સામ્પ્રતમ્ ।
અહં ગચ્છામિ સઙ્ગ્રામે ત્વં વા ગચ્છ બલાન્વિતઃ ॥ ૩૨॥

યદ્રોચતે નિશુમ્ભાત્ર તત્કર્તવ્યં મયા કિલ ।
નિશુમ્ભ ઉવાચ ।
ન મયા ન ત્વયા વીર ગન્તવ્યં રણમૂર્ધનિ ॥ ૩૩॥

પ્રેષયસ્વ મહારાજ ત્વરિતં ધૂમ્રલોચનમ્ ।
સ ગત્વા તાં રણે જિત્વા ગૃહીત્વા ચારુલોચનામ્ ॥ ૩૪॥

આગમિષ્યતિ શુમ્ભાત્ર વિવાહઃ સંવિધીયતામ્ ।
વ્યાસ ઉવાચ ।
તન્નિશમ્ય વચસ્તસ્ય શુમ્ભો ભ્રાતુઃ કનીયસઃ ॥ ૩૫
કોપાત્સમ્પ્રેષયામાસ પાર્શ્વસ્થં ધૂમ્રલોચનમ્ ।
શુમ્ભ ઉવાચ ।
ધૂમ્રલોચન ગચ્છાશુ સૈન્યેન મહતાऽऽવૃતઃ ॥ ૩૬॥

ગૃહીત્વાऽऽનય તાં મુગ્ધાં સ્વવીર્યમદમોહિતામ્ ।
દેવો વા દાનવો વાપિ મનુષ્યો વા મહાબલઃ ॥ ૩૭॥

તત્પાર્ષ્ણિગ્રાહતાં પ્રાપ્તો હન્તવ્યસ્તરસા ત્વયા ।
તત્પાર્શ્વવર્તિનીં કાલીં હત્વા સઙ્ગૃહ્ય તાં પુનઃ ॥ ૩૮॥

શીઘ્રમત્ર સમાગચ્છ કૃત્વા કાર્યમનુત્તમમ્ ।
રક્ષણીયા ત્વયા સાધ્વી મુઞ્ચન્તી મૃદુમાર્ગણાન્ ॥ ૩૯॥

યત્નેન મહતા વીર મૃદુદેહા કૃશોદરી ।
તત્સહાયાશ્ચ હન્તવ્યા યે રણે શસ્ત્રપાણયઃ ॥ ૪૦॥

સર્વથા સા ન હન્તવ્યા રક્ષણીયા પ્રયત્નતઃ ।
વ્યાસ ઉવાચ ।
ઇત્યાદિષ્ટસ્તદા રાજ્ઞા તરસા ધૂમ્રલોચનઃ ॥ ૪૧॥

પ્રણમ્ય શુમ્ભં સૈન્યેન ભૂતઃ શીઘ્રં યયૌ રણે ।
અસાધૂનાં સહસ્રાણાં ષષ્ટ્યા તેષાં વૃતસ્તથા ॥ ૪૨॥

સ દદર્શ તતો દેવીં રમ્યોપવનસંસ્થિતામ્ ।
દૃષ્ટ્વા તાં મૃગશાવાક્ષીં વિનયેન સમન્વિતઃ ॥ ૪૩॥

ઉવાચ વચનં શ્લક્ષ્ણં હેતુમદ્રસભૂષિતમ્ ।
શ઼ૃણુ દેવિ મહાભાગે શુમ્ભસ્ત્વદ્વિરહાતુરઃ ॥ ૪૪॥

દૂતં પ્રેષિતવાન્પાર્શ્વે તવ નીતિવિશારદઃ ।
રસભઙ્ગભયોદ્વિગ્નઃ સામપૂર્વં ત્વયિ સ્વયમ્ ॥ ૪૫॥

તેનાગત્ય વચઃ પ્રોક્તં વિપરીતં વરાનને ।
વચસા તેન મે ભર્તા ચિન્તાવિષ્ટમના નૃપઃ ॥ ૪૬॥

બભૂવ રસમાર્ગજ્ઞે શુમ્ભઃ કામવિમોહિતઃ ।
દૂતેન તેન ન જ્ઞાતં હેતુગર્ભં વચસ્તવ ॥ ૪૭॥

યો માં જયતિ સઙ્ગ્રામે યદુક્તં કઠિનં વચઃ ।
ન જ્ઞાતસ્તેન સઙ્ગ્રામો દ્વિવિધઃ ખલુ માનિનિ ॥ ૪૮॥

રતિજોઽથોત્સાહજશ્ચ પાત્રભેદે વિવક્ષિતઃ ।
રતિજસ્ત્વયિ વામોરુ શત્રોરુત્સાહજઃ સ્મૃતઃ ॥ ૪૯॥

સુખદઃ પ્રથમઃ કાન્તે દુઃખદશ્ચારિજઃ સ્મૃતઃ ।
જાનામ્યહં વરારોહે ભવત્યા માનસં કિલ ॥ ૫૦॥

રતિસઙ્ગ્રામભાવસ્તે હૃદયે પરિવર્તતે ।
ઇતિ તજ્જ્ઞં વિદિત્વા માં ત્વત્સકાશં નરાધિપઃ ॥ ૫૧॥

પ્રેષયામાસ શુમ્ભોઽદ્ય બલેન મહતાઽઽવૃતમ્ ।
ચતુરાસિ મહાભાગે શ઼ૃણુ મે વચનં મૃદુ ॥ ૫૨॥

ભજ શુમ્ભં ત્રિલોકેશં દેવદર્પનિબર્હણમ્ ।

પટ્ટરાજ્ઞી પ્રિયા ભૂત્વા ભુઙ્ક્ષ્વ ભોગાનનુત્તમાન્ ॥ ૫૩॥

જેષ્યતિ ત્વાં મહાબાહુઃ શુમ્ભઃ કામબલાર્થવિત્ ।
વિચિત્રાન્કુરુ હાવાંસ્ત્વં સોઽપિ ભાવાન્કરિષ્યતિ ॥ ૫૪॥

ભવિષ્યતિ કાલિકેયં તત્ર વૈ નર્મસાક્ષિણી ।
એવં સઙ્ગરયોગેન પતિર્મે પરમાર્થવિત્ ॥ ૫૫॥

જિત્વા ત્વાં સુખશય્યાયાં પરિશ્રાન્તાં કરિષ્યતિ ।
રક્તદેહાં નખાઘાતૈર્દન્તૈશ્ચ ખણ્ડિતાધરામ્ ॥ ૫૬॥

સ્વેદક્લિન્નાં પ્રભગ્નાં ત્વાં સંવિધાસ્યતિ ભૂપતિઃ ।
ભવિતા માનસઃ કામો રતિસઙ્ગ્રામજસ્તવ ॥ ૫૭॥

દર્શનાદ્વશ એવાસ્તે શુમ્ભઃ સર્વાત્મના પ્રિયે ।
વચનં કુરુ મે પથ્યં હિતકૃચ્ચાપિ પેશલમ્ ॥ ૫૮॥

ભજ શુમ્ભં ગણાધ્યક્ષં માનનીયાતિમાનિની ।
મન્દભાગ્યાશ્ચ તે નૂનં હ્યસ્ત્રયુદ્ધપ્રિયાશ્ચ યે ॥ ૫૯॥

ન તદર્હાસિ કાન્તે ત્વં સદા સુરતવલ્લભે ।
અશોકં કુરુ રાજાનં પાદાઘાતવિકાસિતમ્ ॥ ૬૦॥

બકુલં સીધુસેકેન તથા કુરબકં કુરુ ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવીમાહાત્મ્યે દેવીપાર્શ્વે
ધૂમ્રલોચનદૂતપ્રેષણં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૫.૨૪॥

## ૫.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । દેવ્યાસહ યુદ્ધાય ચણ્ડમુણ્ડપ્રેષણમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વિરરામાસૌ વચનં ધૂમ્રલોચનઃ ।
પ્રત્યુવાચ તદા કાલી પ્રહસ્ય લલિતં વચઃ ॥ ૧॥

વિદૂષકોઽસિ જાલ્મ ત્વં શૈલૂષ ઇવ ભાષસે ।
વૃથા મનોરથાંશ્ચિત્તે કરોષિ મધુરં વદન્ ॥ ૨॥

બલવાન્બલસંયુક્તઃ પ્રેષિતોઽસિ દુરાત્મના ।
કુરુ યુદ્ધં વૃથા વાદં મુઞ્ચ મૂઢમતેઽધુના ॥ ૩॥

હત્વા શુમ્ભં નિશુમ્ભઞ્ચ ત્વદન્યાન્વા બલાધિકાન્ ।
દેવી ક્રુદ્ધા શરાઘાતૈર્વ્રજિષ્યતિ નિજાલયમ્ ॥ ૪॥

ક્વાસૌ મન્દમતિઃ શુમ્ભઃ ક્વ વા વિશ્વવિમોહિની ।
અયુક્તઃ ખલુ સંસારે વિવાહવિધિરેતયોઃ ॥ ૫॥

સિંહી કિં ત્વતિકામાર્તા જમ્બુકં કુરુતે પતિમ્ ।
કરિણી ગર્દભં વાપિ ગવયં સુરભિઃ કિમુ ॥ ૬॥

ગચ્છ શુમ્ભં નિશુમ્ભં ચ વદ સત્યં વચો મમ ।
કુરુ યુદ્ધં ન ચેદ્યાહિ પાતાલં તરસાધુના ॥ ૭॥

વ્યાસ ઉવાચ ।
કાલિકાયાવચઃ શ્રુત્વા સ દૈત્યો ધૂમ્રલોચનઃ ।
તામુવાચ મહાભાગ ક્રોધસંરક્તલોચનઃ ॥ ૮॥

દુર્દર્શે ત્વાં નિહત્યાજૌ સિંહઞ્ચ મદગર્વિતમ્ ।
ગૃહીત્વૈનાં ગમિષ્યામિ રાજાનં પ્રત્યહં કિલ ॥ ૯॥

રસભઙ્ગભયાત્કાલિ બિભેમિ ત્વિહ સામ્પ્રતમ્ ।
નોચેત્ત્વાં નિશિતૈર્બાણૈર્હન્મ્યદ્ય કલહપ્રિયે ॥ ૧૦॥

કાલિકોવાચ ।
કિં વિકત્થસિ મન્દાત્મન્નાયં ધર્મો ધનુષ્મતામ્ ।
સ્વશક્ત્યા મુઞ્ચ વિશિખાન્ગન્તાસિ યમસંસદિ ॥ ૧૧॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં દૈત્યઃ સઙ્ગૃહ્ય કાર્મુકં દૃઢમ્ ।
કાલિકાં તાં શરાસારૈર્વવર્ષાતિશિલાશિતૈઃ ॥ ૧૨॥

દેવાસ્તુ પ્રેક્ષકાસ્તત્ર વિમાનવરસંસ્થિતાઃ ।
તાં સ્તુવન્તો જયેત્યૂચુર્દેવીં શક્રપુરોગમાઃ ॥ ૧૩॥

તયોઃ પરસ્પરં યુદ્ધં પ્રવૃત્તં ચાતિદારુણમ્ ।
બાણખડ્ગગદાશક્તિમુસલાદિભિરુત્કટમ્ ॥ ૧૪॥

કાલિકા બાણપાતૈસ્તુ હત્વા પૂર્વં ખરાનથ ।
બભઞ્જ તદ્રથં વ્યૂઢં જહાસ ચ મુહુર્મુહુઃ ॥ ૧૫॥

સ ચાન્યં રથમારૂઢઃ કોપેન પ્રજ્વલન્નિવ ।
બાણવૃષ્ટિં ચકારોગ્રાં કાલિકોપરિ ભારત ॥ ૧૬॥

સાપિ ચિચ્છેદ તરસા તસ્ય બાણાનસઙ્ગતાન્ ।
મુમોચાન્યાનુગ્રવેગાન્દાનવોપરિ કાલિકા ॥ ૧૭॥

તૈર્બાણૈર્નિહતાસ્તસ્ય પાર્ષ્ણિગ્રાહા સહસ્રશઃ ।
બભઞ્જ ચ રથં વેગાત્સૂતં હત્વા ખરાનપિ ॥ ૧૮॥

ચિચ્છેદ તદ્ધનુઃ સદ્યો બાણૈરુરગસન્નિભૈઃ ।
મુદં ચક્રે સુરાણાં સા શઙ્ખનાદં તથાકરોત્ ॥ ૧૯॥

વિરથઃ પરિઘં ગૃહ્ય સર્વલોહમયં દૃઢમ્ ।
આજગામ રથોપસ્થં કુપિતો ધૂમ્રલોચનઃ ॥ ૨૦॥

વાચા નિર્ભર્ત્સયન્કાલીં કરાલઃ કાલસન્નિભઃ ।
અદ્યૈવ ત્વાં હનિષ્યામિ કુરૂપે પિઙ્ગલોચને ॥ ૨૧॥

ઇત્યુક્ત્વા સહસાઽઽગત્ય પરિઘં ક્ષિપતે યદા ।
હુઙ્કારેણૈવ તં ભસ્મ ચકાર તરસામ્બિકા ॥ ૨૨॥

દૃષ્ટ્વા ભસ્મીકૃતં દૈત્યં સૈનિકા ભયવિહ્વલાઃ ।
ચક્રુઃ પલાયનં સદ્યો હા તાતેત્યબ્રુવન્પથિ ॥ ૨૩॥

દેવાસ્તં નિહતં દૃષ્ટ્વા દાનવં ધૂમ્રલોચનમ્ ।
મુમુચુઃ પુષ્પવૃષ્ટિં તે મુદિતા ગગને સ્થિતાઃ ॥ ૨૪॥

રણભૂમિસ્તદા રાજન્ દારુણા સમપદ્યત ।
નિહતૈર્દાનવૈરશ્વૈઃ ખરૈશ્ચ વારણૈસ્તથા ॥ ૨૫॥

ગૃધ્રાઃ કાકા વટાઃ શ્યેના વરકા જમ્બુકાસ્તથા ।
નનૃતુશ્ચુક્રુશુઃ પ્રેતાન્પતિતાન્ રણભૂમિષુ ॥ ૨૬॥

અમ્બિકા તદ્રણસ્થાનં ત્યક્ત્વા દૂરં સ્થલાન્તરે ।
ગત્વા ચકાર ચાપ્યુગ્રં શઙ્ખનાદં ભયપ્રદમ્ ॥ ૨૭॥

તં શ્રુત્વા દરશબ્દં તુ શુમ્ભઃ સદ્મનિ સંસ્થિતઃ ।
દૃષ્ટ્વાથ દાનવાન્ભગ્નાનાગતાન્ રુધિરોક્ષિતાન્ ॥ ૨૮॥

છિન્નપાદકરાક્ષાંશ્ચ મઞ્ચકારોપિતાનપિ ।
ભગ્નપૃષ્ઠકટિગ્રીવાન્ક્રન્દમાનાનનેકશઃ ॥ ૨૯॥

વીક્ષ્ય શુમ્ભો નિશુમ્ભશ્ચ ક્વ ગતો ધૂમ્રલોચનઃ ।
કથં ભગ્નાઃ સમાયાતા નાનીતા કિં વરાનના ॥ ૩૦॥

સૈન્યં કુત્ર ગતં મન્દાઃ કથયન્તુ યથોચિતમ્ ।
કસ્યાયં શઙ્ખનાદોઽદ્ય શ્રૂયતે ભયવર્ધનઃ ॥ ૩૧॥

ગણા ઊચુઃ ।
બલઞ્ચ પાતિતં સર્વં નિહતો ધૂમ્રલોચનઃ ।
કૃતં કાલિકયા કર્મ રણભૂમાવમાનુષમ્ ॥ ૩૨॥

શઙ્ખનાદોઽમ્બિકાયાસ્તુ ગગનં વ્યાપ્ય રાજતે ।
હર્ષદઃ સુરસઙ્ઘાનાં દાનવાનાઞ્ચ શોકકૃત્ ॥ ૩૩॥

યદા નિપાતિતાઃ સર્વે તેન કેસરિણા વિભો ।
રથા ભગ્ના હયાશ્ચૈવ બાણપાતૈર્વિનાશિતાઃ ॥ ૩૪॥

ગગનસ્થાઃ સુરાશ્ચક્રુઃ પુષ્પવૃષ્ટિં મુદાન્વિતાઃ ।
દૃષ્ટ્વા ભગ્નં બલં સર્વં પાતિતં ધૂમ્રલોચનમ્ ॥ ૩૫॥

નિશ્ચયસ્તુ કૃતોઽસ્માભિર્જયો નૈવ ભવેદિતિ ।
વિચારં કુરુ રાજેન્દ્ર મન્ત્રિભિર્મન્ત્રવિત્તમૈઃ ॥ ૩૬॥

વિસ્મયોઽયં મહારાજ યદેકા જગદમ્બિકા ।
ભવદ્ભિઃ સહ યુદ્ધાય સંસ્થિતા સૈન્યવર્જિતા ॥ ૩૭॥

નિર્ભયૈકાકિની બાલા સિંહારૂઢા મદોત્કટા ।
ચિત્રમેતન્મહારાજ ભાસતેઽદ્ભુતમઞ્જસા ॥ ૩૮॥

સન્ધિર્વા વિગ્રહો વાદ્ય સ્થાનં નિર્યાણમેવ ચ ।
મન્ત્રયિત્વા મહારાજ કુરુ કાર્યં યથારુચિ ॥ ૩૯॥

તત્સન્નિધૌ બલં નાસ્તિ તથાપિ શત્રુતાપન ।
પાર્ષ્ણિગ્રાહા સુરાઃ સર્વે ભવિષ્યન્તિ કિલાપદિ ॥ ૪૦॥

સમયે તત્સમીપસ્થૌ જ્ઞાતૌ ચ હરિશઙ્કરૌ ।
લોકપાલાઃ સમીપેઽદ્ય વર્તન્તે ગગને સ્થિતાઃ ॥ ૪૧॥

રક્ષોગણાશ્ચ ગન્ધર્વાઃ કિન્નરા માનુષાસ્તથા ।
તત્સહાયાશ્ચ મન્તવ્યાઃ સમયે સુરતાપન ॥ ૪૨॥

અસ્માકં મતિમાનેન જ્ઞાયતે સર્વથેદૃશમ્ ।
અમ્બિકાયાઃ સહાયાશા તત્કાર્યાશા ન કાચન ॥ ૪૩॥

એકા નાશયિતું શક્તા જગત્સર્વં ચરાચરમ્ ।
કા કથા દાનવાનાં તુ સર્વેષામિતિ નિશ્ચયઃ ॥ ૪૪॥

ઇતિ જ્ઞાત્વા મહાભાગ યથારુચિ તથા કુરુ ।
હિતં સત્યં મિતં વાક્યં વક્તવ્યમનુયાયિભિઃ ॥ ૪૫॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તેષાં શુમ્ભઃ પરબલાર્દનઃ ।
કનીયાંસં સમાનીય પપ્રચ્છ રહસિ સ્થિતઃ ॥ ૪૬॥

ભ્રાતઃ કાલિકયાદ્યૈવ નિહતો ધૂમ્રલોચનઃ ।
બલઞ્ચ શાતિતં સર્વં ગણા ભગ્નાઃ સમાગતાઃ ॥ ૪૭॥

અમ્બિકા શઙ્ખનાદં વૈ કરોતિ મદગર્વિતા ।
જ્ઞાનિનાં ચૈવ દુર્જ્ઞેયા ગતિઃ કાલસ્ય સર્વથા ॥ ૪૮॥

તૃણં વજ્રાયતે નૂનં વજ્રં ચૈવ તૃણાયતે ।
બલવાન્બલહીનઃ સ્યાદ્દૈવસ્ય ગતિરીદૃશી ॥ ૪૯॥

પૃચ્છામિ ત્વાં મહાભાગ કિં કર્તવ્યમિતઃ પરમ્ ।
અભોગ્યા ચામ્બિકા નૂનં કારણાદત્ર ચાગતા ॥ ૫૦॥

યુક્તં પલાયનં વીર યુદ્ધં વા વદ સત્વરમ્ ।
લઘું જ્યેષ્ઠં વિજાનામિ ત્વામહં કાર્યસઙ્કટે ॥ ૫૧॥

નિશુમ્ભ ઉવાચ ।
ન વા પલાયનં યુક્તં ન દુર્ગગ્રહણં તથા ।
યુદ્ધમેવ પરં શ્રેયઃ સર્વથૈવાનયાનઘ ॥ ૫૨॥

સસૈન્યોઽહં ગમિષ્યામિ રણે તુ પ્રવરાશ્રિતઃ ।
હત્વા તામાગમિષ્યામિ તરસા ત્વબલામિમામ્ ॥ ૫૩॥

અથવા બલવદ્દૈવાદન્યથા ચેદ્ભવિષ્યતિ ।
મૃતે મયિ ત્વયા કાર્યં વિમૃશ્ય ચ પુનઃ પુનઃ ॥ ૫૪॥

ઇતિ તસ્ય વચઃ શ્રુત્વા શુમ્ભઃ પ્રોવાચ ચાનુજમ્ ।
તિષ્ઠ ત્વં ચણ્ડમુણ્ડૌ દ્વૌ ગચ્છેતાં બલસંયુતૌ ॥ ૫૫॥

શશકગ્રહણાયાત્ર ન યુક્તં ગજમોચનમ્ ।
ચણ્ડમુણ્ડૌ મહાવીરૌ તાં હન્તું સર્વથા ક્ષમૌ ॥ ૫૬॥

ઇત્યુક્ત્વા ભ્રાતરં શુમ્ભઃ સમ્ભાષ્ય ચ મહાબલૌ ।
ઉવાચ વચનં રાજા ચણ્ડમુણ્ડૌ પુરઃસ્થિતૌ ॥ ૫૭॥

ગચ્છતં ચણ્ડમુણ્ડૌ દ્વૌ સ્વસૈન્યપરિવારિતૌ ।
હન્તું તામબલાં શીઘ્રં નિર્લજ્જાં મદગર્વિતામ્ ॥ ૫૮॥

ગૃહીત્વાથ નિહત્યાજૌ કાલિકાં પિઙ્ગલોચનામ્ ।
આગમ્યતાં મહાભાગૌ કૃત્વા કાર્યં મહત્તરમ્ ॥ ૫૯॥

સા નાયાતિ ગૃહીતાપિ ગર્વિતા ચામ્બિકા યદિ ।
તદા બાણૈર્મહાતીક્ષ્ણૈર્હન્તવ્યાહવમણ્ડિતા ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવ્યાસહ યુદ્ધાય
ચણ્ડમુણ્ડપ્રેષણં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૫.૨૫॥

## ૫.૨૬ ષડ્વિંશોઽધ્યાયઃ । ચણ્ડમુણ્ડવધેન દેવ્યાશ્ચામુણ્ડેતિનામવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યાજ્ઞપ્તૌ તદા વીરૌ ચણ્ડમુણ્ડૌ મહાબલૌ ।
જગ્મતુસ્તરસૈવાજૌ સૈન્યેન મહતાન્વિતૌ ॥ ૧॥

દૃષ્ટ્વા તત્ર સ્થિતાં દેવીં દેવાનાં હિતકારિણીમ્ ।
ઊચતુસ્તૌ મહાવીર્યૌ તદા સામાન્વિતં વચઃ ॥ ૨॥

બાલે ત્વં કિં ન જાનાસિ શુમ્ભં સુરબલાર્દનમ્ ।
નિશુમ્ભઞ્ચ મહાવીર્યં તુરાષાડ્વિજયોદ્ધતમ્ ॥ ૩॥

ત્વમેકાસિ વરારોહે કાલિકાસિંહસંયુતા ।
જેતુમિચ્છસિ દુર્બુદ્ધે શુમ્ભં સર્વબલાન્વિતમ્ ॥ ૪॥

મતિદઃ કોઽપિ તે નાસ્તિ નારી વાપિ નરોઽપિ વા ।
દેવાસ્ત્વાં પ્રેરયન્ત્યેવ વિનાશાય તવૈવ તે ॥ ૫॥

વિમૃશ્ય કુરુ તન્વઙ્ગિ કાર્યં સ્વપરયોર્બલમ્ ।
અષ્ટાદશભુજત્વાત્ત્વં ગર્વઞ્ચ કુરુષે મૃષા ॥ ૬॥

કિં ભુજૈર્બહુભિર્વ્યર્થૈરાયુધૈઃ કિં શ્રમપ્રદૈઃ ।
શુમ્ભસ્યાગ્રે સુરાણાં વૈ જેતુઃ સમરશાલિનઃ ॥ ૭॥

ઐરાવતકરચ્છેત્તુર્દન્તિદારણકારિણઃ ।
જયિનઃ સુરસઙ્ઘાનાં કાર્યં કુરુ મનોગતમ્ ॥ ૮॥

વૃથા ગર્વાયસે કાન્તે કુરુ મે વચનં પ્રિયમ્ ।
હિતં તવ વિશાલાક્ષિ સુખદં દુઃખનાશનમ્ ॥ ૯॥

દુઃખદાનિ ચ કાર્યાણિ ત્યાજ્યાનિ દૂરતો બુધૈઃ ।
સુખદાનિ ચ સેવ્યાનિ શાસ્ત્રતત્ત્વવિશારદૈઃ ॥ ૧૦॥

ચતુરાસિ પિકાલાપે પશ્ય શુમ્ભબલં મહત્ ।
પ્રત્યક્ષં સુરસઙ્ઘાનાં મર્દનેન મહોદયમ્ ॥ ૧૧॥

પ્રત્યક્ષઞ્ચ પરિત્યજ્ય વૃથૈવાનુમિતિઃ કિલ ।
સન્દેહસહિતે કાર્યે ન વિપશ્ચિત્પ્રવર્તતે ॥ ૧૨॥

શત્રુઃ સુરાણાં પરમઃ શુમ્ભઃ સમરદુર્જયઃ ।
તસ્માત્ત્વાં પ્રેરયન્ત્યત્ર દેવા દૈત્યેશપીડિતાઃ ॥ ૧૩॥

તસ્માત્તદ્વચનૈઃ સ્નિગ્ધૈર્વઞ્ચિતાસિ શુચિસ્મિતે ।
દુઃખાય તવ દેવાનાં શિક્ષા સ્વાર્થસ્ય સાધિકા ॥ ૧૪॥

કાર્યમિત્રં પરિક્ષિપ્ય ધર્મમિત્રં સમાશ્રયેત્ ।
દેવાઃ સ્વાર્થપરાઃ કામં ત્વામહં સત્યમબ્રુવમ્ ॥ ૧૫॥

ભજ શુમ્ભં સુરેશાનં જેતારં ભુવનેશ્વરમ્ ।
ચતુરં સુન્દરં શૂરં કામશાસ્ત્રવિશારદમ્ ॥ ૧૬
ઐશ્વર્યં સર્વલોકાનાં પ્રાપ્સ્યસે શુમ્ભશાસનાત્ ।
નિશ્ચયં પરમં કૃત્વા ભર્તારં ભજ શોભનમ્ ॥ ૧૭॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ચણ્ડસ્ય જગદમ્બિકા ।
મેઘગમ્ભીરનિનદં જગર્જ પુનરબ્રવીત્ ॥ ૧૮॥

ગચ્છ જાલ્મ મૃષા કિં ત્વં ભાષસે વઞ્ચકં વચઃ ।
ત્યક્ત્વા હરિહરાદીંશ્ચ શુમ્ભં કસ્માદ્ભજે પતિમ્ ॥ ૧૯॥

ન મે કશ્ચિત્પતિઃ કાર્યો ન કાર્યં પતિના સહ ।

સ્વામિની સર્વભૂતાનામહમેવ નિશામય ॥ ૨૦॥

શુમ્ભા મે બહવો દૃષ્ટા નિશુમ્ભાશ્ચ સહસ્રશઃ ।
ઘાતિતાશ્ચ મયા પૂર્વં શતશો દૈત્યદાનવાઃ ॥ ૨૧॥

મમાગ્રે દેવવૃન્દાનિ વિનષ્ટાનિ યુગે યુગે ।
નાશં યાસ્યન્તિ દૈત્યાનાં યૂથાનિ પુનરદ્ય વૈ ॥ ૨૨॥

કાલ એવાગતોઽસ્ત્યત્ર દૈત્યસંહારકારકઃ ।
વૃથા ત્વં કુરુષે યત્નં રક્ષણાયાત્મસન્તતેઃ ॥ ૨૩॥

કુરુ યુદ્ધં વીરધર્મરક્ષાર્થે ત્વં મહામતે ।
મરણં ભાવિ દુસ્ત્યાજ્યં યશો રક્ષ્યં મહાત્મભિઃ ॥ ૨૪॥

કિં તે કાર્યં નિશુમ્ભેન શુમ્ભેન ચ દુરાત્મના ।
વીરધર્મં પરં પ્રાપ્ય ગચ્છ સ્વર્ગં સુરાલયમ્ ॥ ૨૫॥

શુમ્ભો નિશુમ્ભશ્ચૈવાન્યે યે ચાત્ર તવ બાન્ધવાઃ ।
સર્વે તવાનુગાઃ પશ્ચાદાગમિષ્યન્તિ સામ્પ્રતમ્ ॥ ૨૬॥

ક્રમશઃ સર્વદૈત્યાનાં કરિષ્યામ્યદ્ય સઙ્ક્ષયમ્ ।
વિષાદં ત્યજ મન્દાત્મન્ કુરુ યુદ્ધં વિશામ્પતે ॥ ૨૭॥

ત્વામહં નિહનિષ્યામિ ભ્રાતરં તવ સામ્પ્રતમ્ ।
તતઃ શુમ્ભં નિશુમ્ભં ચ રક્તબીજં મદોત્કટમ્ ॥ ૨૮॥

અન્યાંશ્ચ દાનવાન્સર્વાન્હત્વાહં સમરાઙ્ગણે ।
ગમિષ્યામિ યથાસ્થાનં તિષ્ઠ વા ગચ્છ વા દ્રુતમ્ ॥ ૨૯॥

ગૃહાણાસ્ત્રં વૃથાપુષ્ટ કુરુ યુદ્ધં મયાધુના ।
કિં જલ્પસિ મૃષા વાક્યં સર્વથા કાતરપ્રિયમ્ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
તયેત્થં પ્રેરિતૌ દૈત્યૌ ચણ્ડમુણ્ડૌ ક્રુધાન્વિતૌ ।
જ્યાશબ્દં તરસા ઘોરં ચક્રતુર્બલદર્પિતૌ ॥ ૩૧॥

સાપિ શઙ્ખસ્વનં ચક્રે પૂરયન્તી દિશો દશ ।
સિંહોઽપિ કુપિતસ્તાવન્નાદં સમકરોદ્બલી ॥ ૩૨॥

તેન નાદેન શક્રાદ્યા જહર્ષુરમરાસ્તદા ।
મુનયો યક્ષગન્ધર્વાઃ સિદ્ધાઃ સાધ્યાશ્ચ કિન્નરાઃ ॥ ૩૩॥

યુદ્ધં પરસ્પરં તત્ર જાતં કાતરભીતિદમ્ ।
ચણ્ડિકાચણ્ડયોસ્તીવ્રં બાણખડ્ગગદાદિભિઃ ॥ ૩૪॥

ચણ્ડમુક્તાઞ્છરાન્દેવી ચિચ્છેદ નિશિતૈઃ શરૈઃ ।
મુમોચ પુનરુગ્રાન્સા બાણાંશ્ચ પન્નગાનિવ ॥ ૩૫॥

ગગનં છાદિતં તત્ર સઙ્ગ્રામે વિશિખૈસ્તદા ।
શલભૈરિવ મેઘાન્તે કર્ષકાણાં ભયપ્રદૈઃ ॥ ૩૬॥

મુણ્ડોઽપિ સૈનિકૈઃ સાર્ધં પપાત તરસા રણે ।
મુમોચ બાણવૃષ્ટિં વૈ ક્રુદ્ધઃ પરમદારુણઃ ॥ ૩૭॥

બાણજાલં મહદ્ દૃષ્ટ્વા કુદ્ધા તત્રામ્બિકા ભૃશમ્ ।
કોપેન વદનં તસ્યા બભૂવ ઘનસન્નિભમ્ ॥ ૩૮॥

કદલીપુષ્પનેત્રઞ્ચ ભૃકુટીકુટિલં તદા ।
નિષ્ક્રાન્તા ચ તદા કાલી લલાટફલકાદ્દ્રુતમ્ ॥ ૩૯॥

વ્યાઘ્રચર્મામ્બરા ક્રૂરા ગજચર્મોત્તરીયકા ।
મુણ્ડમાલાધરા ઘોરા શુષ્કવાપીસમોદરા ॥ ૪૦॥

ખડ્ગપાશધરાતીવ ભીષણા ભયદાયિની ।
ખટ્વાઙ્ગધારિણી રૌદ્રા કાલરાત્રિરિવાપરા ॥ ૪૧॥

વિસ્તીર્ણવદના જિહ્વાં ચાલયન્તી મુહુર્મુહુઃ ।
વિસ્તારજઘના વેગાજ્જઘાનાસુરસૈનિકાન્ ॥ ૪૨॥

કરે કૃત્વા મહાવીરાંસ્તરસા સા રુષાન્વિતા ।
મુખે ચિક્ષેપ દૈતેયાન્પિપેષ દશનૈઃ શનૈઃ ॥ ૪૩॥

ગજાન્ઘણ્ટાન્વિતાન્હસ્તે ગૃહીત્વા નિદધૌ મુખે ।
સારોહાન્ભક્ષયિત્વાજૌ સાટ્ટહાસં ચકાર હ ॥ ૪૪॥

તથૈવ તુરગાનુષ્ટ્રાંસ્તથા સારથિભિઃ સહ ।
નિક્ષિપ્ય વક્ત્રે દશનૈશ્ચર્વયત્યતિભૈરવમ્ ॥ ૪૫॥

હન્યમાનં બલં પ્રેક્ષ્ય ચણ્ડમુણ્ડૌ મહાસુરૌ ।
છાદયામાસતુર્દેવીં બાણાસારૈરનન્તરૈઃ ॥ ૪૬॥

ચણ્ડશ્ચાણ્ડકરચ્છાયં ચક્રં ચક્રધરાયુધમ્ ।

ચિક્ષેપ તરસા દેવીં નનાદ ચ મુહુર્મુહુઃ ॥ ૪૭॥

નદન્તં વીક્ષ્ય તં કાલી રથાઙ્ગઞ્ચ રવિપ્રભમ્ ।
બાણેનૈકેન ચિચ્છેદ સુપ્રભં તત્સુદર્શનમ્ ॥ ૪૮॥

તં જઘાન શરૈસ્તીક્ષ્ણૈશ્ચણ્ડં ચણ્ડી શિલાશિતૈઃ ।
મૂર્ચ્છિતોઽસૌ પપાતોર્વ્યાં દેવીબાણાર્દિતો ભૃશમ્ ॥ ૪૯॥

પતિતં ભ્રાતરં વીક્ષ્ય મુણ્ડો દુઃખાર્દિતસ્તદા ।
ચકાર શરવૃષ્ટિઞ્ચ કાલિકોપરિ કોપતઃ ॥ ૫૦॥

ચણ્ડિકા મુણ્ડનિર્મુક્તાં શરવૃષ્ટિં સુદારુણામ્ ।
ઇષિકાસ્ત્રૈર્બલાન્મુક્તૈશ્ચકાર તિલશઃ ક્ષણાત્ ॥ ૫૧॥

અર્ધચન્દ્રેણ બાણેન તાડયામાસ તં પુનઃ ।
પતિતોઽસૌ મહાવીર્યો મેદિન્યાં મદવર્જિતઃ ॥ ૫૨॥

હાહાકારો મહાનાસીદ્દાનવાનાં બલે તદા ।
જહર્ષુરમરાઃ સર્વે ગગનસ્થા ગતવ્યથાઃ ॥ ૫૩॥

વિહાય મૂર્ચ્છાં ચણ્ડસ્તુ સઙ્ગૃહ્ય મહતીં ગદામ્ ।
તરસા તાડયામાસ કાલિકાં દક્ષિણે ભુજે ॥ ૫૪॥

વઞ્ચયિત્વા ગદાઘાતં તં બબન્ધ મહાસુરમ્ ।
તરસા બાણપાશેન મન્ત્રમુક્તેન કાલિકા ॥ ૫૫॥

ઉત્થિતસ્તુ તદા મુણ્ડો બદ્ધં દૃષ્ટ્વાનુજં બલાત્ ।
આજગામ સુસન્નદ્ધઃ શક્તિં કૃત્વા કરે દૃઢામ્ ॥ ૫૬॥

આગચ્છન્તં તદા કાલી દાનવં વીક્ષ્ય સત્વરમ્ ।
બબન્ધ તરસા તં તુ દ્વિતીયં ભ્રાતરં ભૃશમ્ ॥ ૫૭॥

ગૃહીત્વા તૌ મહાવીર્યૌ ચણ્ડમુણ્ડૌ શશાવિવ ।
કુર્વતી વિપુલં હાસમાજગામામ્બિકાં પ્રતિ ॥ ૫૮॥

આગત્ય તામથોવાચ ગૃહાણેમૌ પશૂ પ્રિયે ।
રણયજ્ઞાર્થમાનીતૌ દાનવૌ રણદુર્જયૌ ॥ ૫૯॥

તાવાનીતૌ તદા વીક્ષ્ય ચણ્ડિકા તૌ વૃકાવિવ ।
અમ્બિકા કાલિકાં પ્રાહ માધુરીસંયુતં વચઃ ॥ ૬૦॥

વધં મા કુરુ મા મુઞ્ચ ચતુરાસિ રણપ્રિયે ।
દેવાનાં કાર્યસંસિદ્ધિઃ કર્તવ્યા તરસા ત્વયા ॥ ૬૧॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા કાલિકા પ્રાહ તાં પુનઃ ।
યુદ્ધયજ્ઞેઽતિવિખ્યાતે ખડ્ગયૂપે પ્રતિષ્ઠિતે ॥ ૬૨॥

આલમ્ભઞ્ચ કરિષ્યામિ યથા હિંસા ન જાયતે ।
ઇત્યુક્ત્વા સા તદા દેવી ખડ્ગેન શિરસી તયોઃ ॥ ૬૩॥

ચકર્ત તરસા કાલી પપૌ ચ રુધિરં મુદા ।
એવં દૈત્યૌ હતૌ દૃષ્ટ્વા મુદિતોવાચ ચામ્બિકા ॥ ૬૪॥

કૃતં કાર્યં સુરાણાં તે દદામ્યદ્ય વરં શુભમ્ ।
ચણ્ડમુણ્ડૌ હતૌ યસ્માત્તસ્માત્તે નામ કાલિકે ।
ચામુણ્ડેતિ સુવિખ્યાતં ભવિષ્યતિ ધરાતલે ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે ચણ્ડમુણ્ડવધેન
દેવ્યાશ્ચામુણ્ડેતિનામવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૫.૨૬॥

## ૫.૨૭ સપ્તવિંશોઽધ્યાયઃ । રક્તબીજદ્વારા દેવીસમીપે શુમ્ભનિશુમ્ભસંવાદવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
હતૌ તૌ દાનવૌ દૃષ્ટ્વા હતશેષાશ્ચ સૈનિકાઃ ।
પલાયનં તતઃ કૃત્વા જગ્મુઃ સર્વે નૃપં પ્રતિ ॥ ૧॥

ભિન્નાઙ્ગા વિશિખૈઃ કેચિત્કેચિચ્છિન્નકરાસ્તથા ।
રુધિરસ્રાવદેહાશ્ચ રુદન્તોઽભિયયુઃ પુરે ॥ ૨॥

ગત્વા દૈત્યપતિં સર્વે ચક્રુર્બુમ્બારવં મુહુઃ ।
રક્ષ રક્ષ મહારાજ ભક્ષયત્યદ્ય કાલિકા ॥ ૩॥

તયા હતૌ મહાવીરૌ ચણ્ડમુણ્ડૌ સુરાર્દનૌ ।
ભક્ષિતાઃ સૈનિકાઃ સર્વે વયં ભગ્ના ભયાતુરાઃ ॥ ૪॥

ભીતિદઞ્ચ રણસ્થાનં કૃતં કાલિકયા પ્રભો ।
પાતિતૈર્ગજવીરાશ્વૈર્દાસેરકપદાતિભિઃ ॥ ૫॥

શોણિતૌઘવહા કુલ્યા કૃતા માંસાતિકર્દમા ।
કેશશૈવલિની ભગ્નરથચક્રવિરાજિતા ॥ ૬॥

છિન્નબાહ્વાદિમત્સ્યાઢ્યા શીર્ષતુમ્બીફલાન્વિતા ।
ભયદા કાતરાણાં વૈ સુરાણાં મોદવર્ધિની ॥ ૭॥

કુલં રક્ષ મહારાજ પાતાલં ગચ્છ સત્વરમ્ ।
ક્રુદ્ધા દેવી ક્ષયં સદ્યઃ કરિષ્યતિ ન સંશયઃ ॥ ૮॥

સિંહોઽપિ ભક્ષયત્યાજૌ દાનવાન્દનુજેશ્વર ।
તથૈવ કાલિકા દેવી હન્તિ બાણૈરનેકધા ॥ ૯॥

તસ્માત્ત્વમપિ રાજેન્દ્ર મરણાય મૃષા મતિમ્ ।
કરોષિ સહિતો ભ્રાત્રા શુમ્ભેન કુપિતાશયઃ ॥ ૧૦॥

કિં કરિષ્યતિ નાર્યેષા ક્રૂરા કુલવિનાશિની ।
યસ્યા હેતોર્મહારાજ હન્તુમિચ્છસિ બાન્ધવાન્ ॥ ૧૧॥

દૈવાધીનૌ મહારાજ લોકે જયપરાજયૌ ।
અલ્પાર્થાય મહદ્દુઃખં બુદ્ધિમાન્ન પ્રકલ્પયેત્ ॥ ૧૨॥

ચિત્રં પશ્ય વિધેઃ કર્મ યદધીનં જગત્ પ્રભો ।
નિહતા રાક્ષસાઃ સર્વે સ્ત્રિયા પશ્યૈકયાનયા ॥ ૧૩॥

જેતા ત્વં લોકપાલાનાં સૈન્યયુક્તો હિ સામ્પ્રતમ્ ।
એકા પ્રાર્થયતે બાલા યુદ્ધાયેતિ સુસમ્ભ્રમઃ ॥ ૧૪॥

પુરા ત્વયા તપસ્તપ્તં પુષ્કરે દેવતાયને ।
વરદાનાય સમ્પ્રાપ્તો બ્રહ્મા લોકપિતામહઃ ॥ ૧૫॥

ધાત્રોક્તસ્ત્વં મહારાજ વરં વરય સુવ્રત ।
તદા ત્વયામરત્વં ચ પ્રાર્થિતં બ્રહ્મણઃ કિલ ॥ ૧૬॥

દેવદૈત્યમનુષ્યેભ્યો ન ભવેન્મરણં મમ ।
સર્પકિન્નરયક્ષેભ્યઃ પુંલ્લિઙ્ગવાચકાદપિ ॥ ૧૭॥

તસ્માત્ત્વાં હન્તુકામૈષા પ્રાપ્તા યોષિદ્વરા પ્રભો ।
યુદ્ધં મા કુરુ રાજેન્દ્ર વિચાર્યૈવં ધિયાધુના ॥ ૧૮॥

દેવી હ્યેષા મહામાયા પ્રકૃતિઃ પરમા મતા ।
કલ્પાન્તકાલે રાજેન્દ્ર સર્વસંહારકારિણી ॥ ૧૯॥

ઉત્પાદયિત્રી લોકાનાં દેવાનામીશ્વરી શુભા ।
ત્રિગુણા તામસી દેવી સર્વશક્તિસમન્વિતા ॥ ૨૦॥

અજય્યા ચાક્ષયા નિત્યા સર્વજ્ઞા ચ સદોદિતા ।
વેદમાતા ચ ગાયત્રી સન્ધ્યા સર્વસુરાલયા ॥ ૨૧॥

નિર્ગુણા સગુણા સિદ્ધા સર્વસિદ્ધિપ્રદાવ્યયા ।
આનન્દાનન્દદા ગૌરી દેવાનામભયપ્રદા ॥ ૨૨॥

એવં જ્ઞાત્વા મહારાજ વૈરભાવં ત્યજાનયા ।
શરણં વ્રજ રાજેન્દ્ર દેવી ત્વાં પાલયિષ્યતિ ॥ ૨૩॥

આજ્ઞાકરો ભવૈતસ્યાઃ સઞ્જીવય નિજં કુલમ્ ।
હતશેષાશ્ચ યે દૈત્યાસ્તે ભવન્તુ ચિરાયુષઃ ॥ ૨૪॥

વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા શુમ્ભઃ સુરબલાર્દનઃ ।
ઉવાચ વચનં તથ્યં વીરવર્યગુણાન્વિતમ્ ॥ ૨૫॥

શુમ્ભ ઉવાચ ।
મૌનં કુર્વન્તુ ભો મન્દા યૂયં ભગ્ના રણાજિરાત્ ।
શીઘ્રં ગચ્છત પાતાલં જીવિતાશા બલીયસી ॥ ૨૬॥

દૈવાધીનં જગત્સર્વં કા ચિન્તાત્ર જયે મમ ।
દેવાસ્તથૈવ બ્રહ્માદ્યા દૈવાધીના વયં યથા ॥ ૨૭॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રોઽયં યમોઽગ્નિર્વરુણસ્તથા ।
સૂર્યશ્ચન્દ્રસ્તથા શક્રઃ સર્વે દૈવવશાઃ કિલ ॥ ૨૮॥

કા ચિન્તા તર્હિ મે મન્દા યદ્ભાવિ તદ્ભવિષ્યતિ ।
ઉદ્યમસ્તાદૃશો ભૂયાદ્યાદૃશી ભવિતવ્યતા ॥ ૨૯॥

સર્વથૈવ વિચાર્યૈવ ન શોચન્તિ બુધાઃ ક્વચિત્ ।
સ્વધર્મં ન ત્યજન્તીહ જ્ઞાનિનો મરણાદ્ભયાત્ ॥ ૩૦॥

સુખં દુઃખં તથૈવાયુર્જીવિતં મરણં નૃણામ્ ।
કાલે ભવતિ સમ્પ્રાપ્તે સર્વથા દૈવનિર્મિતમ્ ॥ ૩૧॥

બ્રહ્મા પતતિ કાલે સ્વે વિષ્ણુશ્ચ પાર્વતીપતિઃ ।

નાશં ગચ્છન્ત્યાયુષોઽન્તે સર્વે દેવાઃ સવાસવાઃ ॥ ૩૨॥

તથાહમપિ કાલસ્ય વશગઃ સર્વથાધુના ।
નાશં જયં વા ગન્તાસ્મિ સ્વધર્મપરિપાલનાત્ ॥ ૩૩॥

આહૂતોઽપ્યનયા કામં યુદ્ધાયાબલયા કિલ ।
કથં પલાયનપરો જીવેયં શરદાં શતમ્ ॥ ૩૪॥

કરિષ્યામ્યદ્ય સઙ્ગ્રામં યદ્ભાવિ તદ્ભવત્વિહ ।
જયો વા મરણં વાપિ સ્વીકરોમિ યથા તથા ॥ ૩૫॥

દૈવં મિથ્યેતિ વિદ્વાંસો વદન્ત્યુદ્યમવાદિનઃ ।
યુક્તિયુક્તં વચસ્તેષાં યે જાનન્ત્યભિભાષિતમ્ ॥ ૩૬॥

ઉદ્યમેન વિના કામં ન સિધ્યન્તિ મનોરથાઃ ।
કાતરા એવ જલ્પન્તિ યદ્ભાવ્યં તદ્ભવિષ્યતિ ॥ ૩૭॥

અદૃષ્ટં બલવન્મૂઢાઃ પ્રવદન્તિ ન પણ્ડિતાઃ ।
પ્રમાણં તસ્ય સત્ત્વે કિમદૃશ્યં દૃશ્યતે કથમ્ ॥ ૩૮॥

અદૃષ્ટં ક્વાપિ દૃષ્ટં સ્યાદેષા મૂર્ખવિભીષિકા ।
અવલમ્બં વિનૈવૈષા દુઃખે ચિત્તસ્ય ધારણા ॥ ૩૯॥

ચક્રીસમીપે સંવિષ્ટા સંસ્થિતા પિષ્ટકારિણી ।
ઉદ્યમેન વિના પિષ્ટં ન ભવત્યેવ સર્વથા ॥ ૪૦॥

ઉદ્યમે ચ કૃતે કાર્યં સિદ્ધિં યાત્યેવ સર્વથા ।
કદાચિત્તસ્ય ન્યૂનત્વે કાર્યં નૈવ ભવેદપિ ॥ ૪૧॥

દેશં કાલઞ્ચ વિજ્ઞાય સ્વબલં શત્રુજં બલમ્ ।
કૃતં કાર્યં ભવત્યેવ બૃહસ્પતિવચો યથા ॥ ૪૨॥

વ્યાસ ઉવાચ ।
ઇતિ નિશ્ચિત્ય દૈત્યેન્દ્રો રક્તબીજં મહાસુરમ્ ।
પ્રેષયામાસ સઙ્ગ્રામે સૈન્યેન મહતાઽઽવૃતમ્ ॥ ૪૩॥

શુમ્ભ ઉવાચ ।
રક્તબીજ મહાબાહો ગચ્છ ત્વં સમરાઙ્ગણે ।
કુરુ યુદ્ધં મહાભાગ યથા તે બલમાહિતમ્ ॥ ૪૪॥

રક્તબીજ ઉવાચ ।

મહારાજ ન તે કાર્યા ચિન્તા સ્વલ્પતરાપિ વા ।
અહમેનાં હનિષ્યામિ કરિષ્યામિ વશે તવ ॥ ૪૫॥

પશ્ય મે યુદ્ધચાતુર્યં ક્વેયં બાલા સુરપ્રિયા ।
દાસીં તેઽહં કરિષ્યામિ જિત્વેમાં સમરે બલાત્ ॥ ૪૬॥

વ્યાસ ઉવાચ ।
ઇત્યાભાષ્ય કુરુશ્રેષ્ઠ રક્તબીજો મહાસુરઃ ।
જગામ રથમારુહ્ય સ્વસૈન્યપરિવારિતઃ ॥ ૪૭॥

હસ્ત્યશ્વરથપાદાતવૃન્દૈશ્ચ પરિવેષ્ટિતઃ ।
નિર્જગામ રથારૂઢો દેવીં શૈલોપરિસ્થિતામ્ ॥ ૪૮॥

તમાગતં સમાલોક્ય દેવી શઙ્ખમવાદયત્ ।
ભયદં સર્વદૈત્યાનાં દેવાનાં મોદવર્ધનમ્ ॥ ૪૯॥

શ્રુત્વા શઙ્ખસ્વનં ચોગ્રં રક્તબીજોઽતિવેગવાન્ ।
ગત્વા સમીપે ચામુણ્ડાં બભાષે વચનં મૃદુ ॥ ૫૦॥

રક્તબીજ ઉવાચ ।
બાલે કિં માં ભીષયસિ મત્વા ત્વં કાતરં કિલ ।
શઙ્ખનાદેન તન્વઙ્ગિ વેત્સિ કિં ધૂમ્રલોચનમ્ ॥ ૫૧॥

રક્તબીજોઽસ્મિ નામ્નાહં ત્વત્સકાશમિહાગતઃ ।
યુદ્ધેચ્છા ચેત્પિકાલાપે સજ્જા ભવ ભયં ન મે ॥ ૫૨॥

પશ્યાદ્ય મે બલં કાન્તે દૃષ્ટા યે કાતરાસ્ત્વયા ।
નાહં પઙ્ક્તિગતસ્તેષાં કુરુ યુદ્ધં યથેચ્છસિ ॥ ૫૩॥

વૃદ્ધાશ્ચ સેવિતાઃ પૂર્વં નીતિશાસ્ત્રં શ્રુતં ત્વયા ।
પતિતં ચાર્થવિજ્ઞાનં વિદ્વદ્ગોષ્ઠી કૃતાથ વા ॥ ૫૪॥

સાહિત્યતન્ત્રવિજ્ઞાનં ચેદસ્તિ તવ સુન્દરિ ।
શૃણુ મે વચનં પથ્યં તથ્યં પ્રમિતિબૃંહિતમ્ ॥ ૫૫॥

રસાનાઞ્ચ નવાનાં વૈ દ્વાવેવ મુખ્યતાં ગતૌ ।
શૃઙ્ગારકઃ શાન્તિરસો વિદ્વજ્જનસભાસુ ચ ॥ ૫૬॥

તયોઃ શૃઙ્ગાર એવાદૌ નૃપભાવે પ્રતિષ્ઠિતઃ ।
વિષ્ણુર્લક્ષ્મ્યા સહાસ્તે વૈ સાવિત્ર્યા ચતુરાનનઃ ॥ ૫૭॥

શચ્યેન્દ્રઃ શૈલસુતયા શઙ્કરઃ સહ શેરતે ।
વલ્લ્યા વૃક્ષો મૃગો મૃગ્યા કપોત્યા ચ કપોતકઃ ॥ ૫૮॥

એવં સર્વે પ્રાણભૃતઃ સંયોગરસિકા ભૃશમ્ ।
અપ્રાપ્તભોગવિભવા યે ચાન્યે કાતરા નરાઃ ॥ ૫૯॥

ભવન્તિ યતયસ્તે વૈ મૂઢા દૈવેન વઞ્ચિતાઃ ।
અસંસારરસજ્ઞાસ્તે વઞ્ચિતા વઞ્ચનાપરૈઃ ॥ ૬૦॥

મધુરાલાપનિપુણૈ રતાઃ શાન્તિરસે હિ તે ।
ક્વ જ્ઞાનં ક્વ ચ વૈરાગ્યં વર્તમાને મનોભવે ॥ ૬૧॥

લોભે ક્રોધે ચ દુર્ધર્ષે મોહે મતિવિનાશકે ।
તસ્માત્ત્વમપિ કલ્યાણિ કુરુ કાન્તં મનોહરમ્ ॥ ૬૨॥

શુમ્ભં સુરાણાં જેતારં નિશુમ્ભં વા મહાબલમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા રક્તબીજોઽસૌ વિરરામ પુરઃસ્થિતઃ ।
શ્રુત્વા જહાસ ચામુણ્ડા કાલિકા ચામ્બિકા તથા ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પઞ્ચમસ્કન્ધે
રક્તબીજદ્વારા દેવીસમીપે શુમ્ભનિશુમ્ભસંવાદવર્ણનં નામ સસ્તવિંશોઽધ્યાયઃ ॥ ૫.૨૭॥

## ૫.૨૮ અષ્ટાવિંશોઽધ્યાયઃ । રક્તબીજદ્વારા દેવીસમીપે શુમ્ભનિશુમ્ભસંવાદવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
કૃત્વા હાસ્યં તતો દેવી તમુવાચ વિશામ્પતે ।
મેઘગમ્ભીરયા વાચા યુક્તિયુક્તમિદં વચઃ ॥ ૧॥

પૂર્વમેવ મયા પ્રોક્તં મન્દાત્મન્ કિં વિકત્થસે ।
દૂતસ્યાગ્રે યથાયોગ્યં વચનં હિતસંયુતમ્ ॥ ૨॥

સદૃશો મમ રૂપેણ બલેન વિભવેન ચ ।
ત્રિલોક્યાં યદિ કોઽપિ સ્યાત્તં પતિં પ્રવૃણોમ્યહમ્ ॥ ૩॥

બ્રૂહિ શુમ્ભં નિશુમ્ભઞ્ચ પ્રતિજ્ઞા મે પુરા કૃતા ।
તસ્માદ્યુધ્યસ્વ જિત્વા માં વિવાહં વિધિવત્કુરુ ॥ ૪॥

ત્વં વૈ તદાજ્ઞયા પ્રાપ્તસ્તસ્ય કાર્યાર્થસિદ્ધયે ।

સઙ્ગ્રામં કુરુ પાતાલં ગચ્છ વા પતિના સહ ॥ ૫॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં દેવ્યાઃ સ દૈત્યોઽમર્ષપૂરિતઃ ।
મુમોચ તરસા બાણાન્સિંહસ્યોપરિ દારુણાન્ ॥ ૬॥

અમ્બિકા તાચ્છરાન્વીક્ષ્ય ગગને પન્નગોપમાન્ ।
ચિચ્છેદ સાયકૈસ્તીક્ષ્ણૈર્લઘુહસ્તતયા ક્ષણાત્ ॥ ૭॥

અન્યૈર્જઘાન વિશિખૈ રક્તબીજં મહાસુરમ્ ।
અમ્બિકાચાપનિર્મુક્તૈઃ કર્ણાકૃષ્ટૈઃ શિલાશિતૈઃ ॥ ૮॥

દેવીબાણહતઃ પાપો મૂર્ચ્છામાપ રથોપરિ ।
પતિતે રક્તબીજે તુ હાહાકારો મહાનભૂત્ ॥ ૯॥

સૈનિકાશ્ચુક્રુશુઃ સર્વે હતાઃ સ્મ ઇતિ ચાબ્રુવન્ ।
તતો બુમ્બારવં શ્રુત્વા શુમ્ભઃ પરમદારુણમ્ ॥ ૧૦॥

ઉદ્યોગં સર્વસૈન્યાનાં દૈત્યાનામાદિદેશ હ ।
શુમ્ભ ઉવાચ ।
નિર્યાન્તુ દાનવાઃ સર્વે કામ્બોજાઃ સ્વબલૈર્વૃતાઃ ॥ ૧૧॥

અન્યેઽપ્યતિબલાઃ શૂરાઃ કાલકેયા વિશેષતઃ ।
વ્યાસ ઉવાચ ।
ઇત્યાજ્ઞપ્તં બલં સર્વં શુમ્ભેન ચ ચતુર્વિધમ્ ॥ ૧૨॥

નિર્જગામ મદાઽઽવિષ્ટં દેવીસમરમણ્ડલે ।
તમાગતં સમાલોક્ય ચણ્ડિકા દાનવં બલમ્ ॥ ૧૩॥

ઘણ્ટાનાદં ચકારાશુ ભીષણં ભયદં મુહુઃ ।
જ્યાસ્વનં શઙ્ખનાદઞ્ચ ચકાર જગદમ્બિકા ॥ ૧૪॥

તેન નાદેન સા જાતા કાલી વિસ્તારિતાનના ।
શ્રુત્વા તન્નિનદં ઘોરં સિંહો દેવ્યાશ્ચ વાહનમ્ ॥ ૧૫॥

જગર્જ સોઽપિ બલવાઞ્જનયન્ભયમદ્ભુતમ્ ।
તન્નિનાદમુપશ્રુત્ય દાનવાઃ ક્રોધમૂર્ચ્છિતાઃ ॥ ૧૬॥

સર્વે ચિક્ષિપુરસ્ત્રાણિ દેવીં પ્રતિ મહાબલાઃ ।
તસ્મિન્નેવાયતે યુદ્ધે દારુણે લોમહર્ષણે ॥ ૧૭॥

બ્રહ્માદીનાઞ્ચ દેવાનાં શક્તયશ્ચણ્ડિકાં યયુઃ ।
યસ્ય દેવસ્ય યદ્રૂપં યથા ભૂષણવાહનમ્ ॥ ૧૮॥

તાદૃગ્રૂપાસ્તદા દેવ્યઃ પ્રયયુઃ સમરાઙ્ગણે ।
બ્રહ્માણી વરટારૂઢા સાક્ષસૂત્રકમણ્ડલુઃ ॥ ૧૯॥

આગતા બ્રહ્મણઃ શક્તિર્બ્રહ્માણીતિ પ્રતિશ્રુતા ।
વૈષ્ણવી ગરુડારૂઢા શઙ્ખચક્રગદાધરા ॥ ૨૦॥

પદ્મહસ્તા સમાયાતા પીતામ્બરવિભૂષિતા ।
શાઙ્કરી તુ વૃષારૂઢા ત્રિશૂલવરધારિણી ॥ ૨૧॥

અર્ધચન્દ્રધરા દેવી તથાહિવલયા શિવા ।
કૌમારી શિખિસંરૂઢા શક્તિહસ્તા વરાનના ॥ ૨૨॥

યુદ્ધકામા સમાયાતા કાર્તિકેયસ્વરૂપિણી ।
ઇન્દ્રાણી સુષ્ઠુવદના સુશ્વેતગજવાહના ॥ ૨૩॥

વજ્રહસ્તાતિરોષાઢ્યા સઙ્ગ્રામાભિમુખી યયૌ ।
વારાહી શૂકરાકારા પ્રૌઢપ્રેતાસના મતા ॥ ૨૪॥

નારસિંહી નૃસિંહસ્ય બિભ્રતી સદૃશં વપુઃ ।
યામ્યા ચ મહિષારૂઢા દણ્ડહસ્તા ભયપ્રદા ॥ ૨૫॥

સમાયાતાથ સઙ્ગ્રામે યમરૂપા શુચિસ્મિતા ।
તથૈવ વારુણી શક્તિઃ કૌબેરી ચ મદોત્કટા ॥ ૨૬॥

એવંવિધાસ્તથાઽઽકારા યયુઃ સ્વસ્વબલૈર્વૃતાઃ ।
આગતાસ્તાઃ સમાલોક્ય દેવી મુદમવાપ ચ ॥ ૨૭॥

સ્વસ્થા મુમુદિરે દેવા દૈત્યાશ્ચ ભયમાયયુઃ ।
તાભિઃ પરિવૃતસ્તત્ર શઙ્કરો લોકશઙ્કરઃ ॥ ૨૮॥

સમાગમ્ય ચ સઙ્ગ્રામે ચણ્ડિકામિત્યુવાચ હ ।
હન્યન્તામસુરાઃ શીઘ્રં દેવાનાં કાર્યસિદ્ધયે ॥ ૨૯॥

નિશુમ્ભં ચૈવ શુમ્ભં ચ યે ચાન્યે દાનવાઃ સ્થિતાઃ ।
હત્વા દૈત્યબલં સર્વં કૃત્વા ચ નિર્ભયં જગત્ ॥ ૩૦॥

સ્વાનિ સ્વાનિ ચ ધિષ્ણ્યાનિ સમાગચ્છન્તુ શક્તયઃ ।
દેવા યજ્ઞભુજઃ સન્તુ બ્રાહ્મણા યજને રતાઃ ॥ ૩૧॥

પ્રાણિનઃ સન્તુ સન્તુષ્ટાઃ સર્વે સ્થાવરજઙ્ગમાઃ ।
શમં યાન્તુ તથોત્પાતા ઈતયશ્ચ તથા પુનઃ ॥ ૩૨॥

ઘનાઃ કાલે પ્રવર્ષન્તુ કૃષિર્બહુફલા તથા ।
વ્યાસ ઉવાચ ।
એવં બ્રુવતિ દેવેશે શઙ્કરે લોકશઙ્કરે ॥ ૩૩॥

ચણ્ડિકાયા શરીરાત્તુ નિર્ગતા શક્તિરદ્ભુતા ।
ભીષણાતિપ્રચણ્ડા ચ શિવાશતનિનાદિની ॥ ૩૪॥

ઘોરરૂપાથ પઞ્ચાસ્યમિત્યુવાચ સ્મિતાનના ।
દેવદેવ વ્રજાશુ ત્વં દૈત્યાનામધિપં પ્રતિ ॥ ૩૫॥

દૂતત્વં કુરુ કામારે બ્રૂહિ શુમ્ભં સ્મરાકુલમ્ ।
નિશુમ્ભઞ્ચ મદોત્સિક્તં વચનાન્મમ શઙ્કર ॥ ૩૬॥

મુક્ત્વા ત્રિવિષ્ટપં યાત યૂયં પાતાલમાશુ વૈ ।
દેવાઃ સ્વર્ગે સુખં યાન્તુ તુરાષાટ્ સ્વાસનં શભમ્ ॥ ૩૭॥

પ્રાપ્નોતુ ત્રિદિવં સ્થાનં યજ્ઞભાગાંશ્ચ દેવતાઃ ।
જીવિતેચ્છા ચ યુષ્માકં યદિ સ્યાત્તુ મહત્તરા ॥ ૩૮॥

તર્હિ ગચ્છત પાતાલં તરસા યત્ર દાનવાઃ ।
અથવા બલમાસ્થાય યુદ્ધેચ્છા મરણાય ચેત્ ॥ ૩૯॥

તદાऽऽગચ્છન્તુ તૃપ્યન્તુ મચ્છિવાઃ પિશિતેન વઃ ।
વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્યાઃ શૂલપાણિસ્ત્વરાન્વિતઃ ॥ ૪૦॥

ગત્વાऽऽહ દૈત્યરાજાનં શુમ્ભં સદસિ સંસ્થિતમ્ ।
શિવ ઉવાચ ।
રાજન્ દૂતોऽહમમ્બાયાસ્ત્રિપુરાન્તકરો હરઃ ॥ ૪૧॥

ત્વત્સકાશમિહાયાતો હિતં કર્તું તવાખિલમ્ ।
ત્યક્ત્વા સ્વર્ગં તથા ભૂમિં યૂયં ગચ્છત સત્વરમ્ ॥ ૪૨॥

પાતાલં યત્ર પ્રહ્લાદો બલિશ્ચ બલિનાં વરઃ ।
અથવા મરણેચ્છા ચેત્તર્હ્યાગચ્છત સત્વરમ્ ॥ ૪૩॥

સઙ્ગ્રામે વો હનિષ્યામિ સર્વાનેવાહમાશુ વૈ ।
ઇત્યુવાચ મહારાજ્ઞી યુષ્મત્કલ્યાણહેતવે ॥ ૪૪॥

વ્યાસ ઉવાચ ।
ઇતિ દૈત્યવરાન્દેવીવાક્યં પીયૂષસન્નિભમ્ ।
હિતકૃચ્છ્રાવયિત્વા સ પ્રત્યાયાતશ્ચ શૂલભૃત્ ॥ ૪૫॥

યયાસૌ પ્રેરિતઃ શમ્ભુર્દૂતત્વે દાનવાન્પ્રતિ ।
શિવદૂતીતિ વિખ્યાતા જાતા ત્રિભુવનેઽખિલે ॥ ૪૬॥

તેઽપિ શ્રુત્વા વચો દેવ્યાઃ શઙ્કરોક્તં તુદુષ્કરમ્ ।
યુદ્ધાય નિર્યયુઃ શીઘ્રં દંશિતાઃ શસ્ત્રપાણયઃ ॥ ૪૭॥

તરસા રણમાગત્ય ચણ્ડિકાં પ્રતિ દાનવાઃ ।
નિર્જઘ્નુશ્ચ શરૈસ્તીક્ષ્ણૈઃ કર્ણાકૃષ્ટૈઃ શિલાશિતૈઃ ॥ ૪૮॥

કાલિકા શૂલપાતૈસ્તાન્ ગદાશક્તિવિદારિતાન્ ।
કુર્વન્તી વ્યચરત્તત્ર ભક્ષયન્તી ચ દાનવાન્ ॥ ૪૯॥

કમણ્ડલુજલાક્ષેપગતપ્રાણાન્ મહાબલાન્ ।
બ્રહ્માણી ચાકરોત્તત્ર દાનવાન્સમરાઙ્ગણે ॥ ૫૦॥

માહેશ્વરી વૃષારૂઢા ત્રિશૂલેનાતિરંહસા ।
જઘાન દાનવાન્સઙ્ખ્યે પાતયામાસ ભૂતલે ॥ ૫૧॥

વૈષ્ણવી ચક્રપાતેન ગદાપાતેન દાનવાન્ ।
ગતપ્રાણાંશ્ચકારાશુ ચોત્તમાઙ્ગવિવર્જિતાન્ ॥ ૫૨॥

ઐન્દ્રી વજ્રપ્રહારેણ પાતયામાસ ભૂતલે ।
ઐરાવતકરાઘાતપીડિતાન્દૈત્યપુઙ્ગવાન્ ॥ ૫૩॥

વારાહી તુણ્ડઘાતેન દંષ્ટ્રાગ્રપાતનેન ચ ।
જઘાન ક્રોધસંયુક્તા શતશો દૈત્યદાનવાન્ ॥ ૫૪॥

નારસિંહી નખૈસ્તીવ્રૈર્દારિતાન્દૈત્યપુઙ્ગવાન્ ।
ભક્ષયન્તી ચચારાજૌ નનાદ ચ મુહુર્મુહુઃ ॥ ૫૫॥

શિવદૂતી અટ્ટહાસૈઃ પાતયામાસ ભૂતલે ।
તાંશ્ચખાદાથ ચામુણ્ડા કાલિકા ચ ત્વરાન્વિતા ॥ ૫૬॥

શિખિસંસ્થા ચ કૌમારી કર્ણાકૃષ્ટૈઃ શિલાશિતૈઃ ।

નિજઘાન રણે શત્રૂન્દેવાનાં ચ હિતાય વૈ ॥ ૫૭॥

વારુણી પાશસમ્બદ્ધાન્દૈત્યાન્સમરમસ્તકે ।
પાતયામાસ તત્પૃષ્ઠે મૂર્ચ્છિતાન્ગતચેતનાન્ ॥ ૫૮॥

એવં માતૃગણેનાજાવતિવીર્યપરાક્રમમ્ ।
મર્દિતં દાનવં સૈન્યં પલાયનપરં હ્યભૂત્ ॥ ૫૯॥

બુમ્બારવસ્તુ સુમહાનભૂત્તત્ર બલાર્ણવે ।
પુષ્પવૃષ્ટિં તદા દેવાશ્ચક્રુર્દેવ્યા ગણોપરિ ॥ ૬૦॥

તચ્છ્રુત્વા નિનદં ઘોરં જયશબ્દં ચ દાનવાઃ ।
રક્તબીજશ્ચુકોપાશુ દૃષ્ટ્વા દૈત્યાન્પલાયિતાન્ ॥ ૬૧॥

ગર્જમાનાંસ્તથા દેવાન્વીક્ષ્ય દૈત્યો મહાબલઃ ।
રક્તબીજસ્તુ તેજસ્વી રણમભ્યાયયૌ તદા ॥ ૬૨॥

સાયુધો રથસંવિષ્ટઃ કુર્વઞ્જ્યાશબ્દમદ્ભુતમ્ ।
આજગામ તદા દેવીં ક્રોધરક્તેક્ષણોદ્ધતઃ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે રક્તબીજેન
દેવ્યા યુદ્ધવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૫.૨૮॥

## ૫.૨૯ એકોનત્રિંશોઽધ્યાયઃ । દેવ્યાસહ યુદ્ધકરણાય નિશુમ્ભપ્રયાણમ્ ।

વ્યાસ ઉવાચ ।
વરદાનમિદં તસ્ય દાનવસ્ય શિવાર્પિતમ્ ।
અત્યદ્ભુતતરં રાજઞ્છ્રુણુ તત્પ્રબ્રવીમ્યહમ્ ॥ ૧॥

તસ્ય દેહાદ્રક્તબિન્દુર્યદા પતતિ ભૂતલે ।
સમુત્પતન્તિ દૈતેયાસ્તદ્રૂપાસ્તત્પરાક્રમાઃ ॥ ૨॥

અસઙ્ખ્યાતા મહાવીર્યા દાનવા રક્તસમ્ભવાઃ ।
પ્રભવન્ત્વિતિ રુદ્રેણ દત્તોઽસ્ત્યત્યદ્ભુતો વરઃ ॥ ૩॥

સ તેન વરદાનેન દર્પિતઃ ક્રોધસંયુતઃ ।
અભ્યગાત્તરસા સઙ્ખ્યે હન્તું દેવીં સકાલિકામ્ ॥ ૪॥

સ દૃષ્ટ્વા વૈષ્ણવીં શક્તિં ગરુડોપરિસંસ્થિતામ્ ।

શક્ત્યા જઘાન દૈત્યેન્દ્રસ્તાં વૈ કમલલોચનામ્ ॥ ૫॥

ગદયા વારયામાસ શક્તિઃ સા શક્તિસંયુતા ।
અતાડયચ્ચ ચક્રેણ રક્તબીજં મહાસુરમ્ ॥ ૬॥

રથાઙ્ગહતદેહાત્તુ બહુ સુસ્રાવ શોણિતમ્ ।
વજ્રાહતગિરેઃ શ‍ૃઙ્ગાન્નિર્ઝરા ઇવ ગૈરિકા ॥ ૭॥

યત્ર યત્ર યદા ભૂમૌ પતન્તિ રક્તબિન્દવઃ ।
સમુત્તસ્થુસ્તદાકારાઃ પુરુષાશ્ચ સહસ્રશઃ ॥ ૮॥

ઐન્દ્રી તમસુરં ઘોરં વજ્રેણાભિજઘાન ચ ।
રક્તબીજં ક્રુધાऽऽવિષ્ટા નિઃસસાર ચ શોણિતમ્ ॥ ૯॥

તતસ્તત્ક્ષતજાજ્જાતા રક્તબીજા હ્યનેકશઃ ।
તદ્વીર્યાશ્ચ તદાકારા સાયુધા યુદ્ધદુર્મદાઃ ॥ ૧૦॥

બ્રહ્માણી બ્રહ્મદણ્ડેન કુપિતા હ્યહનદ્ ભૃશમ્ ।
માહેશ્વરી ત્રિશૂલેન દારયામાસ દાનવમ્ ॥ ૧૧॥

નારસિંહી નખાઘાતૈસ્તં વિવ્યાધ મહાસુરમ્ ।
અહનત્તુણ્ડઘાતેન ક્રુદ્ધા તં રાક્ષસાધમમ્ ॥ ૧૨॥

કૌમારી ચ તથા શક્ત્યા વક્ષસ્યેનમતાડયત્ ।
સોऽપિ ક્રુદ્ધઃ શરાસારૈર્બિભેદ નિશિતૈશ્ચ તાઃ ॥ ૧૩॥

ગદાશક્તિપ્રહારૈસ્તુ માતૃઃ સર્વાઃ પૃથક્પૃથક્ ।
શક્તયસ્તં શરાઘાતૈર્વિવ્યધુસ્તત્પ્રકોપિતાઃ ॥ ૧૪॥

તસ્ય શસ્ત્રાણિ ચિચ્છેદ ચણ્ડિકા સ્વશરૈઃ શિતૈઃ ।
જઘાનાન્યૈશ્ચ વિશિખૈસ્તં દેવી કુપિતા ભૃશમ્ ॥ ૧૫॥

તસ્ય દેહાચ્ચ સુસ્રાવ રુધિરં બહુધા તુ યત્ ।
તસ્માત્તત્સદૃશાઃ શૂરાઃ પ્રાદુરાસન્સહસ્રશઃ ॥ ૧૬॥

રક્તબીજૈર્જગદ્વ્યાપ્તં રુધિરૌઘસમુદ્ભવૈઃ ।
સન્નદ્ધૈઃ સાયુધૈઃ કામં કુર્વદ્ભિર્યુદ્ધમદ્ભુતમ્ ॥ ૧૭॥

પ્રહરન્તશ્ચ તાન્દૃષ્ટ્વા રક્તબીજાનનેકશઃ ।
ભયભીતાઃ સુરાસ્ત્રેસુર્વિષણ્ણાઃ શોકકર્ષિતાઃ ॥ ૧૮॥

કથમદ્ય ક્ષયં દૈત્યા ગમિષ્યન્તિ સહસ્રશઃ ।
મહાકાયા મહાવીર્યા દાનવા રક્તસમ્ભવાઃ ॥ ૧૯॥

એકૈવ ચણ્ડિકાત્રાસ્તિ તથા કાલી ચ માતરઃ ।
એતાભિર્દાનવાઃ સર્વે જેતવ્યાઃ કષ્ટમેવ તત્ ॥ ૨૦॥

નિશુમ્ભો વાથ શુમ્ભો વા સહસા બલસંવૃતઃ ।
આગમિષ્યતિ સઙ્ગ્રામે તતોઽનર્થો મહાન્ભવેત્ ॥ ૨૧॥

વ્યાસ ઉવાચ ।
એવં દેવા ભયોદ્વિગ્નાશ્ચિન્તામાપુર્મહત્તરામ્ ।
યદા તદામ્બિકા પ્રાહ કાલીં કમલલોચનામ્ ॥ ૨૨॥

ચામુણ્ડે કુરુ વિસ્તીર્ણં વદનં ત્વરિતા ભૃશમ્ ।
મચ્છસ્ત્રપાતસમ્ભૂતં રુધિરં પિબ સત્વરા ॥ ૨૩॥

ભક્ષયન્તી ચર રણે દાનવાનદ્ય કામતઃ ।
હનિષ્યામિ શરૈસ્તીક્ષ્ણૈર્ગદાસિમુસલૈસ્તથા ॥ ૨૪॥

તથા કુરુ વિશાલાક્ષિ પાનં તદ્રુધિરસ્ય ચ ।
બિન્દુમાત્રં યથા ભૂમ્યાં ન પતેદપિ સામ્પ્રતમ્ ॥ ૨૫॥

ભક્ષ્યમાણાસ્તદા દૈત્યા ન ચોત્પત્સ્યન્તિ ચાપરે ।
એવમેષાં ક્ષયો નૂનં ભવિષ્યતિ ન ચાન્યથા ॥ ૨૬॥

ઘાતયિષ્યામ્યહં દૈત્યં ત્વં ભક્ષય ચ સત્વરા ।
પિબન્તી ક્ષતજં સર્વં યતમાનારિસઙ્ક્ષયે ॥ ૨૭॥

ઇત્થં દૈત્યક્ષયં કૃત્વા દત્ત્વા રાજ્યં સુરાલયમ્ ।
ઇન્દ્રાય સુસ્થિરં સર્વં ગમિષ્યામો યથાસુખમ્ ॥ ૨૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તામ્બિકયા દેવી ચામુણ્ડા ચણ્ડવિક્રમા ।
પપૌ ચ ક્ષતજં સર્વં રક્તબીજશરીરજમ્ ॥ ૨૯॥

અમ્બિકા તં જઘાનાશુ ખડ્ગેન મુસલેન ચ ।
ચખાદ દેહશકલાંશ્ચામુણ્ડા તાન્કૃશોદરી ॥ ૩૦॥

સોઽપિ ક્રુદ્ધો ગદાઘાતૈશ્ચામુણ્ડાં સમઘાતયત્ ।
તથાપિ સા પપાવાશુ ક્ષતજં તમભક્ષયત્ ॥ ૩૧॥

યેઽન્યે રુધિરજાઃ ક્રૂરા રક્તબીજા મહાબલાઃ ।
તેઽપિ નિષ્પાતિતાઃ સર્વે ભક્ષિતા ગતશોણિતાઃ ॥ ૩૨॥

કૃત્રિમા ભક્ષિતાઃ સર્વે યસ્તુ સ્વાભાવિકોઽસુરઃ ।
સોઽપિ પ્રપાતિતો હત્વા ખડ્ગેનાતિવિખણ્ડિતઃ ॥ ૩૩॥

રક્તબીજે હતે રૌદ્રે યે ચાન્યે દાનવા રણે ।
પલાયનં તતઃ કૃત્વા ગતાસ્તે ભયકમ્પિતાઃ ॥ ૩૪॥

હાહેતિ વિબ્રુવન્તસ્તે શુમ્ભં પ્રોચુઃ સવિહ્વલાઃ ।
રુથિરારક્તદેહાશ્ચ વિગતાસ્ત્રા વિચેતસઃ ॥ ૩૫॥

રાજન્નમ્બિકયા રક્તબીજોઽસૌ વિનિપાતિતઃ ।
ચામુણ્ડા તસ્ય દેહાત્તુ પપૌ સર્વં ચ શોણિતમ્ ॥ ૩૬॥

યે ચાન્યે દાનવાઃ શૂરા વાહનેનાતિરંહસા ।
સિંહેન નિહતાઃ સર્વે કાલ્યા ચ ભક્ષિતાઃ પરે ॥ ૩૭॥

વયં ત્વાં કથિતું રાજન્નાગતા યુદ્ધચેષ્ટિતમ્ ।
ચરિતઞ્ચ તથા દેવ્યાઃ સઙ્ગ્રામે પરમાદ્ભુતમ્ ॥ ૩૮॥

અજેયેયં મહારાજ સર્વથા દૈત્યદાનવૈઃ ।
ગન્ધર્વાસુરયક્ષૈશ્ચ પન્નગોરગરાક્ષસૈઃ ॥ ૩૯॥

અન્યાસ્તત્રાગતા દેવ્ય ઇન્દ્રાણીપ્રમુખા ભૃશમ્ ।
યુધ્યમાના મહારાજ વાહનૈરાયુધૈર્યુતાઃ ॥ ૪૦॥

તાભિઃ સર્વં હતં સૈન્યં દાનવાનાં વરાયુધૈઃ ।
રક્તબીજોઽપિ રાજેન્દ્ર તરસા વિનિપાતિતઃ ॥ ૪૧॥

એકાપિ દુઃસહા દેવી કિં પુનસ્તાભિરન્વિતા ।
સિંહોઽપિ હન્તિ સઙ્ગ્રામે રાક્ષસાનમિતપ્રભઃ ॥ ૪૨॥

અતો વિચાર્ય સચિવૈર્યદ્યુક્તં તદ્વિધીયતામ્ ।
ન વૈરમનયા યુક્તં સન્ધિરેવ સુખપ્રદઃ ॥ ૪૩॥

આશ્ચર્યમેતદખિલં યન્નારી હન્તિ રાક્ષસાન્ ।
રક્તબીજોઽપિ નિહતઃ પીતં તસ્યાપિ શોણિતમ્ ॥ ૪૪॥

અન્યે નિપાતિતા દૈત્યાઃ સઙ્ગ્રામેઽમ્બિકયા નૃપ ।
ચામુણ્ડયા ચ માંસં વૈ ભક્ષિતં સકલં રણે ॥ ૪૫॥

વરં પાતાલગમનં તસ્યાઃ સેવાથવા વરા ।
ન તુ યુદ્ધં મહારાજ કાર્યમમ્બિકયા સહ ॥ ૪૬॥

ન નારી પ્રાકૃતા હ્યેષા દેવકાર્યાર્થસાધિની ।
માયેયં પ્રબલા દેવી ક્ષપયન્તીયમુત્થિતા ॥ ૪૭॥

વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચસ્તથ્યં શ્રુત્વા કાલવિમોહિતઃ ।
મુમૂર્ષુઃ પ્રત્યુવાચેદં શુમ્ભઃ પ્રસ્ફુરિતાધરઃ ॥ ૪૮॥

શુમ્ભ ઉવાચ ।
યૂયં ગચ્છત પાતાલં શરણં વા ભયાતુરાઃ ।
હનિષ્યામ્યહમદ્યૈવ તાઞ્ચ તાશ્ચ સમુદ્યતઃ ॥ ૪૯॥

જિત્વા સર્વાન્સુરાનાજૌ કૃત્વા રાજ્યં સુપુષ્કલમ્ ।
કથં નારીભયોદ્વિગ્નઃ પાતાલં પ્રવિશામ્યહમ્ ॥ ૫૦॥

નિહત્ય પાર્ષદાન્સર્વાન્ રક્તબીજમુખાન્ રણે ।
પ્રાણત્રાણાય ગચ્છામિ હિત્વા કિં વિપુલં યશઃ ॥ ૫૧॥

મરણં ત્વનિવાર્યં વૈ પ્રાણિનાં કાલકલ્પિતમ્ ।
તદ્ભયં જન્મનોપાત્તં ત્યજેત્કો દુર્લભં યશઃ ॥ ૫૨॥

નિશુમ્ભાહં ગમિષ્યામિ રથારૂઢો રણાજિરે ।
હત્વા તામાગમિષ્યામિ નાગમિષ્યામિ ચાન્યથા ॥ ૫૩॥

ત્વં તુ સેનાયુતો વીર પાર્ષ્ણિગ્રાહો ભવસ્વ મે ।
તરસા તાં શરૈસ્તીક્ષ્ણૈર્નારીં નય યમાલયે ॥ ૫૪॥

નિશુમ્ભ ઉવાચ ।
અહમદ્ય હનિષ્યામિ ગત્વા દુષ્ટાઞ્ચ કાલિકામ્ ।
આગમિષ્યામ્યહં શીઘ્રં ગૃહીત્વા તામથામ્બિકામ્ ॥ ૫૫॥

મા ચિન્તાં કુરુ રાજેન્દ્ર વરાકાયાસ્તુ કારણે ।
ક્વૈષા બાલા ક્વ મે બાહુવીર્યં વિશ્વવશઙ્કરમ્ ॥ ૫૬॥

ત્યક્ત્વાઽઽર્તિં વિપુલાં ભ્રાતર્ભુઙ્ક્ષ્વ ભોગાનનુત્તમાન્ ।
આનયિષ્યામ્યહં કામં માનિનીં માનસંયુતામ્ ॥ ૫૭॥

મયિ તિષ્ઠતિ તે રાજન્ન યુક્તં ગમનં રણે ।
ગત્વાહમાનયિષ્યામિ તવાર્થે વૈ જયશ્રિયમ્ ॥ ૫૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા ભ્રાતરં જ્યેષ્ઠં કનીયાન્બલગર્વિતઃ ।
રથમાસ્થાય વિપુલં સન્નદ્ધઃ સ્વબલાવૃતઃ ॥ ૫૯॥

જગામ તરસા તૂર્ણં સઙ્ગરે કૃતમઙ્ગલઃ ।
સંસ્તુતો બન્દિસૂતૈશ્ચ સાયુધઃ સપરિષ્કરઃ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે દેવ્યાસહ યુદ્ધકરણાય
નિશુમ્ભપ્રયાણં નામકોનત્રિંશોઽધ્યાયઃ ॥ ૫.૨૯॥

## ૫.૩૦ ત્રિંશોઽધ્યાયઃ । યુદ્ધાત્પ્રત્યાગતાનાં રક્ષસાં શુમ્ભાય વાર્તાવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
નિશુમ્ભો નિશ્ચયં કૃત્વા મરણાય જયાય વા ।
સોદ્યમઃ સબલઃ શૂરો રણે દેવીમુપાયયૌ ॥ ૧॥

તમાજગામ શુમ્ભોઽપિ સ્વબલેન સમાવૃતઃ ।
પ્રેક્ષકોઽભૂદ્રણે રાજા સઙ્ગ્રામરસપણ્ડિતઃ ॥ ૨॥

ગગને સંસ્થિતા દેવાસ્તદાભ્રપટલાવૃતાઃ ।
દિદૃક્ષવસ્તુ સઙ્ગ્રામે સેન્દ્રા યક્ષગણાસ્તથા ॥ ૩॥

નિશુમ્ભોઽથ રણે ગત્વા ધનુરાદાય શાર્ઙ્ગકમ્ ।
ચકાર શરવૃષ્ટિં સ ભીષયઞ્જગદમ્બિકામ્ ॥ ૪॥

મુઞ્ચન્તં શરજાલાનિ નિશુમ્ભં ચણ્ડિકા રણે ।
વીક્ષ્યાદાય ધનુઃ શ્રેષ્ઠં જહાસ સુસ્વરં મુહુઃ ॥ ૫॥

ઉવાચ કાલિકાં દેવી પશ્ય મૂર્ખત્વમેતયોઃ ।
મરણાયાગતૌ કાલિ મત્સમીપમિહાધુના ॥ ૬॥

દૃષ્ટ્વા દૈત્યવધં ઘોરં રક્તબીજાત્યયં તથા ।
જયાશાં કુરુતસ્ત્વેતૌ મોહિતૌ મમ માયયા ॥ ૭॥

આશા બલવતી હ્યેષા ન જહાતિ નરં ક્વચિત્ ।

ભગ્નં હૃતબલં નષ્ટં ગતપક્ષં વિચેતનમ્ ॥ ૮॥

આશાપાશનિબદ્ધૌ દ્વૌ યુદ્ધાય સમુપાગતૌ ।
નિહન્તવ્યૌ મયા કાલિ રણે શુમ્ભનિશુમ્ભકૌ ॥ ૯॥

આસન્નમરણાવેતૌ સમ્પ્રાપ્તૌ દૈવમોહિતૌ ।
પશ્યતાં સર્વદેવાનાં હનિષ્યામ્યહમદ્ય તૌ ॥ ૧૦॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા કાલિકાં ચણ્ડી કર્ણાકૃષ્ટશરોત્કરૈઃ ।
છાદયામાસ તરસા નિશુમ્ભં પુરતઃ સ્થિતમ્ ॥ ૧૧॥

દાનવોઽપિ શરાંસ્તસ્યાશ્ચિચ્છેદ નિશિતૈઃ શરૈઃ ।
તયોઃ પરસ્પરં યુદ્ધં બભૂવાતિભયાનકમ્ ॥ ૧૨॥

કેસરી કેશજાલાનિ ધુન્વાનઃ સૈન્યસાગરમ્ ।
ગાહયામાસ બલવાન્સરસીં વારણો યથા ॥ ૧૩॥

નખૈર્દન્તપ્રહારૈસ્તુ દાનવાન્પુરતઃ સ્થિતાન્ ।
ચખાદ ચ વિશીર્ણાઙ્ગાન્ ગજાનિવ મદોત્કટાન્ ॥ ૧૪॥

એવં વિમથ્યમાને તુ સૈન્યે કેસરિણા તદા ।
અભ્યધાવન્નિશુમ્ભોઽથ વિકૃષ્ટવરકાર્મુકઃ ॥ ૧૫॥

અન્યેઽપિ ક્રુદ્ધા દૈત્યેન્દ્રા દેવીં હન્તુમુપાયયુઃ ।
સન્દષ્ટદન્તરસના રક્તનેત્રા હ્યનેકશઃ ॥ ૧૬॥

તત્રાજગામ તરસા શુમ્ભઃ સૈન્યસમાવૃતઃ ।
નિહત્ય કાલિકાં કોપાદ્ગ્રહીતું જગદમ્બિકામ્ ॥ ૧૭॥

તત્રાગત્ય દદર્શાજાવમ્બિકાઞ્ચ પુરઃસ્થિતામ્ ।
રૌદ્રરસયુતાં કાન્તાં શ‍ૃઙ્ગારરસસંયુતામ્ ॥ ૧૮॥

તાં વીક્ષ્ય વિપુલાપાઙ્ગીં ત્રૈલોક્યવરસુન્દરીમ્ ।
સુરક્તનયનાં રમ્યાં ક્રોધરક્તેક્ષણાં તથા ॥ ૧૯॥

વિવાહેચ્છાં પરિત્યજ્ય જયાશાં દૂરતસ્તથા ।
મરણે નિશ્ચયં કૃત્વા તસ્થાવાહિતકાર્મુકઃ ॥ ૨૦॥

તં તથા દાનવં દેવી સ્મિતપૂર્વમિદં વચઃ ।
બભાષે શ‍ૃણ્વતાં તેષાં દૈત્યાનાં રણમસ્તકે ॥ ૨૧॥

ગચ્છધ્વં પામરા યૂયં પાતાલં વા જલાર્ણવમ્ ।
જીવિતાશાં સ્થિરાં કૃત્વા ત્યક્ત્વાત્રૈવાયુધાનિ ચ ॥ ૨૨॥

અથવા મચ્છરાઘાતહતપ્રાણા રણાજિરે ।
પ્રાપ્ય સ્વર્ગસુખં સર્વે ક્રીડન્તુ વિગતજ્વરાઃ ॥ ૨૩॥

કાતરત્વં ચ શૂરત્વં ન ભવત્યેવ સર્વથા ।
દદામ્યભયદાનં વૈ યાન્તુ સર્વે યથાસુખમ્ ॥ ૨૪॥

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યા નિશુમ્ભો મદગર્વિતઃ ।
નિશિતં ખડ્ગમાદાય ચર્મ ચૈવાષ્ટચન્દ્રકમ્ ॥ ૨૫॥

ધાવમાનસ્તુ તરસાસિના સિંહં મદોત્કટમ્ ।
જઘાનાતિબલાન્મૂર્ધ્નિ ભ્રામયઞ્જગદમ્બિકામ્ ॥ ૨૬॥

તતો દેવી સ્વગદયા વઞ્ચયિત્વાસિપાતનમ્ ।
તાડયામાસ તં બાહોર્મૂલે પરશુના તદા ॥ ૨૭॥

ખડ્ગેન નિહતઃ સોઽપિ બાહુમૂલે મહામદઃ ।
સંસ્તભ્ય વેદનાં ભૂયો જઘાન ચણ્ડિકાં તદા ॥ ૨૮॥

સાપિ ઘણ્ટાસ્વનં ઘોરં ચકાર ભયદં નૃણામ્ ।
પપૌ પુનઃ પુનઃ પાનં નિશુમ્ભં હન્તુમિચ્છતી ॥ ૨૯॥

એવં પરસ્પરં યુદ્ધં બભૂવાતિભયપ્રદમ્ ।
દેવાનાં દાનવાનાઞ્ચ પરસ્પરજયૈષિણામ્ ॥ ૩૦॥

પલાદાઃ પક્ષિણઃ ક્રૂરાઃ સારમેયાશ્ચ જમ્બુકાઃ ।
નનૃતુશ્ચાતિસન્તુષ્ટા ગૃધ્રાઃ કઙ્કાશ્ચ વાયસાઃ ॥ ૩૧॥

રણભૂર્ભાતિ ભૂયિષ્ઠપતિતાસુરવર્ષ્મકૈઃ ।
રુધિરસ્રાવસંયુક્તૈર્ગજાશ્વદેહસઙ્કુલા ॥ ૩૨॥

પતિતાન્દાનવાન્દૃષ્ટ્વા નિશુમ્ભોઽતિરુષાન્વિતઃ ।
પ્રયયૌ ચણ્ડિકાં તૂર્ણં ગદામાદાય દારુણામ્ ॥ ૩૩॥

સિંહં જઘાન ગદયા મસ્તકે મદગર્વિતઃ ।
પ્રહૃત્ય ચ સ્મિતં કૃત્વા પુનર્દેવીમતાડયત્ ॥ ૩૪॥

સાપિ તં કુપિતાતીવ નિશુમ્ભં પુરતઃ સ્થિતમ્ ।
પ્રહરન્તં સમીક્ષ્યાથ દેવી વચનમબ્રવીત્ ॥ ૩૫॥

દેવ્યુવાચ ।
તિષ્ઠ મન્દમતે તાવદ્યાવત્ખડ્ગમિદં તવ ।
ગ્રીવાયાં પ્રેરયામ્યસ્માદ્ ગન્તાસિ યમસાદનમ્ ॥ ૩૬॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા તરસા દેવી કૃપાણેન સમાહિતા ।
ચિચ્છેદ મસ્તકં તસ્ય નિશુમ્ભસ્યાથ ચણ્ડિકા ॥ ૩૭॥

સચ્છિન્નમસ્તકો દેવ્યા કબન્ધોઽતીવ દારુણઃ ।
બભ્રામ ચ ગદાપાણિસ્ત્રાસયન્દેવતાગણાન્ ॥ ૩૮॥

દેવી તસ્ય શિતૈર્બાણૈશ્ચિચ્છેદ ચરણૌ કરૌ ।
પપાતોર્વ્યાં તતઃ પાપી ગતાસુઃ પર્વતોપમઃ ॥ ૩૯॥

તસ્મિન્નિપતિતે દૈત્યે નિશુમ્ભે ભીમવિક્રમે ।
હાહાકારો મહાનાસીત્તત્સૈન્યે ભયકમ્પિતે ॥ ૪૦॥

ત્યક્ત્વાઽઽયુધાનિ સર્વાણિ સૈનિકાઃ ક્ષતજાપ્લુતાઃ ।
જગ્મુર્બુમ્બારવં સર્વે કુર્વાણા રાજમન્દિરમ્ ॥ ૪૧॥

તાનાગતાન્સુસમ્પ્રેક્ષ્ય શુમ્ભઃ શત્રુનિષૂદનઃ ।
પપ્રચ્છ ક્વ નિશુમ્ભોઽસૌ કથં ભગ્નાઃ પલાયિતાઃ ॥ ૪૨
તચ્છ્રુત્વા વચનં રાજ્ઞસ્તે પ્રોચુઃ પ્રણતા ભૃશમ્ ।
રાજંસ્તે નિહતો ભ્રાતા શેતે સમરમૂર્ધનિ ॥ ૪૩॥

તયા નિપાતિતાઃ શૂરા યે ચ તેઽપ્યનુજાનુગાઃ ।
વયં ત્વાં કથિતું સર્વં વૃત્તાન્તં સમુપાગતાઃ ॥ ૪૪॥

નિશુમ્ભો નિહતસ્તત્ર તયા ચણ્ડિકયાધુના ।
ન હિ યુદ્ધસ્ય કાલોઽદ્ય તવ રાજન્ રણાઙ્ગણે ॥ ૪૫॥

દેવકાર્યં સમુદ્દિશ્ય કાપીયં પરમાઙ્ગના ।
હન્તું દૈત્યકુલં નૂનં પ્રાપ્તેતિ પરિચિન્તય ॥ ૪૬॥

નૈષા પ્રાકૃતયોષૈવ દેવી શક્તિરનુત્તમા ।
અચિન્ત્યચરિતા ક્વાપિ દુર્જ્ઞેયા દૈવતૈરપિ ॥ ૪૭॥

નાનારૂપધરાતીવ માયામૂલવિશારદા ।
વિચિત્રભૂષણા દેવી સર્વાયુધધરા શુભા ॥ ૪૮॥

ગહના ગૂઢચરિતા કાલરાત્રિરિવાપરા ।
અપારપારગા પૂર્ણા સર્વલક્ષણસંયુતા ॥ ૪૯॥

અન્તરિક્ષસ્થિતા દેવાસ્તાં સ્તુવન્ત્યકુતોભયાઃ ।
દેવકાર્યઞ્ચ કુર્વાણાં શ્રીદેવીં પરમાદ્ભુતામ્ ॥ ૫૦॥

પલાયનં પરો ધર્મઃ સર્વથા દેહરક્ષણમ્ ।
રક્ષિતે કિલ દેહેસ્મિન્કાલેઽસ્મત્સુખતાઙ્ગતે ॥ ૫૧॥

સઙ્ગ્રામે વિજયો રાજન્ ભવિતા તે ન સંશયઃ ।
કાલઃ કરોતિ બલિનં સમયે નિર્બલં ક્વચિત્ ॥ ૫૨॥

તં પુનઃ સબલં કૃત્વા જયાયોપદધાતિ હિ ।
દાતારં યાચકં કાલઃ કરોતિ સમયે ક્વચિત્ ॥ ૫૩॥

ભિક્ષુકં ધનદાતારં કરોતિ સમયાન્તરે ।
વિષ્ણુઃ કાલવશે નૂનં બ્રહ્મા વા પાર્વતીપતિઃ ॥ ૫૪॥

ઇન્દ્રાદ્યા નિર્જરાઃ સર્વે કાલ એવ પ્રભુઃ સ્વયમ્ ।
તસ્માત્કાલં પ્રતીક્ષસ્વ વિપરીતં તવાધુના ॥ ૫૫॥

સમ્મુખો દેવતાનાઞ્ચ દૈત્યાનાં નાશહેતુકઃ ।
એકૈવ ચ ગતિર્નાસ્તિ કાલસ્ય કિલ ભૂપતે ॥ ૫૬॥

નાનારૂપધરાપ્યસ્તિ જ્ઞાતવ્યં તસ્ય ચેષ્ટિતમ્ ।
કદાચિત્સમ્ભવો નૃણાં કદાચિત્પ્રલયસ્તથા ॥ ૫૭॥

ઉત્પત્તિહેતુઃ કાલોઽન્યઃ ક્ષયહેતુસ્તથાપરઃ ।
પ્રત્યક્ષં તે મહારાજ દેવાઃ સર્વે સવાસવાઃ ॥ ૫૮॥

કરદાસ્તે કૃતાઃ પૂર્વં કાલેન સમ્મુખેન ચ ।
તેનૈવ વિમુખેનાદ્ય બલિનોઽબલયાસુરાઃ ॥ ૫૯॥

નિહતા નિતરાં કાલઃ કરોતિ ચ શુભાશુભમ્ ।
નૈવાત્ર કારણં કાલી નૈવ દેવાઃ સનાતનાઃ ॥ ૬૦॥

યથા તે રોચતે રાજંસ્તથા કુરુ વિમૃશ્ય ચ ।
કાલોઽયં નાત્ર હેતુસ્તે દાનવાનાં તથા પુનઃ ॥ ૬૧॥

ત્વદગ્રતો ગતઃ શક્રો ભગ્નઃ સઙ્ખ્યે નિરાયુધઃ ।
તથા વિષ્ણુસ્તથા રુદ્રો વરુણો ધનદો યમઃ ॥ ૬૨॥

તથા ત્વમપિ રાજેન્દ્ર વીક્ષ્ય કાલવશં જગત્ ।
પાતાલં ગચ્છ તરસા જીવન્ભદ્રમવાપ્સ્યસિ ॥ ૬૩॥

મૃતે ત્વયિ મહારાજ શત્રવસ્તે મુદાન્વિતાઃ ।
મઙ્ગલાનિ પ્રગાયન્તો વિચરિષ્યન્તિ સર્વતઃ ॥ ૬૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે યુદ્ધાત્પ્રત્યાગતાનાં રક્ષસાં
શુમ્ભાય વાર્તાવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૦॥

## ૫.૩૧ એકત્રિંશોઽધ્યાયઃ । શુમ્ભવધઃ ।

વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા શુમ્ભો દૈત્યપતિસ્તથા ।
ઉવાચ સૈનિકાનાશુ કોપાકુલિતલોચનઃ ॥ ૧॥

શુમ્ભ ઉવાચ ।
જાલ્માઃ કિં શ્રૂત દુર્વાચ્યં કૃત્વા જીવિતુમુત્સહે ।
નિહત્ય સચિવાન્ભ્રાતૄન્નિર્લજ્જો વિચરામિ કિમ્ ॥ ૨॥

કાલઃ કર્તા શુભાનાં વાશુભાનાં બલવત્તરઃ ।
કા ચિન્તા મમ દુર્વારે તસ્મિન્નીશેઽપ્યરૂપકે ॥ ૩॥

યદ્ભવતિ તદ્ભવતુ યત્કરોતિ કરોતુ તત્ ।
ન મે ચિન્તાસ્તિ કુત્રાપિ મરણાજ્જીવનાત્તથા ॥ ૪॥

સ કાલોઽપ્યન્યથાકર્તું ભાવિતો નેશતે ક્વચિત્ ।
ન વર્ષતિ ચ પર્જન્યઃ શ્રાવણે માસિ સર્વથા ॥ ૫॥

કદાચિન્માર્ગશીર્ષે વા પૌષે માઘેઽથ ફાલ્ગુને ।
અકાલે વર્ષતીવાશુ તસ્માન્મુખ્યો ન ચાસ્ત્વયમ્ ॥ ૬॥

કાલો નિમિત્તમાત્રં તુ દૈવં હિ બલવત્તરમ્ ।
દૈવેન નિર્મિતં સર્વં નાન્યથા ભવતીત્યદઃ ॥ ૭

દૈવમેવ પરં મન્યે ધિક્પૌરુષમનર્થકમ્ ।
જેતા યઃ સર્વદેવાનાં નિશુમ્ભોઽપ્યનયા હતઃ ॥ ૮
રક્તબીજો મહાશૂરઃ સોઽપિ નાશં ગતો યદા ।
તદાહં કીર્તિમુત્સૃજ્ય જીવિતાશાં કરોમિ કિમ્ ॥ ૯॥

પ્રાપ્તે કાલે સ્વયં બ્રહ્મા પરાર્ધદ્વયસમ્મિતે ।
નિધનં યાતિ તરસા જગત્કર્તા સ્વયં પ્રભુઃ ॥ ૧૦॥

ચતુર્યુગસહસ્રં તુ બ્રહ્મણો દિવસે કિલ ।
પતન્તિ ભવનાત્પઞ્ચ નવ ચેન્દ્રાસ્તથા પુનઃ ॥ ૧૧॥

તથૈવ દ્વિગુણે વિષ્ણુર્મરણાયોપકલ્પતે ।
તથૈવ દ્વિગુણે કાલે શઙ્કરઃ શાન્તિમેતિ ચ ॥ ૧૨॥

કા ચિન્તા મરણે મૂઢા નિશ્ચલે દૈવનિર્મિતે ।
મહી મહીધરાણાઞ્ચ નાશઃ સૂર્યશશાઙ્કયોઃ ॥ ૧૩॥

જાતસ્ય હિ ધ્રુવં મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
અધ્રુવેઽસ્મિઞ્છરીરે તુ રક્ષણીયં યશઃ સ્થિરમ્ ॥ ૧૪॥

રથો મે કલ્પ્યતાં શીઘ્રં ગમિષ્યામિ રણાજિરે ।
જયો વા મરણં વાપિ ભવત્વદ્યૈવ દૈવતઃ ॥ ૧૫॥

ઇત્યુક્ત્વા સૈનિકાઞ્છુમ્ભો રથમાસ્થાય સત્વરઃ ।
પ્રયયાવમ્બિકા યત્ર સંસ્થિતા તુ હિમાચલે ॥ ૧૬॥

સૈન્યં પ્રચલિતં તસ્ય સઙ્ગે તત્ર ચતુર્વિધમ્ ।
હસ્ત્યશ્વરથપાદાતિસંયુતં સાયુધં બહુ ॥ ૧૭॥

તત્ર ગત્વાચલે શુમ્ભઃ સંસ્થિતાં જગદમ્બિકામ્ ।
ત્રૈલોક્યમોહિનીં કાન્તામપશ્યત્સિંહવાહિનીમ્ ॥ ૧૮॥

સર્વાભરણભૂષાઢ્યાં સર્વલક્ષણસંવૃતામ્ ।
સ્તૂયમાનાં સુરૈઃ ખસ્થૈર્ગન્ધર્વયક્ષકિન્નરૈઃ ॥ ૧૯॥

પુષ્પૈશ્ચ પૂજ્યમાનાઞ્ચ મન્દારપાદપોદ્ભવૈઃ ।
કુર્વાણાં શઙ્ખનિનદં ઘણ્ટાનાદં મનોહરમ્ ॥ ૨૦॥

દૃષ્ટ્વા તાં મોહમગમચ્છુમ્ભઃ કામવિમોહિતઃ ।
પઞ્ચબાણાહતઃ કામં મનસા સમચિન્તયત્ ॥ ૨૧॥

અહો રૂપમિદં સમ્યગહો ચાતુર્યમદ્ભુતમ્ ।
સૌકુમાર્યઞ્જ ધૈર્યઞ્ચ પરસ્પરવિરોધિ યત્ ॥ ૨૨॥

સુકુમારાતિતન્વઙ્ગી સદ્યઃ પ્રકટયૌવના ।
ચિત્રમેતદસૌ બાલા કામભાવવિવર્જિતા ॥ ૨૩॥

કામકાન્તાસમા રૂપે સર્વલક્ષણલક્ષિતા ।
અમ્બિકેયં કિમેતત્તુ હન્તિ સર્વાન્મહાબલાન્ ॥ ૨૪॥

ઉપાયઃ કોઽત્ર કર્તવ્યો યેન મે વશગા ભવેત્ ।
ન મન્ત્રા વા મરાલાક્ષીસાધને સન્નિધૌ મમ ॥ ૨૫॥

સર્વમન્ત્રમયી હ્યેષા મોહિની મદગર્વિતા ।
સુન્દરીયં કથં મે સ્યાદ્વશગા વરવર્ણિની ॥ ૨૬॥

પાતાલગમનં મેઽદ્ય ન યુક્તં સમરાઙ્ગણાત્ ।
સામદાનવિભેદૈશ્ચ નેયં સાધ્યા મહાબલા ॥ ૨૭॥

કિં કર્તવ્યં ચ ગન્તવ્યં વિષમે સમુપસ્થિતે ।
મરણં નોત્તમં ચાત્ર સ્ત્રીકૃતં તુ યશોઽપહૃત્ ॥ ૨૮॥

મરણમૃષિભિઃ પ્રોક્તં સઙ્ગરે મઙ્ગલાસ્પદમ્ ।
યત્તત્સમાનબલયોર્યોધયોર્યુધ્યતોઃ કિલ ॥ ૨૯॥

પ્રાપ્તેયં દૈવરચિતા નારી નરશતોત્તમા ।
નાશાયાસ્મત્કુલસ્યેહ સર્વથાતિબલાબલા ॥ ૩૦॥

વૃથા કિં સામવાક્યાનિ મયા યોજ્યાનિ સામ્પ્રતમ્ ।
હનનાયાગતા હ્યેષા કિં નુ સામ્ના પ્રસીદતિ ॥ ૩૧॥

ન દાનૈશ્ચાલિતું યોગ્યા નાનાશસ્ત્રવિભૂષિતા ।
ભેદસ્તુ વિફલઃ કામં સર્વદેવવશાનુગા ॥ ૩૨॥

તસ્માત્તુ મરણં શ્રેયો ન સઙ્ગ્રામે પલાયનમ્ ।
જયો વા મરણં વાદ્ય ભવત્વેવ યથાવિધિ ॥ ૩૩॥

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય મનસા શુમ્ભઃ સત્ત્વાશ્રિતોઽભવત્ ।
યુદ્ધાય સુસ્થિરો ભૂત્વા તામુવાચ પુરઃસ્થિતામ્ ॥ ૩૪॥

દેવિ યુધ્યસ્વ કાન્તેઽદ્ય મૃથાયં તે પરિશ્રમઃ ।

મૂર્ખાસિ કિલ નારીણાં નાયં ધર્મઃ કદાચન ॥ ૩૫॥

નારીણાં લોચને બાણા ભ્રુવાવેવ શરાસનમ્ ।
હાવભાવાસ્તુ શસ્ત્રાણિ પુમાઁલ્લક્ષ્યં વિચક્ષણઃ ॥ ૩૬॥

સન્નાહશ્ચાઙ્ગરાગોઽત્ર રથશ્ચાપિ મનોરથઃ ।
મન્દપ્રજલ્પિતં ભેરીશબ્દો નાન્યઃ કદાચન ॥ ૩૭॥

અન્યાસ્ત્રધારણં સ્ત્રીણાં વિડમ્બનમસંશયમ્ ।
લજ્જૈવ ભૂષણં કાન્તે ન ચ ધાર્ષ્ટ્યં કદાચન ॥ ૩૮॥

યુધ્યમાના વરા નારી કર્કશેવાભિદૃશ્યતે ।
સ્તનૌ સઙ્ગોપનીયૌ વા ધનુષઃ કર્ષણે કથમ્ ॥ ૩૯॥

ક્વ મન્દગમનં કુત્ર ગદામાદાય ધાવનમ્ ।
બુદ્ધિદા કાલિકા તેઽત્ર ચામુણ્ડા પરનાયિકા ॥ ૪૦॥

ચણ્ડિકા મન્ત્રમધ્યસ્થા લાલનેઽસુસ્વરા શિવા ।
વાહનં મૃગરાડાસ્તે સર્વસત્ત્વભયઙ્કરઃ ॥ ૪૧॥

વીણાનાદં પરિત્યજ્ય ઘણ્ટાનાદં કરોષિ યત્ ।
રૂપયૌવનયોઃ સર્વં વિરોધિ વરવર્ણિનિ ॥ ૪૨॥

યદિ તે સઙ્ગરેચ્છાસ્તિ કુરૂપા ભવ ભામિનિ ।
લમ્બોષ્ઠી કુનખી ક્રૂરા ધ્વાઙ્ક્ષવર્ણા વિલોચના ॥ ૪૩॥

લમ્બપાદા કુદન્તી ચ માર્જારનયનાકૃતિઃ ।
ઈદૃશં રૂપમાસ્થાય તિષ્ઠ યુદ્ધે સ્થિરા ભવ ॥ ૪૪॥

કર્કશં વચનં બ્રૂહિ તતો યુદ્ધં કરોમ્યહમ્ ।
ઈદૃશીં સુદતીં દૃષ્ટ્વા ન મે પાણિઃ પ્રસીદતિ ॥ ૪૫॥

હન્તું ત્વાં મૃગશાવાક્ષિ કામકાન્તોપમે મૃધે ।
વ્યાસ ઉવાચ ।
ઇતિ બ્રુવાણં કામાર્તં વીક્ષ્ય તં જગદમ્બિકા ॥ ૪૬॥

સ્મિતપૂર્વમિદં વાક્યમુવાચ ભરતોત્તમ ।
દેવ્યુવાચ ।
કિં વિષીદસિ મન્દાત્મન્ કામબાણવિમોહિતઃ ॥ ૪૭॥

પ્રેક્ષિકાહં સ્થિતા મૂઢ કુરુ કાલિકયા મૃધમ્ ।

ચામુણ્ડયા વા કુર્વેતે તવ યોગ્યે રણાઙ્ગણે ॥ ૪૮॥

પ્રહરસ્વ યથાકામં નાહં ત્વાં યોદ્ધુમુત્સહે ।
ઇત્યુક્ત્વા કાલિકાં પ્રાહ દેવી મધુરયા ગિરા ॥ ૪૯॥

જહ્યેનં કાલિકે ક્રૂરે કુરૂપપ્રિયમાહવે ।
વ્યાસ ઉવાચ ।
ઇત્યુક્તા કાલિકા કાલપ્રેરિતા કાલરૂપિણી ॥ ૫૦॥

ગદાં પ્રગૃહ્ય તરસા તસ્થાવાજૌ કૃતોદ્યમા ।
તયોઃ પરસ્પરં યુદ્ધં બભૂવાતિભયાનકમ્ ॥ ૫૧॥

પશ્યતાં સર્વદેવાનાં મુનીનાઞ્ચ મહાત્મનામ્ ।
ગદામુદ્યમ્ય શુમ્ભોઽથ જઘાન કાલિકાં રણે ॥ ૫૨॥

કાલિકા દૈત્યરાજાનં ગદયા ન્યહનદ્ ભૃશમ્ ।
બભઞ્જાસ્ય રથં ચણ્ડી ગદયા કનકોજ્જ્વલમ્ ॥ ૫૩॥

ખરાન્હત્વા જઘાનાશુ દારુકં દારુણસ્વના ।
સ પદાતિર્ગદાં ગુર્વીં સમાદાય ક્રુધાન્વિતઃ ॥ ૫૪॥

કાલિકાભુજયોર્મધ્યે પ્રહસન્નહનત્તદા ।
વઞ્ચયિત્વા ગદાઘાતં ખડ્ગમાદાય સત્વરા ॥ ૫૫॥

ચિચ્છેદાસ્ય ભુજં સવ્યં સાયુધં ચન્દનાર્ચિતમ્ ।
સ છિન્નબાહુર્વિરથો ગદાપાણિઃ પરિપ્લુતઃ ॥ ૫૬॥

અચિરેણ સમાગમ્ય કાલિકામહનત્તદા ।
કાલી ચ કરવાલેન ભુજં તસ્યાથ દક્ષિણમ્ ॥ ૫૭॥

ચિચ્છેદ પ્રહસન્તી સા સગદં કિલ સાઙ્ગદમ્ ।
કર્તું પાદપ્રહારં સ કુપિતઃ પ્રયયૌ જવાત્ ॥ ૫૮॥

કાલી ચિચ્છેદ ચરણૌ ખડ્ગેનાસ્ય ત્વરાન્વિતા ।
સચ્છિન્નકરપાદોઽપિ તિષ્ઠ તિષ્ઠેતિ ચ બ્રુવન્ ॥ ૫૯॥

ધાવમાનો યયાવાશુ કાલિકાં ભીષયન્નિવ ।
તમાગચ્છન્તમાલોક્ય કાલિકા કમલોપમમ્ ॥ ૬૦॥

ચકર્ત મસ્તકં કણ્ઠાદ્રુધિરૌઘવહં ભૃશમ્ ।
છિન્નેઽસૌ મસ્તકે ભૂમૌ પપાત ગિરિસન્નિભઃ ॥ ૬૧॥

પ્રાણા વિનિર્યયુસ્તસ્ય દેહાદુત્ક્રમ્ય સત્વરમ્ ।
ગતાસું પતિતં દૈત્યં દૃષ્ટ્વા દેવાઃ સવાસવાઃ ॥ ૬૨॥

તુષ્ટુવુસ્તાં તદા દેવીં ચામુણ્ડાં કાલિકાં તથા ।
વવુર્વાતાઃ શિવાસ્તત્ર દિશશ્ચ વિમલા ભૃશમ્ ॥ ૬૩॥

બભૂવુશ્ચાગ્નયો હોમે પ્રદક્ષિણશિખાઃ શુભાઃ ।
હતશેષાશ્ચ યે દૈત્યાઃ પ્રણમ્ય જગદમ્બિકામ્ ॥ ૬૪॥

ત્યક્ત્વાઽઽયુધાનિ તે સર્વે પાતાલં પ્રયયુર્નૃપ ।
એતત્તે સર્વમાખ્યાતં દેવ્યાશ્ચરિતમુત્તમમ્ ॥ ૬૫॥

શુમ્ભાદીનાં વધં ચૈવ સુરાણાં રક્ષણં તથા ।
એતદાખ્યાનકં સર્વં પઠન્તિ ભુવિ માનવાઃ ॥ ૬૬॥

શ‍ૃણ્વન્તિ ચ સદા ભક્ત્યા તે કૃતાર્થા ભવન્તિ હિ ।
અપુત્રો લભતે પુત્રાન્નિર્ધનશ્ચ ધનં બહુ ॥ ૬૭॥

રોગી ચ મુચ્યતે રોગાત્સર્વાન્કામાનવાપ્નુયાત્ ।
શત્રુતો ન ભયં તસ્ય ય ઇદં ચરિતં શુભમ્ ।
શ‍ૃણોતિ પઠતે નિત્યં મુક્તિભાગ્જાયતે નરઃ ॥ ૬૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
શુમ્ભવધો નામૈકત્રિંશોઽધ્યાયઃ ॥ ૫.૩૧॥

## ૫.૩૨ દ્વાત્રિંશોઽધ્યાયઃ । સુરથરાજસમાધિવૈશ્યયોર્મુનિસમીપે ગમનમ્ ।

જનમેજય ઉવાચ ।
મહિમા વર્ણિતઃ સમ્યક્ચણ્ડિકાયાસ્ત્વયા મુને ।
કેન ચારાધિતા પૂર્વં ચરિત્રત્રયયોગતઃ ॥ ૧॥

પ્રસન્ના કસ્ય વરદા કેન પ્રાપ્તં ફલં મહત્ ।
આરાધ્ય કામદાં દેવીં કથયસ્વ કૃપાનિધે ॥ ૨॥

ઉપાસનાવિધિં બ્રહ્મંસ્તથા પૂજાવિધિં વદ ।
વિસ્તરેણ મહાભાગ હોમસ્ય ચ વિધિં પુનઃ ॥ ૩॥

સૂત ઉવાચ ।
ઇતિ ભૂપવચઃ શ્રુત્વા પ્રીતઃ સત્યવતીસુતઃ ।
પ્રત્યુવાચ નૃપં કૃષ્ણો મહામાયાપ્રપૂજનમ્ ॥ ૪॥

વ્યાસ ઉવાચ ।
સ્વારોચિષેઽન્તરે પૂર્વં સુરથો નામ પાર્થિવઃ ।
બભૂવ પરમોદારઃ પ્રજાપાલનતત્પરઃ ॥ ૫॥

સત્યવાદી કર્મપરો બ્રાહ્મણાનાઞ્ચ પૂજકઃ ।
ગુરુભક્તિરતો નિત્યં સ્વદારગમને રતઃ ॥ ૬॥

દાનશીલોઽવિરોધી ચ ધનુર્વેદૈકપારગઃ ।
એવં પાલયતો રાજ્યં મ્લેચ્છાઃ પર્વતવાસિનઃ ॥ ૭॥

બલાચ્છત્રુત્વમાપન્નાઃ સૈન્યં કૃત્વા ચતુર્વિધમ્ ।
હસ્ત્યશ્વરથપાદાતિસહિતાસ્તે મદોત્કટાઃ ॥ ૮॥

કોલાવિધ્વંસિનઃ પ્રાપ્તાઃ પૃથ્વીગ્રહણતત્પરાઃ ।
સુરથઃ સૈન્યમાદાય સમ્મુખઃ સમપદ્યત ॥ ૯॥

યુદ્ધં સમભવદ્ઘોરં તસ્ય તૈરતિદારુણૈઃ ।
મ્લેચ્છાનાં તુ બલં સ્વલ્પં રાજ્ઞસ્દ્બલમદ્ભુતમ્ ॥ ૧૦॥

તથાપિ તૈર્જિતો યુદ્ધે દૈવાદ્રાજા પરાજિતઃ ।
ભગ્નશ્ચ સ્વપુરં પ્રાપ્તઃ સુરક્ષં દુર્ગમણ્ડિતમ્ ॥ ૧૧॥

ચિન્તયામાસ મેધાવી રાજા નીતિવિચક્ષણઃ ।
પ્રધાનાન્વિમના દૃષ્ટ્વા શત્રુપક્ષસમાશ્રિતાન્ ॥ ૧૨॥

સ્થાનં ગૃહીત્વા વિપુલં પરિખાદુર્ગમણ્ડિતમ્ ।
કાલપ્રતીક્ષા કર્તવ્યા કિં વા યુદ્ધં વરં મતમ્ ॥ ૧૩॥

મન્ત્રિણઃ શત્રુવશગા મન્ત્રયોગ્યા ન તે કિલ ।
કિં કરોમીતિ મનસા ભૂપતિઃ સમચિન્તયત્ ॥ ૧૪॥

કદાચિત્તે ગહીત્વા માં પાપાચારાઃ પરાશ્રિતાઃ ।
શત્રુભ્યોઽથ પ્રદાસ્યન્તિ તદા કિં વા ભવિષ્યતિ ॥ ૧૫॥

પાપબુદ્ધિષુ વિશ્વાસો ન કર્તવ્યઃ કદાચન ।
કિન્ન તે વૈ પ્રકુર્વન્તિ યે લોભવશગા નરાઃ ॥ ૧૬॥

ભ્રાતરં પિતરં મિત્રં સુહૃદં બાન્ધવં તથા ।
ગુરું પૂજ્યં દ્વિજં દ્વેષ્ટિ લોભાવિષ્ટઃ સદા નરઃ ॥ ૧૭॥

તસ્માન્મયા ન કર્તવ્યો વિશ્વાસઃ સર્વથાધુના ।
મન્ત્રિવર્ગેઽતિપાપિષ્ઠે શત્રુપક્ષસમાશ્રિતે ॥ ૧૮॥

ઇતિ સઞ્ચિન્ત્ય મનસા રાજા પરમદુર્મનાઃ ।
એકાકી હયમારુહ્ય નિર્જગામ પુરાત્તતઃ ॥ ૧૯॥

અસહાયોઽથ નિર્ગત્ય ગહનં વનમાશ્રિતઃ ।
ચિન્તયામાસ મેધાવી ક્વ ગન્તવ્યં મયા પુનઃ ॥ ૨૦॥

યોજનત્રયમાત્રે તુ મુનેરાશ્રમમુત્તમમ્ ।
જ્ઞાત્વા જગામ ભૂપાલસ્તાપસસ્ય સુમેધસઃ ॥ ૨૧॥

બહુવૃક્ષસમાયુક્તં નદીપુલિનસંશ્રિતમ્ ।
નિર્વૈરશ્વાપદાકીર્ણં કોકિલારાવમણ્ડિતમ્ ॥ ૨૨॥

શિષ્યાધ્યયનશબ્દાઢ્યં મૃગયૂથશતાવૃતમ્ ।
નીવારાન્નસુપક્વાઢ્યં સુપુષ્પફલપાદપમ્ ॥ ૨૩॥

હોમધૂમસુગન્ધેન પ્રીતિદં પ્રાણિનાં સદા ।
વેદધ્વનિસમાક્રાન્તં સ્વર્ગાદપિ મનોહરમ્ ॥ ૨૪॥

દૃષ્ટ્વા તમાશ્રમં રાજા બભૂવાસૌ મુદાન્વિતઃ ।
ભયં ત્યક્ત્વા મતિં ચક્રે વિશ્રામાય દ્વિજાશ્રમે ॥ ૨૫॥

આસજ્ય પાદપેઽશ્વં તુ જગામ વિનયાન્વિતઃ ।
દૃષ્ટ્વા તં મુનિમાસીનં સાલચ્છાયાસુ સંશ્રિતમ્ ॥ ૨૬॥

મૃગાજિનાસનં શાન્તં તપસાતિકૃશં ઋજુમ્ ।
અધ્યાપયન્તં શિષ્યાંશ્ચ વેદશાસ્ત્રાર્થદર્શિનમ્ ॥ ૨૭॥

રહિતં ક્રોધલોભાદ્યૈર્દ્વન્દ્વાતીતં વિમત્સરમ્ ।
આત્મજ્ઞાનરતં સત્યવાદિનં શમસંયુતમ્ ॥ ૨૮॥

તં વીક્ષ્ય ભૂપતિર્ભૂમૌ પપાત દણ્ડવત્તદા ।
તદગ્રેઽશ્રુજલાપૂર્ણનયનઃ પ્રેમસંયુતઃ ॥ ૨૯॥

ઉત્તિષ્ઠોત્તિષ્ઠ ભદ્રં તે તમુવાચ તદા મુનિઃ ।
શિષ્યો દદૌ બૃસીં તસ્મૈ ગુરુણા નોદિતસ્તદા ॥ ૩૦॥

ઉત્થાય નૃપતિસ્તસ્યાં સમાસીનસ્તદાજ્ઞયા ।
અર્ઘ્યપાદ્યાર્હણં ચક્રે સુમેધા વિધિપૂર્વકમ્ ॥ ૩૧॥

પપ્રચ્છાત્ર કુતઃ પ્રાપ્તઃ કસ્ત્વં ચિન્તાપરઃ કથમ્ ।
કથયસ્વ યથાકામં સંવૃતં કારણં ત્વિહ ॥ ૩૨॥

કિમાગમનકૃત્યં તે બ્રૂહિ કાર્યં મનોગતમ્ ।
કરિષ્યે વાઞ્છિતં કામમસાધ્યમપિ યત્તવ ॥ ૩૩॥

રાજોવાચ ।
સુરથો નામ રાજાહં શત્રુભિશ્ચ પરાજિતઃ ।
ત્યક્ત્વા રાજ્યં ગૃહં ભાર્યામહં તે શરણં ગતઃ ॥ ૩૪॥

યદાજ્ઞાપયસે બ્રહ્મંસ્તદહં ભક્તિતત્પરઃ ।
કરિષ્યામિ ન મે ત્રાતા ત્વદન્યઃ પૃથિવીતલે ॥ ૩૫॥

શત્રુભ્યો મે ભયં ઘોરં પ્રાપ્તોઽસ્મ્યદ્ય તવાન્તિકમ્ ।
ત્રાયસ્વ મુનિશાર્દૂલ શરણાગતવત્સલ ॥ ૩૬॥

ઋષિરુવાચ ।
નિર્ભયં વસ રાજેન્દ્ર નાત્ર તે શત્રવઃ કિલ ।
આગમિષ્યન્તિ બલિનો નિશ્ચયં તપસો બલાત્ ॥ ૩૭॥

નાત્ર હિંસા પ્રકર્તવ્યા વનવૃત્ત્વા નૃપોત્તમ ।
કર્તવ્યં જીવનં શસ્તૈર્નીવારફલમૂલકૈઃ ॥ ૩૮॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા નિર્ભયઃ સ નૃપસ્તદા ।
ઉવાસાશ્રમ એવાસૌ ફલમૂલાશનઃ શુચિઃ ॥ ૩૯॥

કદાચિત્સ નૃપસ્તત્ર વૃક્ષચ્છાયાં સમાશ્રિતઃ ।
ચિન્તયામાસ ચિન્તાર્તો ગૃહ એવ ગતાશયઃ ॥ ૪૦॥

રાજ્યં મે શત્રુભિઃ પ્રાપ્તં મ્લેચ્છૈઃ પાપરતૈઃ સદા ।
સમ્પીડિતાઃ સ્યુર્લોકાસ્તૈર્દુરાચારૈર્ગતત્રપૈઃ ॥ ૪૧॥

ગજાશ્ચ તુરગાઃ સર્વે દુર્બલા ભક્ષ્યવર્જિતાઃ ।
જાતાઃ સ્યુર્નાત્ર સન્દેહઃ શત્રુણા પરિપીડિતાઃ ॥ ૪૨॥

સેવકા મમ સર્વે તે શત્રૂણાં વશવર્તિનઃ ।
દુઃખિતા એવ જાતાઃ સ્યુઃ પાલિતા યે મયા પુરા ॥ ૪૩॥

ધનં મે સુદુરાચારૈરસદ્વ્યયપરૈઃ પરૈઃ ।
દ્યૂતાસવભુજિષ્યાદિસ્થાને સ્યાત્પ્રાપિતં કિલ ॥ ૪૪॥

કોશક્ષયં કરિષ્યન્તિ વ્યસનૈઃ પાપબુદ્ધયઃ ।
ન પાત્રદાનનિપુણા મ્લેચ્છાસ્તે મન્ત્રિણોઽપિ મે ॥ ૪૫॥

ઇતિ ચિન્તાપરો રાજા વૃક્ષમૂલસ્થિતો યદા ।
તદાઽઽજગામ વૈશ્યસ્તુ કશ્ચિદાર્તિપરસ્તથા ॥ ૪૬॥

નૃપેણ પુરતો દૃષ્ટઃ પાર્શ્વે તત્રોપવેશિતઃ ।
પપ્રચ્છ તં નૃપઃ કોઽસિ કુત એવાગતો વનમ્ ॥ ૪૭॥

કોઽસિ કસ્માચ્ચ દીનોઽસિ હરિણઃ શોકપીડિતઃ ।
બ્રૂહિ સત્યં મહાભાગ મૈત્રી સાપ્તપદી મતા ॥ ૪૮॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં રાજ્ઞસ્તમુવાચ વિશોત્તમઃ ।
ઉપવિશ્ય સ્થિરો ભૂત્વા મત્વા સાધુસમાગમમ્ ॥ ૪૯॥

વૈશ્ય ઉવાચ ।
મિત્રાહં વૈશ્યજાતીયઃ સમાધિર્નામ વિશ્રુતઃ ।
ધનવાન્ધર્મનિપુણઃ સત્યવાગનસૂયકઃ ॥ ૫૦॥

પુત્રદારૈર્નિરસ્તોઽહં ધનલુબ્ધૈરસાધુભિઃ ।
(કૃપણેતિ મિષં કૃત્વા ત્યક્ત્વા માયાં સુદુસ્ત્યજાં ।)
સ્વજનેન ચ સન્ત્યક્તઃ પ્રાપ્તોઽસ્મિ વનમાશુ વૈ ॥ ૫૧॥

કોઽસિ ત્વં ભાગ્યવાન્ભાસિ કથયસ્વ પ્રિયાધુના ।
રાજોવાચ ।
સુરથો નામ રાજાહં દસ્યુભિઃ પીડિતોઽભવમ્ ॥ ૫૨॥

પ્રાપ્તોઽસ્મિ ગતરાજ્યોઽત્ર મન્ત્રિભિઃ પરિવઞ્ચિતઃ ।
દિષ્ટ્યા ત્વમત્ર મિત્રં મે મિલિતોઽસિ વિશોત્તમ ॥ ૫૩॥

સુખેન વિહરિષ્યાવો વનેઽત્ર શુભપાદપે ।
શોકં ત્યજ મહાબુદ્ધે સ્વસ્થો ભવ વિશોત્તમ ॥ ૫૪॥

(અત્રૈવ ચ યથાકામં સુખં તિષ્ઠ મયા સહ ।)
વૈશ્ય ઉવાચ ।
કુટુમ્બં મે નિરાલમ્બં મયા હીનં સુદુઃખિતમ્ ।
ભવિષ્યતિ ચ ચિન્તાઽઽર્તં વ્યાધિશોકોપતાપિતમ્ ॥ ૫૫॥

ભાર્યાદિહે સુખં નો વા પુત્રદેહે ન વા સુખમ્ ।
ઇતિ ચિન્તાતુરં ચેતો ન મે શામ્યતિ ભૂમિપ ॥ ૫૬॥

કદા દ્રક્ષ્યે સુતં ભાર્યાં ગૃહં સ્વજનમેવ ચ ।
સ્વસ્થં ન મન્મનો રાજન્ ગૃહચિન્તાકુલં ભૃશમ્ ॥ ૫૭॥

રાજોવાવ
યૈર્નિરસ્તોઽસિ પુત્રાદ્યૈરસદ્વૃત્તૈઃ સુબાલિશૈઃ ।
તાન્દૃષ્ટ્વા કિં સુખં તેઽદ્ય ભવિષ્યતિ મહામતે ॥ ૫૮॥

હિતકારી વરઃ શત્રુર્દુઃખદાઃ સુહૃદઃ કુતઃ ।
તસ્માત્સ્થિરં મનઃ કૃત્વા વિહરસ્વ મયા સહ ॥ ૫૯॥

વૈશ્ય ઉવાચ ।
મનો મે ન સ્થિરં રાજન્ ભવત્યદ્ય સુદુઃખિતમ્ ।
ચિન્તયાત્ર કુટુમ્બસ્ય દુસ્ત્યજસ્ય દુરાત્મભિઃ ॥ ૬૦॥

રાજોવાચ ।
મમાપિ રાજ્યજં દુઃખં દુનોતિ કિલ માનસમ્ ।
પૃચ્છાવોઽદ્ય મુનિં શાન્તં શોકનાશનમૌષધમ્ ॥ ૬૧॥

વ્યાસ ઉવાચ ।
ઇતિ કૃત્વા મતિં તૌ તુ રાજા વૈશ્યશ્ચ જગ્મતુઃ ।
મુનિં તૌ વિનયોપેતૌ પ્રષ્ટું શોકસ્ય કારણમ્ ॥ ૬૨॥

ગત્વા તં પ્રણિપત્યાહ રાજા ઋષિમનુત્તમમ્ ।
આસીનં સમ્યગાસીનઃ શાન્તં શાન્તિમુપાગતઃ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે સુરથરાજસમાધિ-
વૈશ્યયોર્મુનિસમીપે ગમનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૫.૩૨॥

# ૫.૩૩ ત્રયસ્ત્રિંશોઽધ્યાયઃ । દેવીમાહાત્મ્યવર્ણનમ્ ।

રાજોવાવ
મુને વૈશ્યોઽયમધુના વને મે મિત્રતાં ગતઃ ।
પુત્રદારૈર્નિરસ્તોઽયં પ્રાપ્તોઽત્ર મમ સઙ્ગમમ્ ॥ ૧॥

(કુટુમ્બવિરહેણાસૌ દુઃખિતોઽતીવ દુર્મનાઃ ।
ન શાન્તિમુપયાત્યેષ તથાપિ મમ સામ્પ્રતમ્ ।
ગતરાજ્યસ્ય દુઃખેન શોકાર્તોઽસ્મિ મહામતે ।)
નિષ્કારણઞ્ચ મે ચિન્તા હૃદયાન્ન નિવર્તતે ।
હયા મે દુર્બલાઃ સ્યુઃ કિં ગજાઃ શત્રુવશં ગતાઃ ॥ ૨॥

ભૃત્યવર્ગસ્તથા દુઃખી જાતઃ સ્યાત્તુ મયા વિના ।
કોશક્ષયં કરિષ્યન્તિ રિપવોઽતિબલાત્ક્ષણાત્ ॥ ૩॥

ઇત્યેવં ચિન્તયાનસ્ય ન મે નિદ્રા તનૌ સુખમ્ ।
જાનામીદં જગન્મિથ્યા સ્વપ્નવત્સર્વમેવ હિ ॥ ૪॥

જાનતોઽપિ મનો ભ્રાન્તં ન સ્થિરં ભવતિ પ્રભો ।
કોઽહં કેઽશ્વા ગજાઃ કેઽમી ન તે મે ચ સહોદરાઃ ॥ ૫॥

ન પુત્રા ન ચ મિત્રાણિ યેષાં દુઃખં દુનોતિ મામ્ ।
ભ્રમોઽયમિતિ જાનામિ તથાપિ મમ માનસઃ ॥ ૬॥

મોહો નૈવાપસરતિ કિં તત્કારણમદ્ભુતમ્ ।
સ્વામિંસ્ત્વમસિ સર્વજ્ઞઃ સર્વસંશયનાશકૃત્ ॥ ૭॥

કારણં બ્રૂહિ મોહસ્ય મમાસ્ય ચ દયાનિધે ।
વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા રાજ્ઞા સુમેધા મુનિસત્તમઃ ॥ ૮॥

તમુવાચ પરં જ્ઞાનં શોકમોહવિનાશનમ્ ।
ઋષિરુવાચ ।
શૃણુ રાજન્ પ્રવક્ષ્યામિ કારણં બન્ધમોક્ષયોઃ ॥ ૯॥

મહામાયેતિ વિખ્યાતા સર્વેષાં પ્રાણિનામિહ ।
બ્રહ્મા વિષ્ણુસ્તથેશાનસ્તુરાષાડ્ વરુણોઽનિલઃ ॥ ૧૦॥

સર્વે દેવા મનુષ્યાશ્ચ ગન્ધર્વોરગરાક્ષસાઃ ।

વૃક્ષાશ્ચ વિવિધા વલ્લ્યઃ પશવો મૃગપક્ષિણઃ ॥ ૧૧॥

માયાધીનાશ્ચ તે સર્વે ભાજનં બન્ધમોક્ષયોઃ ।
તયા સૃષ્ટમિદં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૧૨॥

તદ્વશે વર્તતે નૂનં મોહજાલેન યન્ત્રિતમ્ ।
ત્વં કિયાન્માનુષેષ્વેકઃ ક્ષત્રિયો રજસાવિલઃ ॥ ૧૩॥

જ્ઞાનિનામપિ ચેતાંસિ મોહયત્યનિશં હિ સા ।
બ્રહ્મેશવાસુદેવાદ્યા જ્ઞાને સત્યપિ શેષતઃ ॥ ૧૪॥

તેઽપિ રાગવશાલ્લોકે ભ્રમન્તિ પરિમોહિતાઃ ।
પુરા સત્યયુગે રાજન્ વિષ્ણુર્નારાયણઃ સ્વયમ્ ॥ ૧૫॥

શ્વેતદ્વીપં સમાસાદ્ય ચકાર વિપુલં તપઃ ।
વર્ષાણામયુતં યાવદ્ બ્રહ્મવિદ્યાપ્રસક્તયે ॥ ૧૬॥

અનશ્વરસુખાયાસૌ ચિન્તયાનસ્તતઃ પરમ્ ।
એકસ્મિન્નિર્જને દેશે બ્રહ્માપિ પરમાદ્ભુતે ॥ ૧૭॥

સ્થિતસ્તપસિ રાજેન્દ્ર મોહસ્ય વિનિવૃત્તયે ।
કદાચિદ્વાસુદેવોઽસૌ સ્થલાન્તરમતિર્હરિઃ ॥ ૧૮॥

તસ્માદ્દેશાત્સમુત્થાય જગામાન્યદ્દિદૃક્ષયા ।
ચતુર્મુખોઽપિ રાજેન્દ્ર તથૈવ નિઃસૃતઃ સ્થલાત્ ॥ ૧૯॥

મિલિતૌ માર્ગમધ્યે તુ ચતુર્મુખચતુર્ભુજૌ ।
અન્યોન્યં પૃષ્ટવન્તૌ તૌ કસ્ત્વં કસ્ત્વમિતિ સ્મ હ ॥ ૨૦॥

બ્રહ્મા પ્રોવાચ તં દેવં કર્તાહં જગતઃ કિલ ।
વિષ્ણસ્તમાહ ભો મૂર્ખ જગત્કર્તાહમચ્યુતઃ ॥ ૨૧॥

ત્વં કિયાન્બલહીનોઽસિ રજોગુણસમાશ્રિતઃ ।
સત્ત્વાશ્રિતં હિ માં વિદ્ધિ વાસુદેવં સનાતનમ્ ॥ ૨૨॥

મયા ત્વં રક્ષિતોઽદ્યૈવ કૃત્વા યુદ્ધં સુદારુણમ્ ।
શરણં મે સમાયાતો દાનવાભ્યાં પ્રપીડિતઃ ॥ ૨૩॥

મયા તૌ નિહતૌ કામં દાનવૌ મધુકૈટભૌ ।
કથં ગર્વાયસે મન્દ મોહોઽયં ત્યજ સામ્પ્રતમ્ ॥ ૨૪॥

ન મત્તોઽપ્યધિકઃ કશ્ચિત્સંસારેઽસ્મિન્પ્રસારિતે ।
ઋષિરુવાચ ।
એવં પ્રવદમાનૌ તૌ બ્રહ્મવિષ્ણૂ પરસ્પરમ્ ॥ ૨૫॥

સ્ફુરદોષ્ઠૌ વેપમાનૌ લોહિતાક્ષૌ બભૂવતુઃ ।
પ્રાદુર્બભૂવ સહસા તયોર્વિવદમાનયોઃ ॥ ૨૬॥

મધ્યે લિઙ્ગં સુધાશ્વેતં વિપુલં દીર્ઘમદ્ભુતમ્ ।
આકાશે તરસા તત્ર વાગુવાચાશરીરિણી ॥ ૨૭॥

તૌ સમ્બોધ્ય મહાભાગૌ વિવદન્તૌ પરસ્પરમ્ ।
બ્રહ્મન્ વિષ્ણો વિવાદં મા કુરુતાં વાં પરસ્પરમ્ ॥ ૨૮॥

લિઙ્ગસ્યાસ્ય પરં પારમધસ્તાદુપરિ ધ્રુવમ્ ।
યો યાતિ યુવયોર્મધ્યે સ શ્રેષ્ઠો વાં સદૈવ હિ ॥ ૨૯॥

એકઃ પ્રયાતુ પાતાલમાકાશમપરોઽધુના ।
પ્રમાણં મે વચઃ કાર્યં ત્યક્ત્વા વાદં નિરર્થકમ્ ॥ ૩૦॥

મધ્યસ્થઃ સર્વદા કાર્યો વિવાદેઽસ્મિન્દ્વયોરિહ ।
ઋષિરુવાચ ।
તચ્છ્રુત્વા વચનં દિવ્યં સજ્જીભૂતૌ કૃતોદ્યમૌ ॥ ૩૧॥

જગ્મતુર્માતુમગ્રસ્થં લિઙ્ગમદ્ભુતદર્શનમ્ ।
પાતાલમગમદ્વિષ્ણુર્બ્રહ્માપ્યાકાશમેવ ચ ॥ ૩૨॥

પરિમાતું મહાલિઙ્ગં સ્વમહત્ત્વવિવૃદ્ધયે ।
વિષ્ણુર્ગત્વા કિયદ્દેશં શ્રાન્તઃ સર્વાત્મના યતઃ ॥ ૩૩॥

ન પ્રાપાન્તં સ લિઙ્ગસ્ય પરિવૃત્ય યયૌ સ્થલમ્ ।
બ્રહ્માગચ્છત્તતશ્ચોર્ધ્વં પતિતં કેતકીદલમ્ ॥ ૩૪॥

શિવસ્ય મસ્તકાત્પ્રાપ્ય પરાવૃત્તો મુદાવૃતઃ ।
આગત્ય તરસા બ્રહ્મા વિષ્ણવે કેતકીદલમ્ ॥ ૩૫॥

દર્શયિત્વા ચ વિતથમુવાચ મદમોહિતઃ ।
લિઙ્ગસ્ય મસ્તકાદેતદ્ ગૃહીતં કેતકીદલમ્ ॥ ૩૬॥

અભિજ્ઞાનાય ચાનીતં તવ ચિત્તપ્રશાન્તયે ।
શ્રુત્વા તદ્બ્રહ્મણોવાક્યં દૃષ્ટ્વા ચ કેતકીદલમ્ ॥ ૩૭॥

હરિસ્તં પ્રત્યુવાચેદં સાક્ષી કઃ કથયાધુના ।
યથાર્થવાદી મેધાવી સદાચારઃ શુચિ સમઃ ॥ ૩૮॥

સાક્ષી ભવતિ સર્વત્ર વિવાદે સમુપસ્થિતે ।
બ્રહ્મોવાચ ।
દૂરદેશાત્સમાયાતિ સાક્ષી કઃ સમયેઽધુના ॥ ૩૯॥

યત્સત્યં તદ્વચઃ સેયં કેતકી કથયિષ્યતિ ।
ઇત્યુક્ત્વા પ્રેરિતા તત્ર બ્રહ્મણા કેતકી સ્ફુટમ્ ॥ ૪૦॥

વચનં પ્રાહ તરસા શાર્ઙ્ગિણં પ્રત્યબોધયત્ ।
શિવમૂર્ધ્નિ સ્થિતાં બ્રહ્મા ગહીત્વા માં સમાગતઃ ॥ ૪૧॥

સન્દેહોઽત્ર ન કર્તવ્યસ્ત્વયા વિષ્ણો કદાચન ।
મમ વાક્યં પ્રમાણં હિ બ્રહ્મા પારઙ્ગતોઽસ્ય હ ॥ ૪૨॥

ગૃહીત્વા માં સમાયાતઃ શિવભક્તૈઃ સમર્પિતામ્ ।
કેતક્યા વચનં શ્રુત્વા હરિરાહ સ્મયન્નિવ ॥ ૪૩॥

મહાદેવઃ પ્રમાણં મે યદ્યસૌ વચનં વદેત્ ।
ઋષિરુવાચ ।
તદાકર્ણ્ય હરેર્વાક્યં મહાદેવઃ સનાતનઃ ॥ ૪૪॥

કુપિતઃ કેતકીં પ્રાહ મિથ્યાવાદિનિ મા વદ ।
ગચ્છતો મધ્યતઃ પ્રાપ્તા પતિતા મસ્તકાન્મમ ॥ ૪૫॥

મિથ્યાભિભાષિણી ત્યક્તા મયા ત્વં સર્વદૈવ હિ ।
બ્રહ્મા લજ્જાપરો ભૂત્વા નનામ મધુસૂદનમ્ ॥ ૪૬॥

શિવેન કેતકી ત્યક્તા તદ્દિનાત્કુસુમેષુ વૈ ।
એવં માયાબલં વિદ્ધિ જ્ઞાનિનામપિ મોહદમ્ ॥ ૪૭॥

અન્યેષાં પ્રાણિનાં રાજન્ કા વાર્તા વિભ્રમં પ્રતિ ।
દેવાનાં કાર્યસિદ્ધ્યર્થં સર્વદૈવ રમાપતિઃ ॥ ૪૮॥

દૈત્યાન્વઞ્ચયતે ચાશુ ત્યક્ત્વા પાપભયં હરિઃ ।
અવતારકરો દેવો નાનાયોનિષુ માધવઃ ॥ ૪૯॥

ત્યક્ત્વાનન્દસુખં દૈત્યૈર્યુદ્ધં ચૈવાકરોદ્વિભુઃ ।
નૂનં માયાબલં ચૈતન્માધવેઽપિ જગદ્ગુરૌ ॥ ૫૦॥

સર્વજ્ઞે દેવકાર્યાંશે કા વાર્તાન્યસ્ય ભૂપતે ।
જ્ઞાનિનામપિ ચેતાંસિ પરમા પ્રકૃતિઃ કિલ ॥ ૫૧॥

બલાદાકૃષ્ય મોહાય પ્રયચ્છતિ મહીપતે ।
યયા વ્યાપ્તમિદં સર્વં ભગવત્યા ચરાચરમ્ ॥ ૫૨॥

મોહદા જ્ઞાનદા સૈવ બન્ધમોક્ષપ્રદા સદા ।
રાજોવાચ ।
ભગવન્બ્રૂહિ મે તસ્યાઃ સ્વરૂપં બલમુત્તમમ્ ॥ ૫૩॥

ઉત્પત્તિકારણં વાપિ સ્થાનં પરમકં ચ યત્ ।
ઋષિરુવાચ ।
ન ચોત્પત્તિરનાદિત્વાન્નૃપ તસ્યાઃ કદાચન ॥ ૫૪॥

નિત્યૈવ સા પરા દેવી કારણાનાં ચ કારણમ્ ।
વર્તતે સર્વભૂતેષુ શક્તિઃ સર્વાત્મના નૃપ ॥ ૫૫॥

શવવચ્છક્તિહીનસ્તુ પ્રાણી ભવતિ સર્વથા ।
ચિચ્છક્તિઃ સર્વભૂતેષુ રૂપં તસ્યાસ્તદેવ હિ ॥ ૫૬॥

આવિર્ભાવતિરોભાવૌ દેવાનાં કાર્યસિદ્ધયે ।
યદા સ્તુવન્તિ તાં દેવા મનુજાશ્ચ વિશામ્પતે ॥ ૫૭॥

પ્રાદુર્ભવતિ ભૂતાનાં દુઃખનાશાય ચામ્બિકા ।
નાનારૂપધરા દેવી નાનાશક્તિસમન્વિતા ॥ ૫૮॥

આવિર્ભવતિ કાર્યાર્થં સ્વેચ્છયા પરમેશ્વરી ।
દૈવાધીના ન સા દેવી યથા સર્વે સુરા નૃપ ॥ ૫૯॥

ન કાલવશગા નિત્યં પુરુષાર્થપ્રવર્તિની ।
અકર્તા પુરુષો દ્રષ્ટા દૃશ્યં સર્વમિદં જગત્ ॥ ૬૦॥

દૃશ્યસ્ય જનની સૈવ દેવી સદસદાત્મિકા ।
પુરુષં રઞ્જયત્યેકા કૃત્વા બ્રહ્માણ્ડનાટકમ્ ॥ ૬૧॥

રઞ્જિતે પુરુષે સર્વં સંહરત્યતિરંહસા ।
તયા નિમિત્તભૂતાસ્તે બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૬૨॥

કલ્પિતાઃ સ્વસ્વકાર્યેષુ પ્રેરિતા લીલયા ત્વમી ।
સ્વાંશં તેષુ સમારોપ્ય કૃતાસ્તે બલવત્તરાઃ ॥ ૬૩॥

દત્તાશ્ચ શક્તયસ્તેભ્યો ગીર્લક્ષ્મીર્ગિરિજા તથા ।
તે તાં ધ્યાયન્તિ દેવેશા પૂજયન્તિ પરાં મુદા ॥ ૬૪॥

જ્ઞાત્વા સર્વેશ્વરીં શક્તિં સૃષ્ટિસ્થિતિવિનાશિનીમ્ ।
એતત્તે સર્વમાખ્યાતં દેવીમાહાત્મ્યમુત્તમમ્ ।
મમ બુદ્ધ્યનુસારેણ નાન્તં જાનામિ ભૂપતે ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે
દેવીમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૩॥

## ૫.૩૪ ચતુસ્ત્રિંશોઽધ્યાયઃ । ભગવત્યાઃ પૂજારાધનવિધિવર્ણનમ્ ।

રાજોવાચ ।
ભગવન્બ્રૂહિ મે સમ્યક્તસ્યા આરાધને વિધિમ્ ।
પૂજાવિધિઞ્ચ મન્ત્રાંશ્ચ તથા હોમવિધિં વદ ॥ ૧॥

ઋષિરુવાચ ।
શૃણુ રાજન્પ્રવક્ષ્યામિ તસ્યાઃ પૂજાવિધિં શુભમ્ ।
કામદં મોક્ષદં નૃણાં જ્ઞાનદં દુઃખનાશનમ્ ॥ ૨॥

આદૌ સ્નાનવિધિં કૃત્વા શુચિઃ શુક્લામ્બરો નરઃ ।
આચમ્ય પ્રયતઃ કૃત્વા શુભમાયતનં નિજમ્ ॥ ૩॥

તતોઽવલિપ્તભૂમ્યાં તુ સંસ્થાપ્યાસનમુત્તમમ્ ।
તત્રોપવિશ્ય વિધિવત્ ત્રિરાચમ્ય મુદાન્વિતઃ ॥ ૪॥

પૂજાદ્રવ્યં સુસંસ્થાપ્ય યથાશક્ત્યનુસારતઃ ।
પ્રાણાયામં તતઃ કૃત્વા ભૂતશુદ્ધિં વિધાય ચ ॥ ૫॥

કુર્યાત્પ્રાણપ્રતિષ્ઠાં તુ સમ્ભારં પ્રોક્ષ્ય મન્ત્રતઃ ।
કાલજ્ઞાનં તતઃ કૃત્વા ન્યાસં કુર્યાદ્યથાવિધિ ॥ ૬॥

શુભે તામ્રમયે પાત્રે ચન્દનેન સિતેન ચ ।
ષટ્કોણં વિલિખેદ્યન્ત્રં ચાષ્ટકોણં તતો બહિઃ ॥ ૭॥

નવાક્ષરસ્ય મન્ત્રસ્ય બીજાનિ વિલિખેત્તતઃ ।
કૃત્વા યન્ત્રપ્રતિષ્ઠાઞ્ચ વેદોક્તા સંવિધાય ચ ॥ ૮॥

અર્ચાં વા ધાતવીં કુર્યાત્પૂજામન્ત્રૈઃ શિવોદિતૈઃ ।
પૂજનં પૃથિવીપાલ ભગવત્યાઃ પ્રયત્નતઃ ॥ ૯॥

કૃત્વા વા વિધિવત્પૂજામાગમોક્તાં સમાહિતઃ ।
જપેન્નવાક્ષરં મન્ત્રં સતતં ધ્યાનપૂર્વકમ્ ॥ ૧૦॥

હોમં દશાંશતઃ કુર્યાદ્દશાંશેન ચ તર્પણમ્ ।
ભોજનં બ્રાહ્મણાનાઞ્ચ તદ્દશાંશેન કારયેત્ ॥ ૧૧॥

ચરિત્રત્રયપાઠઞ્ચ નિત્યં કુર્યાદ્વિસર્જયેત્ ।
નવરાત્રવ્રતં ચૈવ વિધેયં વિધિપૂર્વકમ્ ॥ ૧૨॥

આશ્વિને ચ તથા ચૈત્રે શુક્લે પક્ષે નરાધિપ ।
નવરાત્રોપવાસો વૈ કર્તવ્યઃ શુભમિચ્છતા ॥ ૧૩॥

હોમઃ સુવિપુલઃ કાર્યો જપ્યમન્ત્રૈઃ સુપાયસૈઃ ।
શર્કરાઘૃતમિશ્રૈશ્ચ મધુયુક્તૈઃ સુસંસ્કૃતૈઃ ॥ ૧૪॥

છાગમાંસેન વા કાર્યો બિલ્વપત્રૈસ્તથા શુભૈઃ ।
હયારિકુસુમૈ રક્તૈસ્તિલૈર્વા શર્કરાયુતૈઃ ॥ ૧૫॥

અષ્ટમ્યાઞ્ચ ચતુર્દશ્યાં નવમ્યાઞ્ચ વિશેષતઃ ।
કર્તવ્યં પૂજનં દેવ્યા બ્રાહ્મણાનાઞ્ચ ભોજનમ્ ॥ ૧૬॥

નિર્ધનો ધનમાપ્નોતિ રોગી રોગાત્પ્રમુચ્યતે ।
અપુત્રો લભતે પુત્રાઞ્છુભાંશ્ચ વશવર્તિનઃ ॥ ૧૭॥

રાજ્યભ્રષ્ટો નૃપો રાજ્યં પ્રાપ્નોતિ સાર્વભૌમિકમ્ ।
શત્રુભિઃ પીડિતો હન્તિ રિપું માયાપ્રસાદતઃ ॥ ૧૮॥

વિદ્યાર્થી પૂજનં યસ્તુ કરોતિ નિયતેન્દ્રિયઃ ।
અનવદ્યાં શુભા વિદ્યાં વિન્દતે નાત્ર સંશયઃ ॥ ૧૯॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રો વા ભક્તિસંયુતઃ ।
પૂજયેજ્જગતાં ધાત્રીં સ સર્વસુખભાગ્ભવેત્ ॥ ૨૦॥

નવરાત્રવ્રતં કુર્યાન્નરનારીગણશ્ચ યઃ ।
વાઞ્છિતં ફલમાપ્નોતિ સર્વદા ભક્તિતત્પરઃ ॥ ૨૧॥

આશ્વિને શુક્લપક્ષે તુ નવરાત્રવ્રતં શુભમ્ ।
કરોતિ ભાવસંયુક્તઃ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૨॥

વિધિવન્મણ્ડલં કૃત્વા પૂજાસ્થાનં પ્રકલ્પયેત્ ।
કલશં સ્થાપયેત્તત્ર વેદમન્ત્રવિધાનતઃ ॥ ૨૩॥

યન્ત્રં સુરુચિરં કૃત્વા સ્થાપયેત્કલશોપરિ ।
વાપયિત્વા યવાંશ્ચારૂન્પાર્શ્વતઃ પરિવર્તિતાન્ ॥ ૨૪॥

કૃત્વોપરિ વિતાનઞ્ચ પુષ્પમાલાસમાવૃતમ્ ।
ધૂપદીપસુસંયુક્તં કર્તવ્યં ચણ્ડિકાગૃહમ્ ॥ ૨૫॥

ત્રિકાલં તત્ર કર્તવ્યા પૂજા શક્ત્યનુસારતઃ ।
વિત્તશાઠ્યં ન કર્તવ્યં ચણ્ડિકાયાશ્ચ પૂજને ॥ ૨૬॥

ધૂપૈર્દીપૈઃ સુનૈવેદ્યૈઃ ફલપુષ્પૈરનેકશઃ ।
ગીતવાદ્યૈઃ સ્તોત્રપાઠૈર્વેદપારાયણૈસ્તથા ॥ ૨૭॥

ઉત્સવસ્તત્ર કર્તવ્યો નાનાવાદિત્રસંયુતૈઃ ।
કન્યકાનાં પૂજનઞ્ચ વિધેયં વિધિપૂર્વકમ્ ॥ ૨૮॥

ચન્દનૈર્ભૂષણૈર્વસ્ત્રૈર્ભક્ષ્યૈશ્ચ વિવિધૈસ્તથા ।
સુગન્ધતૈલમાલ્યૈશ્ચ મનસો રુચિકારકૈઃ ॥ ૨૯॥

એવં સમ્પૂજનં કૃત્વા હોમં મન્ત્રવિધાનતઃ ।
અષ્ટમ્યાં વા નવમ્યાં વા કારયેદ્વિધિપૂર્વકમ્ ॥ ૩૦॥

બ્રાહ્મણાન્ભોજયેત્પશ્ચાત્પારણં દશમીદિને ।
કર્તવ્યં શક્તિતો દાનં દેયં ભક્તિપરૈર્નૃપૈઃ ॥ ૩૧॥

એવં યઃ કુરુતે ભક્ત્યા નવરાત્રવ્રતં નરઃ ।
નારી વા સધવા ભક્ત્યા વિધવા વા પતિવ્રતા ॥ ૩૨॥

ઇહ લોકે સુખં ભોગાન્પ્રાપ્નોતિ મનસેપ્સિતાન્ ।
દેહાન્તે પરમં સ્થાનં પ્રાપ્નોતિ વ્રતતત્પરઃ ॥ ૩૩॥

જન્માન્તરેઽમ્બિકાભક્તિર્ભવત્યવ્યભિચારિણી ।
જન્મોત્તમકુલે પ્રાપ્ય સદાચારો ભવેદ્ધિ સઃ ॥ ૩૪॥

નવરાત્રવ્રતં પ્રોક્તં વ્રતાનામુત્તમં વ્રતમ્ ।
આરાધનં શિવાયાસ્તુ સર્વસૌખ્યકરં પરમ્ ॥ ૩૫॥

અનેન વિધિના રાજન્ સમારાધય ચણ્ડિકામ્ ।

જિત્વા રિપૂનસ્ખલિતં રાજ્યં પ્રાપ્સ્યસ્યનુત્તમમ્ ॥ ૩૬॥

સુખઞ્ચ પરમં ભૂપ દેહેઽસ્મિન્સ્વગૃહે પુનઃ ।
પુત્રદારાન્સમાસાદ્ય લપ્સ્યસે નાત્ર સંશયઃ ॥ ૩૭॥

વૈશ્યોત્તમ ત્વમેવાદ્ય સમારાધય કામદામ્ ।
દેવીં વિશ્વેશ્વરીં માયાં સૃષ્ટિસંહારકારિણીમ્ ॥ ૩૮॥

સ્વજનાનાં ચ માન્યસ્ત્વં ભવિષ્યસિ ગૃહે ગતઃ ।
સુખં સાંસારિકં પ્રાપ્ય યથાભિલષિતં પુનઃ ॥ ૩૯॥

દેવીલોકે શુભે વાસો ભવિતા તે ન સંશયઃ ।
નારાધિતા ભગવતી યૈસ્તે નરકભાગિનઃ ॥ ૪૦॥

ઇહ લોકેઽતિદુઃખાર્તા નાનારોગૈઃ પ્રપીડિતાઃ ।
ભવન્તિ માનવા રાજઞ્છત્રુભિશ્ચ પરાજિતાઃ ॥ ૪૧॥

નિષ્કલત્રા હ્યપુત્રાશ્ચ તૃષ્ણાર્તાઃ સ્તબ્ધબુદ્ધયઃ ।
બિલ્વીદલૈઃ કરવીરૈઃ શતપત્રૈશ્ચ ચમ્પકૈઃ ॥ ૪૨॥

અર્ચિતા જગતાં ધાત્રી યૈસ્તેઽતીવ વિલાસિનઃ ।
ભવન્તિ કૃતપુણ્યાસ્તે શક્તિભક્તિપરાયણાઃ ॥ ૪૩॥

ધનવિભવસુખાઢ્યા માનવા માનવન્તઃ
સકલગુણગણાનાં ભાજનં ભારતીશાઃ ।
નિગમપઠિતમન્ત્રૈઃ પૂજિતા યૈર્ભવાની
નૃપતિતિલકમુખ્યાસ્તે ભવન્તીહ લોકે ॥ ૪૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે ભગવત્યાઃ
પૂજારાધનવિધિવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૫.૩૪॥

## ૫.૩૫ પઞ્ચત્રિંશોઽધ્યાયઃ । સુરથરાજસમાધિવૈશ્યયોર્દેવીભક્ત્યેષ્ટપ્રાપ્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા દુઃખિતૌ વૈશ્યપાર્થિવૌ ।
પ્રણિપત્ય મુનિં પ્રીત્યા પ્રશ્રયાવનતૌ ભૃશમ્ ॥ ૧॥

હર્ષેણોત્ફુલ્લનયનાવૂચતુર્વાક્યકોવિદૌ ।

કૃતાઞ્જલિપુટૌ શાન્તૌ ભક્તિપ્રવણચેતસૌ ॥ ૨॥

ભગવન્પાવિતાવદ્ય શાન્તૌ દીનૌ શુચાન્વિતૌ ।
તવ સૂક્તસરસ્વત્યા ગઙ્ગયેવ ભગીરથઃ ॥ ૩॥

સાધવઃ સમ્ભવન્તીહ પરોપકૃતિતત્પરાઃ ।
અકૃત્રિમગુણારામાઃ સુખદાઃ સર્વદેહિનામ્ ॥ ૪॥

પૂર્વપુણ્યપ્રસઙ્ગેન પ્રાપ્તોઽયમાશ્રમઃ શુભઃ ।
તવાવાભ્યાં મહાભાગ મહાદુઃખવિનાશકઃ ॥ ૫॥

ભવન્તિ માનવા ભૂમૌ બહવઃ સ્વાર્થતત્પરાઃ ।
પરાર્થસાધને દક્ષાઃ કેચિત્ક્વાપિ ભવાદૃશાઃ ॥ ૬॥

દુઃખિતોઽહં મુનિશ્રેષ્ઠ વૈશ્યોઽયં ચાતિદુઃખિતઃ ।
ઉભૌ સંસારસન્તપ્તૌ તવાશ્રમપદે મુદા ॥ ૭॥

દર્શનાદેવ હે વિદ્વન્ ગતં દુઃખમિહાવયોઃ ।
દેહજં માનસં વાક્યશ્રવણાદેવ સામ્પ્રતમ્ ॥ ૮॥

ધન્યાવાવાં કૃતકૃત્યૌ જાતૌ સૂક્તિસુધારસાત્ ।
પાવિતૌ ભવતા બ્રહ્મન્ કૃપયા કરુણાર્ણવ ॥ ૯॥

ગૃહાણાસ્મત્કરૌ સાધો નય પારં ભવાર્ણવે ।
મગ્નૌ શ્રાન્તાવિતિ જ્ઞાત્વા મન્ત્રદાનેન સામ્પ્રતમ્ ॥ ૧૦॥

તપઃ કૃત્વાતિવિપુલં સમારાધ્ય સુખપ્રદામ્ ।
સમ્પ્રાપ્ય દર્શનં ભૂયો યાસ્યાવો નિજમન્દિરમ્ ॥ ૧૧॥

વદનાત્તવ સમ્પ્રાપ્ય દેવીમન્ત્રં નવાક્ષરમ્ ।
સ્મરણઞ્જ કરિષ્યાવો નિરાહારૌ ધૃતવ્રતૌ ॥ ૧૨॥

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચોદિતસ્તાભ્યાં સુમેધા મુનિસત્તમઃ ।
દદૌ મન્ત્રં શુભં તાભ્યાં ધ્યાનબીજપુરઃસરમ્ ॥ ૧૩॥

તૌ ચ પ્રાપ્ય મુનેર્મન્ત્રં સમ્મન્ત્ર્ય ગુરુદૈવતૌ ।
જગ્મતુર્વૈશ્યરાજાનૌ નદીતીરમનુત્તમમ્ ॥ ૧૪॥

એકાન્તે વિજને સ્થાને કૃત્વાઽઽસનપરિગ્રહમ્ ।
ઉપવિષ્ટૌ સ્થિરપ્રજ્ઞૌ તાવતીવ કૃશોદરૌ ॥ ૧૫॥

મન્ત્રજાપ્યરતૌ શાન્તૌ ચરિત્રત્રયપાઠકૌ ।
નિન્ચતુર્માસમેકં તુ તત્ર ધ્યાનપરાયણૌ ॥ ૧૬॥

તયોર્માસવ્રતેનૈવ જાતા પ્રીતિરનુત્તમા ।
પાદામ્બુજે ભવાન્યાસ્તુ સ્થિરા બુદ્ધિસ્તથાપ્યલમ્ ॥ ૧૭॥

કદાચિત્પાદયોર્ગત્વા મુનેસ્તસ્ય મહાત્મનઃ ।
કૃતપ્રણામાવાગત્ય તસ્થતુશ્ચ કુશાસને ॥ ૧૮॥

નાન્યકાર્યપરૌ ક્વાપિ બભૂવતુઃ કદાચન ।
દેવીધ્યાનપરૌ નિત્યં જપમન્ત્રરતૌ સદા ॥ ૧૯॥

એવં જાતે તદા પૂર્ણે તત્ર સંવત્સરે નૃપ ।
બભૂવતુઃ ફલાહારં ત્યક્ત્વા પર્ણાશનૌ નૃપ ॥ ૨૦॥

વર્ષમેકં તપસ્તત્ર ચક્રતુર્વૈશ્યપાર્થિવૌ ।
શુષ્કપર્ણાશનૌ દાન્તૌ જપધ્યાનપરાયણૌ ॥ ૨૧॥

પૂર્ણે વર્ષદ્વયે જાતે કદાચિદ્દર્શનઞ્ચ તૌ ।
પ્રાપતુઃ સ્વપ્નમધ્યે તુ ભગવત્યા મનોહરમ્ ॥ ૨૨॥

રક્તામ્બરધરાં દેવીં ચારુભૂષણભૂષિતામ્ ।
કદાચિન્નૃપતિઃ સ્વપ્નેઽપ્યપશ્યજ્જગદમ્બિકામ્ ॥ ૨૩॥

વીક્ષ્ય સ્વપ્ને ચ તૌ દેવીં પ્રીતિયુક્તૌ બભૂવતુઃ ।
જલાહારૈસ્તૃતીયે તુ સ્થિતૌ સંવત્સરે તુ તૌ ॥ ૨૪॥

એવં વર્ષત્રયં કૃત્વા તતસ્તૌ વૈશ્યપાર્થિવૌ ।
ચક્રતુસ્તૌ તદા ચિન્તાં ચિત્તે દર્શનલાલસૌ ॥ ૨૫॥

પ્રત્યક્ષં દર્શનં દેવ્યા ન પ્રાપ્તં શાન્તિદં નૃણામ્ ।
દેહત્યાગં કરિષ્યાવો દુઃખિતૌ ભૃશમાતુરૌ ॥ ૨૬॥

ઇતિ સઞ્ચિન્ત્ય મનસા રાજા કુણ્ડં ચકાર હ ।
ત્રિકોણં સુસ્થિરં સૌમ્યં હસ્તમાત્રપ્રમાણતઃ ॥ ૨૭॥

સંસ્થાપ્ય પાવકં રાજા તથા વૈશ્યોઽતિભક્તિમાન્ ।
જુહાવાસૌ નિજં માંસં છિત્ત્વા છિત્ત્વા પુનઃ પુનઃ ॥ ૨૮॥

તથા વૈશ્યોઽપિ દીપ્તેઽગ્નૌ સ્વમાંસં પ્રાક્ષિપત્તદા ।

રુધિરેણ બલિં ચાસ્યૈ દદતુસ્તૌ કૃતોદ્યમૌ ॥ ૨૯॥

તદા ભગવતી દત્ત્વા પ્રત્યક્ષં દર્શનં તયોઃ ।
પ્રાહ પ્રીતિભરોદ્ભ્રાન્તૌ દૃષ્ટ્વા તૌ દુઃખિતૌ ભૃશમ્ ॥ ૩૦॥

દેવ્યુવાચ ।
વરં વરય ભો રાજન્ યત્તે મનસિ વાઞ્છિતમ્ ।
તુષ્ટાહં તપસા તેઽદ્ય ભક્તોઽસિ ત્વં મતો મમ ॥ ૩૧॥

વૈશ્યં પ્રાહ તદા દેવી પ્રસન્નાહં મહામતે ।
કિં તેઽભીષ્ટં દદામ્યદ્ય પ્રાર્થયાશુ મનોગતમ્ ॥ ૩૨॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં રાજા તામુવાચ મુદાન્વિતઃ ।
દેહિ મેઽદ્ય નિજં રાજ્યં હતશત્રુબલં બલાત્ ॥ ૩૩॥

તમુવાચ તદા દેવી ગચ્છ રાજન્ નિજં ગૃહમ્ ।
શત્રવઃ ક્ષીણસત્ત્વાસ્તે ગમિષ્યન્તિ પરાજિતાઃ ॥ ૩૪॥

મન્ત્રિણસ્તે સમાગમ્ય તે પતિષ્યન્તિ પાદયોઃ ।
કુરુ રાજ્યં મહાભાગ નગરે સ્વં યથાસુખમ્ ॥ ૩૫॥

કૃત્વા રાજ્યં સુવિપુલં વર્ષાણામયુતં નૃપ ।
દેહાન્તે જન્મ સમ્પ્રાપ્ય સૂર્યાચ્ચ ભવિતા મનુઃ ॥ ૩૬॥

વ્યાસ ઉવાચ ।
વૈશ્યસ્તામપ્યુવાચેદં કૃતાઞ્જલિપુટઃ શુચિઃ ।
ન મે ગૃહેણ કાર્યં વૈ ન પુત્રેણ ધનેન વા ॥ ૩૭॥

સર્વં બન્ધકરં માતઃ સ્વપ્નવન્નશ્વરં સ્ફુટમ્ ।
જ્ઞાનં મે દેહિ વિશદં મોક્ષદં બન્ધનાશનમ્ ॥ ૩૮॥

અસારેઽસ્મિંશ્ચ સંસારે મૂઢા મજ્જન્તિ પામરાઃ ।
પણ્ડિતાઃ સન્તરન્તીહ તસ્માન્નેચ્છન્તિ સંસૃતિમ્ ॥ ૩૯॥

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય મહામાયા વૈશ્યં પ્રાહ પુરઃસ્થિતમ્ ।
વૈશ્યવર્ય તવ જ્ઞાનં ભવિષ્યતિ ન સંશયઃ ॥ ૪૦॥

ઇતિ દત્ત્વા વરં તાભ્યાં તત્રૈવાન્તરધીયત ।

અદર્શનં ગતાયાં તુ રાજા તં મુનિસત્તમમ્ ॥ ૪૧॥

પ્રણમ્ય હયમારુહ્ય ગમનાય મનો દધે ।
તદૈવ તસ્ય સચિવાસ્તત્રાગત્ય નૃપં પ્રજાઃ ॥ ૪૨॥

પ્રણેમુર્વિનયોપેતાસ્તમૂચુઃ પ્રાઞ્જલિસ્થિતાઃ ।
રાજંસ્તે શત્રવઃ સર્વે પાપાશ્ચ નિહતા રણે ॥ ૪૩॥

રાજ્યં નિષ્કણ્ટકં ભૂપ કુરુષ્વ પુરમાસ્થિતઃ ।
તચ્છ્રુત્વા વચનં રાજા નત્વા તં મુનિસત્તમમ્ ॥ ૪૪॥

આપૃચ્છ્ય નિર્યયૌ તત્ર મન્ત્રિભિઃ પરિવારિતઃ ।
સમ્પ્રાપ્ય ચ નિજં રાજ્યં દારાન્સ્વજનબાન્ધવાન્ ॥ ૪૫॥

બુભુજે પૃથિવીં સર્વાં તતઃ સાગરમેખલામ્ ।
વૈશ્યોઽપિ જ્ઞાનમાસાદ્ય મુક્તસઙ્ગઃ સમન્તતઃ ॥ ૪૬॥

કાલાતિવાહનં તત્ર મુક્તબન્ધશ્ચકાર હ ।
તીર્થેષુ વિચરન્ગાયન્ભગવત્યા ગુણાનથ ॥ ૪૭॥

એતત્તે કથિતં દેવ્યાશ્ચરિતં પરમાદ્ભુતમ્ ।
આરાધનફલપ્રાપ્તિર્યથાવદ્ભૂપવૈશ્યયોઃ ॥ ૪૮॥

દૈત્યાનાં હનનં પ્રોક્તં પ્રાદુર્ભાવસ્તથા શુભઃ ।
એવમ્પ્રભાવા સા દેવી ભક્તાનામભયપ્રદા ॥ ૪૯॥

યઃ શૃણોતિ નરો નિત્યમેતદાખ્યાનમુત્તમમ્ ।
સમ્પ્રાપ્નોતિ નરઃ સત્યં સંસારસુખમદ્ભુતમ્ ॥ ૫૦॥

જ્ઞાનદં મોક્ષદં ચૈવ કીર્તિદં સુખદં તથા ।
પાવનં શ્રવણાન્નૂનમેતદાખ્યાનમદ્ભુતમ્ ॥ ૫૧॥

અખિલાર્થપ્રદં નૄણાં સર્વધર્મસમાવૃતમ્ ।
ધર્માર્થકામમોક્ષાણાં કારણં પરમં મતમ્ ॥ ૫૨॥

સૂત ઉવાચ ।
જનમેજયેન રાજ્ઞાસૌ પૃષ્ટઃ સત્યવતીસુતઃ ।
ઉવાચ સંહિતાં દિવ્યાં વ્યાસઃ સર્વાર્થતત્ત્વવિત્ ॥ ૫૩॥

ચરિતં ચણ્ડિકાયાસ્તુ શુમ્ભદૈત્યવધાશ્રિતમ્ ।
કથયામાસ ભગવાન્કૃષ્ણઃ કારુણિકો મુનિઃ ।

ઇતિ વઃ કથિતઃ સારઃ પુરાણાનાં મુનીશ્વરાઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં પઞ્ચમસ્કન્ધે સુરથરાજસમાધિવૈશ્યયોર્દેવી-
ભક્ત્યેષ્ટપ્રાપ્તિવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૫.૩૫॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે પઞ્ચમસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

---

*5 Shrimaddevibhagavatamahapurane Panchamah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*